CC0. In Public Domain. Digitizagtion by eGangotri

आचार्यविश्वेश्वरस्मृति-ग्रन्थमाला

। प्रथमं पुष्पम् ।

एकं सद् विप्रा बहुधा वदन्ति

कृतयते डा० मण्डनमिश्रस्य भावनया समलङ्कृतम्

लेखक

आचार्य श्रीगोविन्दचन्द्र पाण्डेय

सम्पूर्णानन्द संस्कृत विश्वविद्यालयः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

5.3
CC0. In Public Domain, Digitizagtion by eGangotri
Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

PRĀCĀRYA GRIPHITHASMṚTI- GRANTHAMĀLĀ
[Vol. 1]

EKAṀ SAD VIPRĀ BAHUDHĀ VADANTI

OF
ĀCĀRYAŚRĪ GOVINDACANDRA PĀṆḌEYA
Ex-Professor & Head,
Department of Ancient Indian History & Culture,
Gorakhpur, Rajasthan, Allahabad Universities
Ex-Vice-Chancellor,
Rajasthan & Allahabad Universities

FOREWORD BY
DR. MANDAN MISHRA
VICE-CHANCELLOR

VARANASI
1997

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Research Publication Supervisor—
Director, Research Institute,
Sampurnanand Sanskrit University
Varanasi.

❐

Published by—
Dr. Harish Chandra Mani Tripathi
Publication Officer,
Sampurnanand Sanskrit University
Varanasi-221 002.

❐

Available at—
Sales Department,
Sampurnanand Sanskrit University
Varanasi-221 002.

❐

First Edition, 500 Copies
Price : Rs.80.00

❐

Printed at—
Ratna Offsets Limited
B-21/42A, Kamachha
Varanasi-221 010

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्राचार्यग्रिफिथस्मृति-ग्रन्थमाला

[प्रथमं पुष्पम्]

एकं सद् विप्रा बहुधा वदन्ति

कुलपतेः डॉ. मण्डनमिश्रस्य प्रस्तावनया समलङ्कृतम्

प्रणेता

आचार्यश्रीगोविन्दचन्द्रपाण्डेयः

आचार्यचरः,

प्राचीनभारतीयेतिहास-संस्कृतिविभागस्य

गोरखपुर-राजस्थान-प्रयागविश्वविद्यालयानाम्

कुलपतिचरश्च,

राजस्थान-प्रयागविश्वविद्यालययोः

वाराणस्याम्

२०५४ तमे वैक्रमाब्दे १९१९ तमे शकाब्दे १९९७ तमे खैस्ताब्दे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनुसन्धानप्रकाशनपर्यवेक्षकः –
निदेशकः, अनुसन्धानसंस्थानस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी ।

❐

प्रकाशकः –
डॉ. हरिश्चन्द्रमणित्रिपाठी
प्रकाशनाधिकारी,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी-२२१ ००२

❐

प्राप्तिस्थानम् –
विक्रय-विभागः,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी-२२१ ००२

❐

प्रथमं संस्करणम्, ५०० प्रतिरूपाणि
मूल्यम्– ८०.०० रूप्यकाणि

❐

मुद्रकः –
रत्ना ऑफसेट्स लिमिटेड
बी. २१/४२ ए, कमच्छा,
वाराणसी-२२१ ०१०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रस्तावना

अस्य विश्वविद्यालयस्य पूर्वतनरूपस्य काशिकराजकीयसंस्कृतपाठशालायाः स्वनामधन्येषु प्राचार्येषु तत्रभवतां **श्री आर० टी० एच० ग्रिफिथ**-महोदयानां नाम स्वर्णाक्षरैः समुल्लेखनीयं वर्तते । एते ह्यस्य पाठशालायाः १८६१ तः १८७८ पर्यन्तं प्राचार्या आसन् । अस्या एव संस्थायाः परिसरेऽवस्थाय तैर्वैदिकसंहितानाम् आङ्ग्लभाषायामनुवादः कृतः । तेषामियं स्मृतिर्विश्वविद्यालयेऽस्मिन् स्मारकत्वेन संरक्षिता सुरक्षिता च वर्तते ।

विश्वविद्यालयेन गतवर्षे विश्वविद्यालयसम्बद्धानां पञ्चमहाविदुषां स्मृतौ विशिष्टानां व्याख्यानमालानां समायोजनं निर्णीतम् । तदनुसारं **प्राचार्यश्री-आर०टी०एच० ग्रिफिथ-महामहोपाध्यायश्रीगोपीनाथकविराज-आचार्य-श्रीबदरीनाथशुक्ल-आचार्यश्रीपट्टाभिरामशास्त्रि-पण्डितश्रीजगन्नाथ-उपाध्यायानां** स्मृतौ व्याख्यानमालाः समारब्धाः । एतासु आचार्यबदरीनाथशुक्लस्मृति-व्याख्यानमाला पूर्वतः प्रायः पञ्चवर्षेभ्यो वन्दनीयानां **डॉ० विद्यानिवास-मिश्रमहाशयानां** प्रेरणया श्रद्धेयानां तपस्विप्रवराणामाचार्याणां **श्रीगुरुशरणा-नन्द**महोदयानामवदानेन प्रतिष्ठापिताऽऽसीत् । सम्प्रति विश्वविद्यालय-स्यानेन निर्णयेनास्या व्याख्यानमालाया अपि स्थायिनी व्यवस्था संवृत्ता ।

अयमस्ति सौभाग्यस्य विषयो यद् विश्वविद्यालयस्य तुलनात्मकधर्म-दर्शनविभागस्य संयोजने इदंप्रथमतया व्याख्यानमालेयं प्रवृत्ता । तस्याञ्च भारतीयप्रज्ञाया साक्षान्मूर्त्तिभिर्भारतीयसंस्कृतेः, भारतीयेतिहासस्य, भारतीय-विद्यायाश्च विश्वविख्यातैर्विद्वद्भिः पूज्यपादैः **आचार्यश्रीगोविन्दचन्द्रपाण्डेय**-महोदयैः **"एकं सद् विप्रा बहुधा वदन्ति"** इति विषयमधिकृत्य व्याख्यानद्वयं प्रदत्तम् । भारतीयतत्त्वज्ञानस्य विविधतायाः प्रवर्तकमिदं वाक्यं विद्वद्वरेण्यै-राचार्यप्रवरश्रीपाण्डेयमहोदयैरधिकारपूर्वकं प्रस्तुतम् । एतत्प्रतिपादनं सर्वस्यापि विश्वस्य कृते मार्गदर्शकं भविष्यति । तेषामिदमवदानमहं कृतज्ञतापूर्वकं शिरसा धारयामि, अभिनन्दामि च तेषां वैदुष्यम्, समर्पयामि च स्वकीयां प्रणतिपरम्परां तेषां चरणारविन्दयोः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्याख्यानस्यास्य समायोजनं तुलनात्मकधर्मदर्शनविभागाध्यक्षैः, दर्शन-सङ्कायप्रमुखैः **प्रो० राधेश्यामधरद्विवेदिभिः** कृतम्, तेऽपि प्रसङ्गेऽस्मिन् धन्य-वादार्हाः । ग्रन्थस्यास्य सुष्ठु प्रकाशनाय प्रकाशनाधिकारिणं **डॉ० हरिश्चन्द्र-मणित्रिपाठिनं** 'रत्ना-आफसेट्स-लिमिटेड'-यन्त्रालयस्य सञ्चालकं **श्रीविपुल-शङ्करपण्ड्या**महोदयं च कार्तज्ञ्येन सम्भावयामि ।

वाराणस्याम्
कार्तिकपूर्णिमायाम्,
वि० सं० २०५४

मण्डनमिश्रः
कुलपतिः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रास्ताविकम्

प्राचार्य-ग्रिफिथ-स्मृति-व्याख्यानमालां योजयद्भिः सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय-कुलपतिभिर्विद्यामहिममण्डितैः **श्रीमन्मण्डनमिश्र**महाभागैश्चिरन्तनस्यापि धर्मतत्त्वस्य युगान्तरोचितः पुनर्विचारावसरः प्रादायि तोषाय सुधियाम् । सनातनानामपि तत्त्वानां कालाविर्भूतच्छवयः कालेनैव मन्दायन्त इति व्याख्याकारैराचार्यैः प्रतियुगं नूतनविचारेण तत्परिष्कारो विधीयत इति नाविदितं कस्यचिदपि विविदिषोः । सम्प्रति नानाम्नायसम्प्रदायानां परस्परं संवादेन विवादेन च तत्त्वविचारः सविशेषमपेक्ष्यते तुलनात्मक-धर्मदर्शनसङ्ग्राह्यः । अस्मिन्नेव प्रक्रमे मयाप्यनयोर्व्याख्यानयोरुपक्रान्तो विमर्शः ।

नानाधर्मसम्प्रदायेषु स्वस्वागमपुरस्सरं रचितानि शास्त्राणि कल्पितानि च तदनुसारीणि दर्शनानि । तेषां मिथोविरोधेषु स्फुटेष्वप्यस्त्येवाग्र्यया बुद्ध्योपलब्धव्यं तेषां निगूढं गभीरं चाद्वैतम् । कथं तदेकं सद्बोद्धव्यमिति नानाधुनिकव्याख्यासरणिपरीक्षापुरस्सरं विचार्यते प्रथमे व्याख्याने प्रस्थान-भेदसमाधानचेष्टया । स्वस्ववासनाजन्याधिकारभेदेन तदेव चरमं तत्त्व-मुपाधिभेदेन नानावसीयत इति तत्र तत्त्वम् । नानाभूमिषु साधनानुभूतीनां तद्गततत्त्वानां च विचार्यन्ते भेदा द्वितीये व्याख्याने प्रवृत्ति-निवृत्ति-परावृत्ति-लक्षणानि च विवेच्यन्ते । एक एव सनातनो धर्मो विनेयभेदाद् नानाभूमिको नाना प्रकारश्च प्रकाशत इति सारम् ।

प्राचीननवीनसरणिसमवधानाद् उभयविधानामपि विदुषामुत्सारितमात्स-र्याणामत्रत्यदोषपरिमार्जनक्षान्तिं प्रार्थयमाणः **श्रीमन्मण्डनमिश्र**महाभागान् तन्निमन्त्रणेन कृपया पुरोवागुपन्यासेन चानुगृहीतः पुनः पुनः सम्मानयन् विरमामि ।

विदुषां वशंवदः
गोविन्दचन्द्रपाण्डेयः

श्रीकृष्णजन्माष्टमी,
वि. सं. २०५४

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विषयानुक्रमणिका

१. प्रभिन्ने प्रस्थाने (तुलनात्मकपद्धतिविमर्शः) १–४८

व्याख्यानविषयप्रयोजननिर्देशः, धर्मशब्दार्थः, धर्माणां तर्कातीतम् अद्वैतम्, सम्प्रदायभेदाश्च, साम्प्रदायिकभेदेभ्यः संवादाभिमुखी प्रवृत्तिस्तद्भेदाश्च ।

२. यत्सानोः सानुमारुहत् ४९–८७

आध्यात्मिकानुभूतिसोपानपङ्क्तिः, आध्यात्मिकानुभूतिविवेचनपद्धतिः, परमार्थपर्येषणारम्भः – मृत्युबोधः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आचार्यश्रीगोविन्दचन्द्रपाण्डेयप्रणीतः

एकं सद् विप्रा बहुधा वदन्ति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रथमं व्याख्यानम्

प्रभिन्ने प्रस्थाने (तुलनात्मकपद्धतिविमर्शः)

आदौ यशःकान्तिशेषान् दिवङ्गतान् प्राचार्य-**ग्रिफिथ**-महोदयान् सादरं स्मरामि यन्नाम्ना इयं व्याख्यान-माला विश्वविद्यालयेन प्रवर्तिता, तन्मालाग्रथने च प्रथमपुष्पाहरणाय अकिञ्चिज्ज्ञोऽप्येष जनो विद्वन्मण्डली-मण्डनैः श्रीमद्भि**र्मण्डनमिश्र**महाभागैः सुहृत्सहजेन स्नेहेन कृपया चात्राहूय अनुग्रहपात्रमकारि । अत्रभवतां विपश्चितां पुरतः स्थित्वा सुगभीरं च धर्म-दर्शनविषयम् अधिकृत्य यदपरिशीलितशास्त्रोऽपि किञ्चिद् वक्तुम् उपक्रान्तोऽस्मि तन्न तथा विवदिषया यथा व्याख्यानव्याजेन भवतां दिदृक्षयैव । प्राच्यप्रतीच्ययोः प्राचीननवीनयोरन्वीक्षामार्गयोः समन्वयो-पक्रमं विधित्सन्, "कदाचिदत्रभवन्तो विद्वांसः प्रक्रममिममनुमोदिष्यन्त" इति दुराशयास्मि गृहीतचापलः "**प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः**" ।

ग्रिफिथमहोदयैराङ्ग्लभाषया अनूदिता वेदाः, तथा च वेद-विद्यानुशीलनपरायणानां कृतं महत् साहाय्यम् । विदितमेव यत् कालेन वेदभगवान् दुरालक्ष्याशयो जातः, तदभिप्रायान्वेषणे च यैः परिश्रमो व्यधायि तेष्वन्यतमो विश्वविश्रुतो मोक्षमूलरमहोदयः[1] । तस्यैव व्याख्या-सरणिमनुसृत्य ग्रिफिथमहोदयैर्व्यरचि स्वकीयोऽनुवादः । मोक्षमूलरमहोदया आधुनिकधर्मतत्त्वविज्ञानस्य, तदानीं शर्मण्यभाषया रेलिगियोन्स-विसेनशाफ्त अथवा रेलिगियोन्स–गेशिस्ते इत्याख्यस्य नूतनविद्याविभागस्य प्रवर्तकत्वेन प्रसिद्धाः । अतश्च ग्रिफिथमहोदयस्मृति-व्याख्यानमालाया-स्तुलनात्मकधर्मदर्शनविषयताऽपि स्फुटमेव भजत्यौचित्यम् ।

परम्परागतादागमानुसारिशास्त्रात्तदनुषङ्गिदर्शनाच्च भिद्यते तुलनात्मक–धर्मदर्शनमिदम् । परम्पराप्रसिद्धं धर्मपरिशीलनं परम्पराविशेषमेव विषयी-करोति, तुलनात्मकाध्ययनं तु नानाधर्मसम्प्रदायांस्तुलयति, सदृशासदृशतया ऐतिहासिकतया च व्यवस्थितं सर्वधर्मसङ्ग्रहं विषयीकरोति दार्शनिका-लोचनस्य । एवञ्च तुलनापुरस्सरं धर्मविषयं दर्शनमेव तुलनात्मकधर्मदर्शनं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रतिपत्तव्यम् । यथा नवीनं कलादर्शनं राजनीतिदर्शनं वा नैकपरम्परा-सङ्गृहीतविषयं तथैव धर्मदर्शनमपि नवीनम् । विश्वतोऽस्य वृत्तिः स्वतन्त्रप्रज्ञात्मिका च प्रवृत्तिः । तथापि परस्परविरोधित्वादस्य विभागानां स्फुटमेवापेक्ष्यते पुनर्विचारः ।

व्याख्यान-विषय-प्रयोजन-निर्देशः

"यत्र विश्वं भवत्येकनीड"मिति यत् पुरातनैर्मनीषिभिराशंसितम्, तदद्यत्वे लौकिकप्रज्ञाप्रासादगवाक्षात् प्रेक्षमाणा नवीना अपि विद्वांस आशंसन्ति । तत्र तु प्रतिबन्धकेषु नानाधर्मसम्प्रदायानां मिथोविरोधाः सविशेषं लक्ष्यन्ते । तेषां परिजिहीर्षानुष्ठाने मयाऽप्यात्मा नियोक्तव्य इति मत्वा प्रतिभासमानेषु नानाधर्मगतेषु भेदेषु पारमार्थिकमैक्यं जिज्ञासितम् अस्मिन् व्याख्यानावसरे । प्रथमे व्याख्याने नानाधर्माणां तुलनात्मक-पद्धत्या यद् गवेषणमद्यत्वे प्रवृत्तं तत्समीक्षापुरस्सरं प्रज्ञाभिमुखश्रद्धापर्वाणि विचारार्थं विषयतयोपात्तानि । द्वितीये व्याख्याने प्रज्ञाप्रासादभूमयो गवेषणाया विषयीकृताः । उभयोरप्यनयोः समुच्चितं शीर्षकम् "एकं सद् विप्रा बहुधा वदन्तीति" भवतां विदितमेव । तत्र प्रथमद्वितीययो-र्व्याख्यानयोः शीर्षके यथाक्रमं "प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च" इति, "यत्सानोः सानुमारुहत्" इति च ।

धर्म-शब्दार्थः

विधानं साधनं चैव लोकस्थितिमथापि च ।
वस्तुस्वभावविज्ञानं ब्रूते धर्मो विधारणात् ॥ १ ॥

धर्मशब्दस्य व्युत्पत्तिनिमित्तं तावद् "धारणाद् धर्म इत्याहुर्धर्मो धारयते प्रजाः" इत्यनेनैव प्रसिद्धवचनेन स्फुटीभवति । रिलिजन-शब्देनापि बन्धः सम्बन्धो वा सूच्यते । शब्दप्रवृत्तेर्निमित्तं च गवेषमाणेन देवायतन–चैत्य–चर्च–मस्जिदादिषु वासुदेव–बुद्ध–क्रिस्त–मुहम्मदादिषु वेद-त्रिपिटक-वाइ–विल–कुरानादिषु च श्रद्दधानेषु जनेषु धर्मचारिण इति व्यवहारमालोक-यता गौरव–प्रसाद–भक्त्यादिसंवलित-श्रद्धाबुद्धिरेवास्य निमित्तमिति निश्चे-तव्यम् । ननु कः पदार्थो धर्मा नाम कश्चोपायस्तदवगमायेति अनुयोग-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्वयमपि अन्योन्यापेक्षमर्धवृगलायमाणम्, केचिद् हि सौगतादयो मेयाधीनां मानसिद्धिम्, अपरे पुनर्मानाधीनामेव मेयसिद्धिम् आमनन्ति । सदृशी चैव स्थितिः पदपदार्थसम्बन्धविनिर्णयेऽपि[2] । तथापि परम्परावाहिनि शब्दव्यवहारे सम्प्रदाय एव प्रथमतः समालोचनीयः शब्दार्थ- निर्णयार्थम् । तथा च धर्मशब्दे समुच्चारिते कश्चित् क्रिस्तानुयायी स्वधर्मप्रवर्तकमेव स्मरेत् शूलारोपिताकारम्, समवेतोपासनागारं वा गोलार्ध- शिखरं गगनोन्मुखविहितसन्धानमिव शरानीकाभशिखम्, नूतननियमाभिलिखितं पुस्तकं वा, त्रैतं वा सैद्धान्तिकं सन्देशं वा विश्वजन्यस्य प्रेम्णः परप्रहारसहनशीलताया वा । स एव क्रिस्तधर्मानुयायी हिन्दुधर्म इति श्रुत्वा स्मरेत् प्रयागे कुम्भपर्व बहुजनसम्मर्दं दिग्वासोभिः साधुभिः समाकीर्णं कीर्तनानुनादितम्, स्मरेद्वा नानाहस्तपादमस्तकादिविचित्रितानि देवता-चित्राणि चित्रीयमाणचेताः, बहुदेववादं वा स्पृश्यास्पृश्यविवेकवैषम्य-विस्तारं वा । अद्भुतवेशान् योगिनस्तापसान् वा । एवञ्च नाना-धर्मानुयायिनः स्वधर्मं परधर्मांश्च भिन्नभिन्नमेवाभिजानन्ति । क्रिस्ता-नुयायिषु सुगतानुयायिषु च शास्त्रधर्मसङ्घात्मकं प्रसिद्धं त्रिरत्नम् । मोहम्म-दीयेषु तादृशसङ्घाभावेऽपि सनेतृकानुयायिसमवायात्मकोऽस्त्येव सङ्घः । हिन्दुषु वेदैर्वर्णाश्रमव्यवस्थया कर्मकाण्डेन च बहुविधेन चिरं लक्ष्यते स्म धर्मः, तथैव च हिन्दुधर्मस्य विवरणं लक्ष्यते अलबेरुनीकृतमेकादशे क्रिस्ताब्दशतके, षोडशे अबुलफज्लकृते आइने-अकबरीत्याख्ये सप्तदशे शतके दबिस्तानेम-जाहिब-इत्याख्ये प्रसिद्धग्रन्थे । अष्टादशे शतके आबे दूब्वानाम्ना पर्यवेक्ष-केण विचित्राचारसमुदाचारविशेषैरेव हिन्दवो वर्णिताः ।

एतेषु दिवसेषु बहवः पाश्चात्त्या विपश्चितो हिन्दूनां नानाकृत्यकलापेषु समुदाचार-रीति-रूढिषु देशकालविप्रकीर्णासु कञ्चिदन्वयिनं धर्ममेव लक्षण-क्षमं न पश्यन्ति । तेषां मतेन नास्त्येव किञ्चित् सामान्यं तत्त्वं हिन्दुधर्मस्य, नानासजातीया भेदा एव तत्त्वभ्रान्तिमुपजनयन्ति । यत्तु शास्त्रेषु विवेचनं तत्केषाञ्चित् शिष्टानां विदुषामेव वाग्विलासः, न तस्य व्यवहारेण कश्चि-दान्तरः सम्बन्धः । सिद्धान्तभेदेऽपि हि सम्प्रदायेषु स एवास्पृश्यतादिलक्षितो जातिधर्मः सर्वान्प्रति अविशिष्टः । अनेकासु च निषादादिजातिषु 'हिन्दू'

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इति ख्यातासु नास्त्येव कश्चिच्छास्त्रप्रचारः, धर्मप्रकारस्तु देवताप्रसाद-नात्मक-कर्मकाण्ड एव उपाध्यायनेतृकः । सन्ति च नास्तिका अपि लोकोत्तरं किमपि तत्त्वमप्रतिपन्नाः कर्मकाण्डानुष्ठानं वा शान्तिनाथादयः संयमिनस्त्यागिनश्च परहितनिरता यान् धर्मबाह्यान् वक्तुं नोचितं स्यात्[3] ।

आभ्युदयिको नैःश्रेयसिकश्चेति प्रसिद्धौ भेदौ धर्मस्य[4] । आभ्युदयिकोऽपि लौकिकपारलौकिकहितप्रदत्वाद् द्विविधः । आचार-व्यवहार-नियामको लौकिकः, सांस्कारिकानुष्ठानिकश्च पारलौकिकः । प्रत्यग्वेद्यः साङ्केतिक-चैतसिको लोकोत्तरो धर्मः । पूर्वपूर्वपुरस्सरश्च उत्तरोत्तरो भेदः । एवमादिमं स्थूलतमं व्यापकतमं च रूपं धर्मस्य लोकनीतिविशेषात्मकम् । सर्वेषु च परम्परानुगेषु समाजेषु आचारव्यवहारव्यवस्था धर्ममूला धर्म-संसृष्टा वा लक्ष्यते । लोकः समाजो वा जातिर्भवेद् देशः संघो वा ।

इत्थं धर्मशब्देन व्यवह्रियमाणासु व्यवस्थासु चतुर्धा विभाजनमापातलो नासमीचीनं प्रतिभाति । प्रथमतस्तु सन्ति जातीयधर्मास्तत्तज्जातीय-संस्कृतिपरिवेष्टिता लोकैषणाप्रधाना देवतावेशदीक्षितगुरुसम्प्रदायानुसारेण देवतोपासनाद्यदृष्टसाधनाः । ततश्च दृश्यन्तेऽन्ये महापुरुषप्रवर्तितशास्त्रा-नुसारिसङ्घात्मका धर्माः । ततोऽप्यन्ये चिरन्तनशास्त्रसम्प्रदायेन वर्तमाना अप्यविच्छिन्नजातिसमवायसहिता देशविशेषधर्माः । ततोऽप्यन्यो निःस्वार्थ-करुणानां जितात्मनां योगिनां विश्वजन्यो धर्मः । एष च जातीय-चिरन्तनसम्प्रदायात्मक-प्रवर्तित–सनातन-भेदेन चातुर्विध्यं भजन्नपि धर्मः चतुर्णामपि तत्त्वानां चतुर्ष्वपि भेदेषु न्यूनाधिकमात्रया समनुप्रवेशाद् वस्तुत एक एवान्वयी भिन्नपर्यायः । चत्वारि तत्त्वानि इत्थं निर्देष्टुं शक्यानि–जातीयसंस्कृतिः, चिरन्तनसम्प्रदायः, प्रवर्तकशासनम्, सनातनो योगश्चेति । जातीयसंस्कृतिगर्भिताः पुरातीता धर्मास्तुलनात्मकधर्मविज्ञानेनाधुना पर्यालोच्य-न्ते । तत्र तुलनात्मकपद्धतिर्द्विविधा स्वीक्रियते–भाषाशास्त्रनिबन्धना, प्रत्यक्षपर्यवेक्षणनिबन्धना च, उभयथापि च सा तुलनात्मिका । चिरन्तन-सम्प्रदायवाहिनो धर्माः स्वस्वशास्त्रेष्वर्थनिर्वचनमीमांसाभ्यां व्यवस्थापिताः, आधुनिकैस्तद्गतजातिधर्मपक्षस्य पर्यवेक्षणेन सम्प्रदायस्य च इतिहास-निरूपणपुरस्सरमेव परीक्षा विधीयते, आगमानुसारिसम्प्रदायाः स्वस्वधर्म-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शास्त्रैर्दर्शनैश्च परीक्ष्यन्ते, आधुनिकाश्च तान् समाजविज्ञानोपायैस्तर्केण च परीक्षन्ते । सनातनधर्मस्तु साधकानां सिद्धान्तैर्वचनैः कार्यैश्च प्रकाशिताया आध्यात्मिक्या अनुभूतेर्विमर्शेनैव परीक्ष्यः । मनोविज्ञानशास्त्रिभिश्चाध्यात्म-दर्शनविद्भिश्चेयं परीक्षा नानेव विधीयते ।

मानवीयत्वादस्ति धर्मस्य पक्षद्वयम्–आन्तरो बाह्यश्चेति । मनोवाक्–काय–कर्माणि त्रीण्यपि व्याप्नोति धर्मः, एकस्याप्यन्यथात्वे मिथ्यात्व-माविशेत्तदितरद्वयम् । धर्मस्य तत्त्वतो भावतश्च सत्यनिष्ठतां मन्यमानाः पुरातनसम्प्रदायवर्तिनो विचारकास्तस्य ज्ञानात्मकमाध्यात्मिकं पक्षं प्रायेण प्रधानं स्थापयन्ति, धर्मेऽनास्थावन्तश्चाधुनिका बहवो वैज्ञानिका बाह्यं सामाजिकरीत्यनुमोदितं कर्मपक्षमेव प्रधानं ज्ञानपक्षं च गौणमवधारयन्ति । ते धर्मस्य तत्त्वं सामाजिककृत्येष्वेव पश्यन्ति, न तत्त्वज्ञाने । तथाप्य-सन्दिग्धं पक्षद्वयवत्त्वं धर्मस्य । न चेमौ पक्षौ पृथक् पृथक् सम्यग्-विवेचनार्हौ । तत्रायं निभालनीयो दृष्टान्तः । विश्वविश्रुतस्य कथाकारस्य शरच्चन्द्रचट्टोपाध्यायस्यास्ति काचित् कथा **शेष-प्रश्न** इत्याख्या, तत्र नायिका शिवानी नाम्ना तर्कनिपुणा नास्तिक्यप्रवणा च । येऽपि आस्तिक्यं युक्तिभिः प्रतिपादयन्ति तान् सा पटु खण्डयति । तर्कस्य हि प्रतितर्कजनकत्वाद् अप्रतिष्ठितत्वमेव तर्कस्यानेन सुविशदं निदर्शितं कथाकृता । अन्ते कथाया नायिका कञ्चित् पुरुषं पश्यति यो न विवदति शास्त्रार्थेषूदासीनः, परार्थे तु त्यजति स्वकीयां तनुमनायासेनैव । तस्यात्मत्यागस्य वृत्तान्तं विज्ञाय शिवानी तस्य निष्ठाया महिमानं बुद्ध्वाऽऽत्मनस्तर्कग्रन्थिलां मतिं तुच्छामवैत्[5] । हृदयनिहितं धर्मस्य तत्त्वं कर्मणैवात्र स्फुटं प्राकाशि । विनोबाभावे इत्याख्या महात्मानोऽप्यब्रुवन् जलमिव कर्म क्षालयति चित्तमिति[6] । एतदेव विपरीतेनापि दृष्टान्तेन शक्यं प्रकटयितुम् । 'फौर्स्टर' इत्याख्यस्य प्रसिद्धस्याङ्ग्लकथाकारस्यास्ति 'भारतयात्रा' (**पैसेज टु इण्डिया**) इत्याख्या कथा । तत्र 'गौड़बोले' इत्याख्यः कश्चित् पुरुषो वेदान्तसम्मतां वार्तां कुर्वाणोऽपि न स्वचारित्र्ये कांश्चिदपि उदात्तानध्यात्मगुणान् प्रकाशयति । तेन मिथ्याचारगन्ध एव ततो लभ्यते[7] । एतादृशमेव गन्धं बहवोऽन्वीक्षका आधुनिका धार्मिकमण्डलीषु लभमाना-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्तत्र विजहति विश्वासम् । एतेन उभयविधा अपि अन्तग्राहकाः परीक्षकाः प्रत्यादिष्टाः शास्त्रमात्रं प्रतिपन्ना आचारमात्रं वा । सम्प्रदायलब्ध-श्रद्धाबुद्धिपूर्वा अर्थैषणा धर्म इति धर्मस्य प्रथमं लक्षणं शक्यते वक्तुम् । तथा च निर्गलितं धर्मतत्त्वमित्थं शक्यते विवरीतुम् । नानाचैत्यधर्मसंघातो नानाप्रवृत्तिः पुरुषः[8] । नानाप्रतिघातमागम्य आत्मानं प्रविभज्य भुवो निम्नोन्नततामनुसरन्ती नानाधाराभिः प्रवहन्ती सरिदिव मानवचर्यापि । नानाभोगाननुसन्दधानस्य कर्माणि सम्पादयतो विद्यास्थानानि जिज्ञासमानस्य सृजतश्च विद्याकाव्यकलाशिल्पानि प्रवहति मानवस्य जीवनधारा नाना दिक्षु प्रविभक्ता । अनिशं समीहाप्रयुक्तो विचेष्टमानोऽपि नासौ लभते सन्तृप्तिमैकान्तिकीमात्यन्तिकीं च । यतो हि नाल्पे सुखमस्ति, भूमैव सुखम् । यदा तु समग्रश्रेयोरूपं भूमानमेव पर्येषते समग्रेणात्मना तदा धर्मवर्त्मनि प्रतिष्ठते । तद्यथा कर्मसु परमं किमपि कर्तव्यं यदा बुध्यते निरवग्रहम्, तदायं धर्मबुद्ध्या प्रयोजितो द्रष्टव्यः । प्रायेण दृष्टफलेषु कर्मसु परिणामाकलनेनैव अभिसन्धिपुरस्सरमेव च प्रवृत्तिर्भवतीति न तेषु निरवग्रहपरमताबुद्धिरवकाशं लभते । लोकोत्तरसम्बन्धेन अध्यात्मबुद्ध्या वा तादृशी बुद्धिः सम्भविनी सैव च कर्मयोगात्मिका । तत्त्वानि जिज्ञासमानोऽपि यदा यस्मिन् विज्ञाते सर्वमिदं विज्ञातं भवतीति परमं तत्त्वं जिज्ञासते तदाप्यस्य गतिर्न व्यत्येति ज्ञानमार्गाद् धर्मस्य । भोगेष्वपि यदा सुखदुःखे उपेक्ष्य सहजमात्मानन्दं लीलारसं वा सर्वत्रानुसन्धत्ते तदा भक्तियोगमेव लभते । एवञ्च एकाग्रतामापन्नैः कर्मज्ञानभावैस्तत्त-द्योगमवाप्य समग्रं परमार्थं परमात्मानं भगवन्तं पर्येषमाणो धर्मयात्रामार्गे प्रतिष्ठते । खण्डखण्डविकीर्णमिव पुरुषं नवीनेन प्रमाणेन संयोज्य जन्मे-वापरं ददात्यस्मै धर्मसाधना । आत्मानं विखण्डितेषु कर्मभोगानुसन्धानेषु क्षपयन् प्राकृतः पुरुषस्तेन उन्मीलितचक्षुरार्यो भवति परमार्थतो द्विजः[9] । लभ्यते नूतना दृष्टिस्तेन दूरादिवालक्ष्यतेऽमृतं पदं यदर्थं जुहोति सर्वस्वं कृतसङ्कल्पः[10] । श्रद्धाबुद्धेः पर्येषणीयस्यार्थस्य ससाधनस्य लक्षणप्रमाणाभ्यां विवेचनं दर्शनेन करणीयं स्यात् । भक्तिसहजाया विश्वासफलायास्त-स्यास्तत्त्वविवेचनात्पूर्वं तु तथ्यनिरूपणमपेक्षितम् । निरूपणविवेचन-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पद्धत्योश्च प्रतिपादनमप्यपेक्षितम् । कथं धर्मपरम्परातथ्यानि निरूपणीयानि कथं च तानि तत्त्वानि विवेचनीयानीति बहुशो विचारितमाधुनिकतुलनात्मकधर्मविद्याविद्भिः परम्परावादिभिश्चाचार्यैः ।

मनीषिभिस्तु भारतीयैर्देशान्तरीयैश्च दृष्टः सम्प्रदायभेदेष्वपि सनातनः सार्वभौमश्च धर्मः प्राचीनैः ।

धर्माणां तर्कातीतम् अद्वैतम्, सम्प्रदायभेदाश्च

गुह्यः सनातनो धर्मो वेद्यः प्रत्यात्ममेव यः ।
जनतानुग्रहार्थं स आगमेषु प्रकाश्यते ॥ २ ॥
तत्तदुपाध्यवच्छेदाद् वासनादिप्रभेदतः ।
सम्प्रदायात्मना धर्मास्तस्मादेव विजज्ञिरे ॥ ३ ॥
स्वीयाद्वैतमतिक्रामि विस्मृत्येव प्रवर्तिताः ।
नानाप्रकल्पितैः शास्त्रैः सत्यवार्धेः प्लवैरिव ॥ ४ ॥

एवञ्च सम्प्रदायात्मना प्रवर्तमानो धर्मो नैकभूमिषु सन्निविष्टः, सनातनपदे प्रतिभामात्रगोचरो व्यक्तश्च वैखरीभूमौ नानात्वभागागमरूपेण । आगमा अपि नानादेशकालेषु नानाभाषाः समाश्रित्य नानारुचिवासनाधिकारभिन्नेषु जनेषु प्राकाश्यं लभन्ते । आगमवचनानि च भिन्नाशयानि क्वचिद् नेयार्थानि दुःसमाधेयानि च विषयीकृत्य परिष्कर्तुं न्यायाविष्कृतसङ्गत्या च व्यवस्थापयितुं यतन्ते शास्त्राणि । आगमे समानेऽपि भिद्यन्ते शास्त्रीयाणि प्रस्थानानि किमुत भिन्नेष्वागमेषु । विवदन्ते चैवं प्रस्थानानि प्रतिसम्प्रदायं सम्प्रदायभेदेन च ।

ननु भिन्ना एव धर्मसम्प्रदायाः स्फुटं विलक्षणानि च दर्शनप्रस्थानानि, तत्राभेददिदृक्षा तु काञ्चनमृगान्वेषणमिवेति चेत्, न, सर्वेष्वेव धर्मेषु नैकैर्मनीषिभिर्मार्गाणां व्याख्यानां च लक्ष्ये अद्वैतमुद्घोषितम् । तथा च ऋक्संहितायाः प्रथममण्डले अस्यवामीये सूक्ते ऋषिर्दीर्घतमा अविद्यातमांसीव विधमन्तीम् ऋचं काञ्चिदपश्यत्, तद्यथा–

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् ।
एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥
(ऋ. १।१६४।४६)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बहुधा उद्धृता इयं श्रुतिस्तथापि प्रहेलिकेव प्रतिभासमाना तिष्ठति यथा नातिस्फुटा दिव्याकृतिः काचिद् अन्विष्यमाणा अन्तरान्तरा तडिदिव स्मितदीप्ता चकास्याद् रहस्यध्वान्तोपगूढा च स्वपरिज्ञानाय उपनिमन्त्रयेत च । अत्र अद्वैते स्पष्टं निरूपितेऽपि नैके प्रश्ना विचारशीले चेतसि उद्यन्ति, तद्यथा–वाक्येऽस्मिन् विशेष्यभूतं सत् कथमवधार्यम्, कथं सदसद्विभागलक्षणं कर्तव्यम् । एवञ्च किमेकानेकविभाजकम्, विप्राः किं वैदिका एवाभिप्रेताः, वदनं च तेषां किं यादृच्छिकं वचनम्, न्यायसम्मतो वादः, अर्थवाद एव वा। के च श्रोतारोऽभीष्टा यानुद्दिश्य विप्रा वदन्ति । का च भाषा तैः प्रयुज्यते, किं वैदिकी एव भाषा अभिप्रेता । कथं चाभिधेयाकारा अभिधानप्रकारैः सम्बद्धाः । सङ्क्षेपेण–

सत्तत्त्वं किं कथं कार्यमेकानेकविभाजनम् ।
के विप्रा वदनं किं वा प्रकाराः के का वागपि ॥ ५ ॥

ननु कथमस्यामृचि एतावन्तः प्रश्नाः समुत्थाप्यन्ते स्पष्टार्थत्त्वादस्याः । नाना वैदिका देवाः परमार्थतो न भिन्नाः, तेषां नामान्येव भिन्नानीत्येवानया प्रतिपाद्यते । नेयमृक् सर्वधर्मविषया नापि दार्शनिकमीमांसोत्थापनमस्याः प्रयोजनम् । इति चेद् नैतादृशी व्याख्या सम्यग्विचारं विना स्वीकारमर्हति । किमत्र इन्द्रादय उपलक्षणत्वेन नोक्ताः, किम् अल्ला–यीशु–आदयो देवा नास्मिन् सति निवेशनीयाः । विप्राः किं नान्यत्र देशेषु सम्प्रदायेषु वा लभ्याः । वस्तुतस्तु, यथा परस्ताद् विवेचयिष्यते, एक एव सनातनो गुह्यश्चागमः सर्वानित्यागमानां मूलभूतः । स एव नानागमेषु यत्र तत्र प्रतिबिम्बितः सर्वधर्माभेदं व्यञ्जयति । नानागमानां पारमार्थिकत्वं तु न निष्पर्यायं भवितुमर्हति निष्पर्यायपरमार्थस्य देशनातिक्रान्तत्वात्[11] । तस्मादेव गगनशिखरात् पतिता आपो नानासानुषु प्रवणेषु च जनयन्ति नानास्रोतांसि तथैव धर्मस्रोतांस्यपि अतिक्रामिमूलसंलग्नानि व्यक्तं प्रवहन्ति भेदेन ।

इदं च स्मर्तव्यं यत् सायणाचार्यैरस्या ऋचो व्याख्याने देवानामेकत्वं तात्त्विकम्, अनेकव्यपदेशयोग्यत्वं च तेषां कर्माधिकारभेदेन गुणभेदेन वा निरूपितम् । तदित्थम्– "अमुमादित्यमैश्वर्यविशिष्टमिन्द्रमाहुः । अथोऽपि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चायमादित्यो दिवि भवः सुपर्णः सुपतनो गरुत्मान् गरणवान् पक्षवान् वा । एतन्नामको यः पक्ष्यस्ति सोऽप्ययमेव । कथमेकस्य नानात्वमित्युच्यते । अमुमादित्यमेकमेव वस्तुतः सन्तं विप्रा मेधाविनो देवतातत्त्वविदो बहुधा वदन्ति । तत्तत्कार्यकरणेनेन्द्राद्यात्मानं वक्ष्यन्ति । एकैव सा महानात्मा देवता स सूर्य इत्याचक्षत इत्युक्तत्वात् । किञ्च, तमेव वृष्ट्यादिकारणं वैद्युताग्निं यमं नियन्तारं मातरिश्वानम् अन्तरिक्षे श्वसन्तं वायुमाहुः । सूर्यस्य ब्रह्मणोऽनन्यत्वेन सर्वात्म्यमुक्तं भवति" । अत्र आदित्यपरत्वेनाप्युपक्रम्य ब्रह्मपरत्वमस्या ऋचो भाष्यकारेण दर्शितम् । वस्तुतो दिव्यः सुपर्णो गरुत्मानिति तु आदित्यमेव लक्षयति, न पक्षिणं कञ्चित्, तथा चादित्योऽपि उद्देश्यभूतस्य ब्रह्मणो नानानामसु अन्यतमः ।

इदमप्यवधेयं यद् अस्या ऋचः पूर्ववर्तिनी ऋग् वाक्चतुष्टयवादमुल्लिखति, तद्यथा–

चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता पदानि नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥

अत्र व्यक्ताया मानववाचः अपर्याप्तत्वं सूचितम्[12] । न सा गुहाहितं सत्यं सम्यक् पूर्णतया वाभिधातुं समर्था नाना च मानवीया भाषा भिद्यमाना अपि समानं बौद्धम् अर्थम् आत्मापरोक्षं वार्थं प्रकाशयितुं यतन्ते सङ्केतभेदात्तु तेन संवादस्थाने विवाद एव कोलाहलायते । तथा च भगवता बुद्धेन उदानसंगृहीते प्रथमनानातीर्थिकसूत्रे हस्तिनमदृष्ट्वा स्पर्शसाहाय्येनैव तं वर्णयतां जात्यन्धानामौपम्येन निर्दिष्टम्–

"इमेसु किर सज्जन्ति एके समणब्राह्मणा ।
विग्गय्ह नं विवदन्ति जना एकंगदस्सिनो[13] ॥"

तुलनीयानि च बुद्धवचनानि अष्टकवर्गीयाणि– "एकंहि सच्चं न दुतियमत्थि", "न हेव सच्चानि बहूनि लोके", "तक्कं च दिट्ठीसु पकप्पायत्वा सच्चं मुसाति द्वय धम्मम्माहु" इत्यादीनि[14] ।

विकल्पात्मिका वैखरीवाग् विभज्यैव विषयान् निरूपयति, न सा समग्रदर्शिनी, तदाग्रहाच्च प्रवर्तत एकान्तवादः, ततश्च विवादो विग्रहश्च[15] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनेन सूच्यते अद्वयं सत्यं प्रज्ञागोचरम्, न वाचा सम्यक् प्रतिपाद्यम् । अयमेवाशयो दीर्घतमसोऽपीति शक्यते वक्तुम् ।

अत्र नवीनाः पाश्चात्या व्याख्याकृतः प्रत्यवतिष्ठन्ते, सायणीयं भाष्यम् अद्वैतवादप्रभावितम्, तथा च अर्थनिर्वचनेऽत्र कालविपर्यासजन्या भ्रान्तिरुदाहृता । वैदिका ऋषयः प्राचीनकाले बभूवुः सर्वथा चानभिज्ञाः परवर्तिदार्शनिकमतानाम्, नानादेवांस्ते अस्तुवन् अयजंश्च । देवास्ते नाना नामरूप-कर्मभिर्भिन्ना एव । यावद् देवानां सामान्यधर्मा ज्योतिर्मयत्व-विभूतिमत्व–शुभत्वादयोऽवबुद्धा ऋषिभिस्ते सजातीयतया दृष्टाः । यथा कस्यचिद् राष्ट्रस्य निवासिनो राष्ट्रान्तरेषु नृपान् स्वनृपसदृशान् पश्येयुः । स्तुत्यर्थं च स्वनृपमेव एकं नृपं प्रधानताख्यापनार्थं वदेयुः । तथैवात्रापि स्वेष्टदेवस्य स्तुतिः, अर्थवादश्च कल्पनीयः । न वैदिकैः ऋषिभिर्देवबहुत्वोत्तीर्णं सजातीयभेदरहितम् एकं देवतत्त्वम् अवबुद्धम् । तथा च प्राचीनसामीयदेशेषु नाना जना नाना देवान् अभजन्, स्वराष्ट्रविजये च स्वदेवमपि विजयिनम् अन्यांश्च देवान् पराजितान् मेनिरे, पराजितांश्च देवान् बहुधा परास्य तत्स्थाने स्वदेवं प्रतिष्ठापयामासुः । तेनापि यद् देवाद्वैतं स्थापितं न तत्र पारमार्थिकी अद्वयेश्वरबुद्धिः कल्पयितुं शक्या । भारते तु नानाजातयो गणाश्च न तथा तीव्रे परस्परोपघातिनि संघर्षे निरता अभूवन् यथा प्राचीनसामीयदेशेषु । अतश्च भारते नानाजातीयः समवायः सङ्करश्च द्वावपि जायमानौ विचारक्षेत्रेऽपि सदृशं समवायं सङ्करं च जनयामासतुः । जातयो देवा मतानि सम्प्रदायाश्च नाना असमाहिता एव व्यवस्थापिताः । यथा अनया प्रक्रियया नैकं राष्ट्रीयतासूत्रं रचितं तथैव विचारक्षेत्रे युक्तिसहं दार्शनिकैकवाक्यतासूत्रमपि न रचितम् । या च सनातनागमकथा उल्लिखिता तत्र नैतिहासिकं प्रमाणं किञ्चिदुपलभ्यते । नाना आगमा नानाजातिषु नानासम्प्रदायमूलभूता इतिहाससाक्ष्यगोचरा भवन्ति, न तु कश्चिदेकः सनातनश्च आगम इति चेत्, वस्तुतस्तु सर्वेषु धर्मेष्वेक एव आगमः परमार्थतः स्वीक्रियते वेदो वा स्याद् यीशुसन्देशो वा स्यात् कुरानो वा स्यात्, न वैदिकाः क्रिस्तीया मुहम्मदीया वा स्वागमातिरिक्तं कमप्यागमं प्रतिपादयन्ति । शाश्वतो दिव्यो वा आगम एक एवेति सर्वे मन्यन्ते,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ममत्वाभिनिवेशेन च स्वमेवागमं पारमार्थिकम् अभ्युपगच्छन्ति । कौशेय-कोशेष्विव वेष्टितानि नानासम्प्रदायशास्त्राणि भारते देशान्तरेषु च नाद्यापि विवादपदाद् उन्मग्नानि, या च तुलनात्मिका पद्धतिर्नवीनैरभ्युपगता सापि नाद्यावधि सामीयधर्माणां स्वोत्कर्षाग्रहपङ्काद् उन्मग्ना । तथापि स्थूणा-निखननन्यायेन सनातनधर्मसम्मतं मूलाद्वैतं प्रतिष्ठापनीयम्, तुलनात्मक-पद्धतिसमालोचनेन च सम्प्रदायसंवादः प्रवर्तनीयः ।

साम्प्रदायिकभेदेभ्यः संवादाभिमुखी प्रवृत्तिस्तद्भेदाश्च

प्राचीनसम्प्रदायेषु दृष्टं नान्यत्र गौरवम् ।
शास्त्रार्थकटुता दृष्टा तेष्वसमग्रदर्शिषु ॥ ६ ॥
संशयाज्जनमुक्तेश्च तुलनान्नीतितस्तथा ।
संवाददर्शनात् साध्या विश्वधर्मैकनीडता ॥ ७ ॥
वैज्ञानिकदृशा वा स्यादितिहासदृशाथवा ।
दर्शनालोचनेनापि त्रिधा धर्मानुशीलनम् ॥ ८ ॥

प्राचीनाः सर्वदेशेषु प्रत्यपद्यन्त यदादिमो मानवः कृतयुगाख्ये स्वर्णयुगाख्ये वा निर्दोषे युगे न्यवसत् । तथा चानुश्रूयते–

"न राज्यं नैव राजासीद् न दण्डो न च दाण्डिकः ।
धर्मेणैव प्रजाः सर्वा रक्षन्ति स्म परस्परम् ॥"[16]

यथा भारते तथैव यवनचीनादिषु देशान्तरेष्वपि प्रचलितम् आद्या मानवजातिः सदाचारपरा सहजेनैव ज्ञानेन चिरन्तनार्षपरम्परायातम् अन्ववर्तत धर्मम् इति । धर्मोऽयम् अक्षुण्णा रीतिः, अविज्ञातमूलः समयः, आर्षोपदेशो गणादेशोऽपि सममेवेत्यभजद् वैश्वरूप्यमिव । तथा च प्रसिद्धैर्विधिवेत्तृभिः 'हेनरी मेन' इत्याख्यैर्नियमः प्रत्यपादि–"रूढिरेव विकासक्रमेण विधिरूपेण व्यवर्ततेति"[17] । मतमिदं तु राजनियोगमेव पारमार्थिकं विधिमभ्युपगम्य प्रवर्तितमिति नादरणीयम् अस्माकम्, तथापि प्राचीनगणजातिषु अविभक्तकार्यसंस्थासु आचार-व्यवहारनियामको धर्माऽ-प्यविभक्तरूपविशेषः सामान्यप्रेरणात्मक एवाभूदिति विज्ञायते ततः । स तु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न प्राकृताज्ञाननिबन्धनः प्रत्युत आर्षोपदेशनिबन्धनः प्रतिपत्तव्य इति तु प्राचीनमतानुसारेण । ननु आर्षोपदेशनिबन्धनः प्राचीनधर्मश्चेद् नाना-जातिषु समानेनैव तेन भाव्यमासीत्, न तु तथेति चेत्, न, धर्मोपदेशस्य देश–काल–पात्रादिसापेक्षत्वाद् युक्त एव तद्भेदः । यावद् जातीयसंस्कृतयो भिन्नलक्षणाः, तावद् धर्मोऽपि नाभिन्नलक्षणो भवितुमर्हति । ननु आदिमा मानवा अधर्मेणैव हिंसापरेण किं नावर्तन्त यथा मात्स्यन्यायोपपादकाः प्राचीनाः कौटल्यादयो नवीनाश्च हौब्सादयः प्रतिपादयन्तीति चेत्, न, तादृशमतस्य विरुद्धतथ्योपलब्धेः सत्प्रतिपक्षितत्वात् । वस्तुतस्तु आदिमानव इति मानवस्वभावस्यैवोपलक्षणम्, यतो हि नेतिहासगवेषणायां क्वचिदपि आदिरुपलभ्यते । मानवस्वभावविषये द्वे इमे धारणे एकान्तवादिभिः प्रयोजनविशेषं धर्मतन्त्रपोषणात्मकं राजतन्त्रपोषणात्मकं वाधिकृत्य चिरात् प्रवर्तिते मानवो धर्मपरायणोऽधर्मपरायणो वेति । द्वावप्यन्तौ परिवर्ज्य धर्माधर्मात्मकत्वं मानवस्वभावस्य स्वीकार्यमित्येव युक्तं प्रतिभाति[18] । तदेव च देवासुरकल्पनायामप्यभिव्यक्तम्[19] । तत्र यतो मूलाद् धर्मः प्रभवति तेषु आर्षोपदेशः प्राधान्यं भजतीति निर्विवादम् ।

किंस्वरूपश्चायमादिमो धर्मोऽभूत् ? प्रायेण विधिप्रधान इति विज्ञायते प्राचीनेतिहासाद् अधुनाप्यनुवर्तमानगणजातिवीक्षणेन च । विधिश्चायं प्रवर्तयति मनुजान् संस्कारेषु बलिप्रदानेषु यज्ञानुष्ठानेषु नानादेवताप्रसाद-कोपासनासु तथा नियमयत्याचारव्यवहारान् । तत्त्वोपदेशपक्षश्चास्य धर्मस्य प्रायेण आख्यानैर्गीतिभिर्वा प्राकाश्यत । पाश्चात्येष्वेतानि आख्यानानि प्राचीनकाले रहस्याख्यानानि व्यपदिश्यन्ते स्म, अद्यत्वे तु मिथ्या-ख्यानान्येव[20] ।

आदिमयुगे प्रविभक्तास्वपि जातिषु सङ्करस्तासु अनियतं प्रावर्तत एव । सभ्यतोदये प्राथमिकसाम्राज्यकाले पृथक् पृथगेव धर्मप्राणाः संस्कृतयः प्रादुर्बभूवुः स्वस्वविशेषं च सोद्योगमरक्षन् । एकतो यद्यपि शिल्पोपकरणेषु, विलाससाधनेषु, शस्त्रास्त्रेषु परस्परसम्पर्काद् अन्योन्यभावनं प्रवृत्तम्, तथापि अपरतो भाषासंस्काराविनाभाविनो भावाः परत्र दुःसम्प्रेष्या एव स्थिताः, तथा च नानाधर्मपरम्परासु विचारभूमिकसिद्धान्तनिष्ठाः सांस्कारिका-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नुष्ठाननिष्ठाश्च परस्परमसम्पृक्ता इवाभूवन् । एवं च प्राचीनकाले संस्कृतिभेदानुविधायिनो लक्ष्यन्ते धर्मप्रविभागा अपि । सौगतं शासनं प्रथमतो जातीयं राष्ट्रियं च सीमाबन्धनं भित्त्वा देशान्तरेषु शान्तिपूर्वमेव प्रसादकानां प्रयत्नात् प्रसारमलभत तत्तद्भाषास्वीकारेण उपासकानां कृते च शीलविधानं विवर्ज्य तत्तत्समाजविधानस्वीकारेण च । क्रिस्तीय-शासनमपि तथैव भुवि प्रासरत्, न तु शान्त्या न वा संस्कृत्यन्तरस्वीकारेण । मुहम्मदीयधर्मः अरबसाम्राज्यसमकालमेव विजययशःपताकेव सर्वत्रा-स्थाप्यत । एते त्रयो धर्मा नानाजातिषु संस्कृतिषु च प्रसारं लभमाना अपि सिद्धान्तदृष्ट्या आचारोपासनादिदृष्ट्या वा स्वस्ववैशिष्ट्यं तत्तत्संस्कृतिषु न व्यलापयन्त । तेषां शास्त्राणि स्वस्वसम्प्रदायमूलत्वेन स्थितानि ।

इदमत्रावधेयम् । सम्प्रदायरचना त्रिभूमिका लक्ष्यते । तत्रागमः प्रथमा भूमिका आधारभूता । आगमाशयं लक्षणैः परिच्छेत्तुं प्रवृत्तानि शास्त्राणि यत्र श्रद्धायाः प्रज्ञायाश्च समागमः, शास्त्रार्थ-समर्थन-परिष्कार-परीक्षा-दिना च प्रवर्तन्ते तदनुषङ्गीणि दर्शनानि । परिच्छेदाश्चैते सपरिष्काराः सम्प्रदायवैशिष्ट्यं निर्धारयन्ति । इदमप्यवधेयं यत् संस्कृतेर्गभीरतमां दृष्टिमुन्मीलयन्नपि आगमः स्वतन्त्रतया प्रवर्तते, शास्त्रं पुनरागमानुसारितया न स्वतन्त्रम् । एवञ्च संस्कृतिरागमः शास्त्राणि च सदर्शनानि त्रिवृतमिव रचयन्ति कोशं धर्मसम्प्रदायानाम् । विशेषतस्तु शास्त्राणि स्वरपरम्परा-रचितजालनद्धाक्षाणीव लक्ष्यन्ते । अतश्च धर्मसम्प्रदायाः शास्त्रैर्विभक्ताः परस्परमनवबुध्यमानास्तिष्ठन्ति । पारम्पर्यगौरवाक्रान्तेषु व्यतीतयुगेषु बहुश्रुता अपि शास्त्रिणः प्रायेण अधिचिक्षिपुः परान्, अहिंसन्नपि तान् । तथा च स्कौलेष्टिकदर्शनाभिज्ञा अपि मध्यकालिककैथलिकसंघाधि-कारिणः सावोनरोलं ब्रूनो–गौलिलीयौ च स्वतन्त्रविचारकौ यातनासु न्यपातयन् । अल्बेरुनीत्याख्यो विश्वविश्रुतो मुस्लिमपण्डितः क्रिस्ताब्दानामे-कादशे शतके भारतमियाय भारतीयशास्त्राणि चाधीत्यापि न तेषु तात्त्विकं किमप्यधिजगाम । अन्येऽपि मुहम्मदीया विद्वांसो मध्ययुगे स्वधर्म–प्रभुत्वविस्तारकाले परधर्मान् अधर्मानेव निरयगामिनो व्यजिज्ञपन् । तथा चाधुनिके काले पाश्चात्या ईशपुत्रीया नानाभारतादिदेशान् विजित्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्तद्देशीयान् क्रिस्तधर्मे बलवदपि प्रवेशयितुकामाः स्वेतरधर्मान् भूयसा निनिन्दुः । भारतेऽपि समानसंस्कृतिमध्येऽपि शास्त्रिणां साम्प्रदायिको द्वेषः शास्त्रार्थविचारेषु दृश्यत एव । तथा कुमारिलेन चैत्यवन्दनादिर्न धर्म इत्युद्घोषितम्, भगवत्पादैः प्रद्वेषः सम्भावितो भगवतो बुद्धस्य प्रजासु, धर्मकीर्तिना वेदप्रामाण्यवादो मूढबुद्धिलक्षणमित्यध्यवसितम्[21] । तथापि एतादृशः परमतव्युदासः पण्डितवाद एव, न धर्मानुयायिनां हार्दिको द्वेषः । नापि धर्मवैलक्षण्यकारणेन परहिंसा प्रायेणानुमता भारते कांश्चिदपवादान् विहाय[22] । हिंसाभावेऽपि शास्त्रेषु सम्प्रदायबाह्यशास्त्राणाम् अनवबोधः प्रायेण स्थित एव यथा वैदिकेषु बौद्धानां यथा वा माध्वेषु अद्वैतिनाम् ।

यद्यपि स्वस्वधर्मैकान्तनिष्ठाः स्वस्वसम्प्रदायासक्तबुद्धय आगमानुसारिणः शास्त्रिणो बाह्येषु शास्त्रेषु न निरभिनिवेशया तत्त्वजिज्ञासया प्रवृत्ताः, तथापि पूर्वोक्ततत्तद्धर्मविस्तारकाले नानाधर्मसम्प्रदायानां सम्पर्कवशात् सञ्जातमेव अन्योन्यभावनम् अंशतः । तथा च पूर्व-एशिया-क्षेत्रे विस्तारमाप्नुवतः सौगतधर्मस्य नूतनाः कतिपये जैनप्रभृतिसम्प्रदाया उदपद्यन्त[23] । एवञ्च मोहम्मदीयधर्मस्य विस्तारकाले बौद्ध–यवन–हीब्रू–आदिधर्माणां तस्मिन् प्रभावो विश्लेषितो विद्वद्भिः[24] । क्रिस्तधर्मेऽपि हीब्रू–मित्र–धर्मयोर्यवनदर्शनस्य च प्रभावो विदित एव[25] । अद्वैतवेदान्ते गौडपादीये महायानप्रभावः प्रतिपादितो नैकैर्विद्वद्भिः[26] । तथा च भक्तिदर्शनेषु मोहम्मदीयः प्रभावो मध्यकाले प्रत्यपादि[27] । किन्तु एतादृशेषु परस्परप्रभावेषु सत्स्वपि प्रायेण नैते सम्प्रदायास्तान् स्वीकुर्वन्ति । यत्र स्वीकुर्वन्ति तत्रापि स्वविचारोपादानतयैव तद् निरूपयन्ति ।

एवञ्च नानाधर्मेषु काले काले सम्पर्कमायातेष्वपि न तेनैव तेषां स्वेतरेषु दृष्टिपरिवर्तनविशेषः समजनि । अकबरसमकालिको बदायूनी हिन्दून् भूरिशो निनिन्द किन्तु तत्समकालिक एव अबुलफज्लः स्वतन्त्रदृष्टेरकबरस्य प्रभावात् तेषु बहूनपश्यद्गुणान् । तेन सिद्ध्यति न हि परसम्पर्कमात्रेण धर्मः प्रभावग्रहणे समर्थो भवति, अपि तु उदारचेतोवृत्तीनां परस्परसम्पर्कात् । तथा च योरोपे क्रिस्त्रीयाष्टादशशतके प्रबोधनाख्यैतिहासिकप्रवृत्तेः प्रभावान्नूतना आदर्शा दृष्टयश्च प्रथमतो योरोपीयानन्ततश्च

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वदेशेष्वपि जनान् भावयामासुः[28] । आगमेषु तदनुसारिशास्त्रेषु धर्ममात्रे च तर्ककटुः संशयो दार्शनिकैर्वैज्ञानिकैश्च प्रकाशितः[29] । यथेष्टं च धर्मग्रहणे धर्मत्यागे च जनानां स्वातन्त्र्यं तेषां स्वातन्त्र्याधिकारेऽनुमतम्[30] । राज्यस्यापि धर्माद् धर्मसंघाच्च स्वातन्त्र्यं चिरकालिकयुद्धानन्तरं स्वीकृतम्[31] । तेन धर्मनेतॄणां संघाधिकारिणां शास्त्रिणां च राज्यव्यवहारे शिक्षाप्रबन्धे स्वसम्प्रदायनियमने च एकाधिकारोऽपहस्तितः, प्रथमतः पाश्चात्त्यदेशेषु । शनकैश्चान्यत्रापि तदर्थं क्रियते प्रयासः सुमतिभिः । बलवत्स्वमतस्थापनाद् निवारितास्तार्किकैर्वैज्ञानिकैश्च दूषिता धर्मशास्त्रिणः स्वसम्प्रदायमण्डनार्थं स्वतन्त्रतर्कमुपादातुं प्रचक्रमिरे । ततश्च शर्मण्यदेशीयज्ञानपरमार्थवादिदर्शनमाश्रित्य नवीनैव धर्मविज्ञानसरणिः प्रादुर्भूता[32] । अपरतश्च प्रत्यक्षवादमाश्रित्य डार्विनीयं च विकासवादं प्रतिपद्य संस्कृतीनां धर्माणां च मूलावस्थान्वेषणं विकासक्रमान्वेषणं च प्रारब्धम्[33] । अयं चोद्भवस्तुलनात्मकधर्मविज्ञानस्य येन जर्जरिताः प्राक्तनाः श्रद्धाप्राकाराः ।

स्मरणीयमत्र 'मैथ्यू आर्नल्ड' इत्याख्यस्य विद्योतमानकीर्तेराङ्ग्लकवेः प्रसिद्धं काव्यम्–डोवरवेलाख्यम् । ततः पद्यमेकं मयानूदितं श्रूयताम् –

"पूर्वं श्रद्धासमुद्रः परिगतधरणिर्मेखलेवोज्ज्वलासीद्
अद्यत्वे लोकतोऽसौ व्यपसरति ततो नीरसा भूतटान्ताः ।
यत्रास्तीर्णा विवर्णा गतजलवसनाः शर्करास्तत्र चास्य
दीर्घः कारुण्यरावः श्रुतिपथविषयो नैशवाते विलोपी ॥

. . . . . .

आश्वासो नैव लभ्यः क्वचिदपि भुवने वर्धमाने तमिस्रे
युध्यन्ते तत्र सेना जनितकलकला मोहराज्येऽविवेकाः"[34] ॥

श्रद्धा अद्यत्वे ह्रासमुपैति वेलेव सिन्धोः, विरोधिनश्च कलहायमाना नैशान्धकारे युध्यमानाः सेना इव ।

अज्ञानसंघर्षं चेममपाकर्तुं प्रवृत्तं नवीनं धर्मविज्ञानं यद् रेलिगियोन्सगेशिस्ते इति नाम्ना प्रायेण प्रसिद्धं यच्चाङ्ग्लभाषया 'कम्पैरेटिव रिलिजन' इत्याख्यया व्यपदिष्टम् । बहुशाखमिदं विज्ञानम् । तथा–

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वैज्ञानिकदृशा वा स्याद् इतिहासदृशाथवा ।
दर्शनालोचनेनापि त्रिधा धर्मानुशीलनम् ॥ ९ ॥

एकास्य शाखा मोक्षमूलरप्रवर्तिता तुलनात्मकभाषाशास्त्रेण निकट-सम्बद्धा, अपरा नानासमाजशास्त्रेष्वन्तर्भूता विशेषेण नृतत्त्वविद्यायां समाज-शास्त्रे मनोविज्ञानशास्त्रे च । पुनश्च धर्मेतिहासः सर्वासु धर्मानुशीलन-शाखासु प्राधान्यमिदानीं भजति । धर्मतत्त्वान्वीक्षा तु दर्शनशास्त्रेषु नवीनधर्मविज्ञाने (थियालजी इत्याख्ये) चान्तर्भूता । इदमपि स्मरणीयं यद् मोक्षमूलरीयं तुलनात्मकधर्मानुशीलनं विगतशताब्द्या अन्तिमे चरणे लब्ध-प्रसरं प्रायेण पञ्चाशता वर्षैर्ह्रासमगमत् । तत्स्थाने च धर्मेतिहास एवेदानीम् अभिषिक्तः ।

एवञ्च साम्प्रतिके काले नवीनमिव युगं धर्मतत्त्वावबुभुत्सायाः शनैः शनैराविर्भवत्संलक्ष्यते । नानागमेषु शास्त्रेषु च प्रचरत्सु न कश्चिदिदानीं स्वागमपादोपसङ्ग्रहणेनैव कृतार्थः स्यात् । सर्वेष्वपि धर्मसम्प्रदायेषु अद्यत्वे सन्त्येव विपश्चितो ये स्वधर्मे निष्ठावन्तोऽपि परधर्मेषु तत्त्वप्रतिपत्तिं सम्भावयन्ति[35] । पुनश्च तार्किकसमीक्षां निराचिकीर्षुभिर्धर्मशास्त्रिभिः धर्मतत्त्वमेव प्रमाणयितुमिच्छद्भिरन्यैरपि स्वपरयूथ्यैः सन्धिरभीष्टः । धर्म-तत्त्वे हि प्रतिष्ठिते तद्विषये धर्मशास्त्रीया विवादा अपि लभेरन् प्रति-ष्ठाम् । पक्षान्तरे च भ्रान्तिमात्रं चेद् धर्मो मूलतः, सर्वा एव धर्मशाखा अपि भ्रान्ता निपतेयुः । अतश्च धर्मतत्त्वजिज्ञासाया एव इदानीं प्राधान्य-मास्तिकानां नास्तिकानां च । धर्मदर्शनं च प्राचीनशास्त्रपरम्परोत्सङ्गं विहाय ऐतिहासिकं वैज्ञानिकं च धर्मनिरूपणं तुलनात्मकं समालोच्य नवावतारं गृह्णाति ।

मोक्षमूलराचार्याः प्राचीनार्यभाषायां तन्निबद्धवाङ्मयस्य तत्र व्यक्त-धर्मसंस्कृतीनां च अध्ययनाध्यापनप्रचारणेषु निरता यावज्जीवं महनीयां सारस्वतसाधनां चक्रुः । सुविदितमेव यत्ते सायणभाष्यसहिताया ऋग्वेद-संहितायाः प्रकाशनम् अंशतश्चानुवादं विधाय भगीरथायमाणा विलुप्त-प्रायां वेदसरस्वतीमवतारयामासुः । अन्येषामपि एशिया-महाद्वीपीय-धर्मा-गमानामनुवादा नानाविद्वत्कारितास्तैः 'सेक्रेड् बुक्स ऑव द ईस्ट' (प्राच्य-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

देशीय-पवित्र-ग्रन्थावली) इति नाम्ना प्राकाश्यं नीताः । प्राचीनार्यभाषासु देवानां नामाख्यानादिविचारणया आर्यधर्मस्य मूलस्वरूपं तैर्निर्णेतव्यं मतम् । एतेन नानागमानां देवाख्यानतुलनया तद्वाचकशब्दानां च निर्वचनेन प्राचीनार्यधर्मस्य मूलस्वरूपविषये मोक्षमूलराचार्यैराविष्कृताः सिद्धान्ता इत्थं संक्षिप्य प्रतिपादयितुं शक्याः । आदिमो मानवः प्रकृतेर्भाषाया वा स्वरूपं न सम्यग् बुबुधे । सूर्यादीन् प्रकृतेर्विभूतिमद्रूपाणि विलोक्य स तेषु, इन्द्रियातीतस्य कस्यापि भावस्य उदात्तस्य च अव्यक्तमाभासमुपलभमानस्तत्र देवत्वं कल्पयामास । परोक्षतत्त्वाभासे वस्तुतो धर्माधारभूतेऽपि तत्स्वरूप-मनवबुध्य आदिममानवः प्राकृतपिण्डाभिन्नान् देवान् मेने । तद्वर्णने या रूपकालङ्कृता भाषा प्रयुक्ता कविभिः, तयाऽपि स विमोहितश्चैतन्यारोपं पारमार्थिकं व्यवस्यति स्म । एवञ्च यथाकथञ्चिद् लब्धोऽपि देवताभासो भाषाव्यामोहेन देवानाम् असदेव रूपचरित्रादिकल्पनया मिथ्याप्रत्ययः सञ्जातः । सर्वासु च देवकल्पनासु प्राचीनार्यजातेः सौराख्यानकल्पनमेव मुख्यमित्यपि मोक्षमूलरः प्रत्यपिपादयिषत् ।

तुलनात्मकभाषाशास्त्रे शब्दरूपाणां निष्पत्तिः ऐतिहासिकविकास-प्रक्रियाङ्गत्वेन अवबोध्या आसीत्, तथा चार्यजातेर्मूलेतिहासस्तद्धर्मविकास-क्रमश्च शब्दविकासतुलनया रेखाङ्कनसन्निभो न्यरूप्यत । तिस्रोऽवस्था-स्तत्र निदर्शिताः । भारोपीयाख्यायां प्रथमावस्थायां प्रमुखा देवा अभूवन् द्यौः, वरुणः, अग्निः, सूर्यः, अन्ये च येषां नामानि तुलनीयरूपेषु भारती-यार्यभाषासु योरोपीयार्यभाषासु च प्राचीनतमे भाषास्तरे उपलभ्यन्ते । द्वितीयावस्थायां भारतीयेरानीयेति संज्ञितायाम् इन्द्र-मित्र-सोमादयो देवाः प्रादुर्भूता इत्यनुमीयते । तृतीयावस्थायां तु भारतीयायां वेदेषूपलभ्यमाना विशिष्टा देवा विष्णुरुद्रादयो लक्ष्यन्ते । इदं तु स्मर्तव्यं यत्तिसृणा-मप्यवस्थानां देवा वेदेषु उपास्यमाना उपलभ्यन्ते । तत्र केचिद् ज्या-यांसोऽन्ये कनीयांसस्तदुद्भव-विकासदृशेत्येव तेषु भेदः ।

यद्यपि सायणभाष्यं मोक्षमूलराचार्यैः सपरिश्रममधीतं प्रकाशितं च तथापि तन्मते सविशेषोपकारित्वेऽपि सायणस्य, कथं वेदा न व्याख्यातव्या इत्येतदेव सायणादवगन्तव्यम् । तिरस्कारश्चायमन्यैरपि मोक्षमूलरदिशा पर्यटद्भिः पाश्चात्यैर्विद्वद्भिः प्रायेणोरीकृतः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र हेतुस्तु मुख्यतया तेषां भारतीयपरम्परागतदेवतादिविषयावधारणेषु मिथ्यात्वप्रतिपत्तिरेव । आत्मनो दृष्टिमांग्रहशून्यां वैज्ञानिकानुसन्धानोचितां विख्यापयन्तोऽपि ते वस्तुतः स्वकीयनिष्ठाविषयं क्रिस्तधर्ममेव प्रमाणीकुर्वन्ति । तथापि एकान्तनिष्ठां स्वचिरन्तनपरम्परागतामुदारीकुर्वन्तस्ते क्रिस्तात्प्राक्तनानपि धर्मांल्लेशतः सत्यप्रतिष्ठान् स्वीचक्रुः । अवधेयं यद् रोमंटिसिज्म् इत्याख्यस्य लिबरलिज्म इत्याख्यस्य च वादस्य प्रभावस्तेष्वराजत् । श्लायरमाखर इत्याख्यो धर्मशास्त्री धर्मस्य मूलं मानवचेतसि प्रत्यपादयत्[36] । अतीन्द्रियभासः स्वपारतन्त्र्यप्रतीतिश्च धर्ममूलभूतां चेतोवृत्तिं विशेषयतः । क्रिस्तधर्मबाह्यास्तु धर्मानुभूतिविशिष्टा अपि तद्विषयं न सम्यगवबुध्यन्ते यीशुवचनाप्रतिपत्तेः । तथा च विश्वविश्रुतैर्हेगलाचार्यैरपि स्वकीयदर्शनस्य द्वन्द्वात्मकादर्शवादाख्ययाभिलक्षितस्य अङ्गभूते धर्मदर्शने नानाधर्माणां विकासक्रमेण क्रिस्तधर्म एव पर्यवसानमिति प्रतिपादयाञ्चक्रे[37] । हेगलीयदर्शने प्राक्सिद्धप्रत्ययाः सदादयोऽपूर्णपरिच्छित्तिवशाद् विचारोन्मीलितस्वान्तर्गतविरोधाः स्वात्मानं स्वतःपूर्णतरप्रत्ययेषु समर्पयन्तः सोपानमिव रचयन्ति तार्किकं तत्त्वप्रतिपत्तीनाम्[38] । विशुद्धतत्त्वप्रतिपत्तीनां कालिकेतिवृत्तस्य चास्मिन् दर्शने समान एव क्रमः प्रतिपादितः[39] । तेन इतिहासे पूर्वपूर्वतरधर्माः स्वोत्तरोत्तरधर्मेभ्योऽविकसिततरा इति निगमनीयम् । श्लायरमाखरहेगलयोर्दार्शनिकप्रतिपत्तिषु भेदे सत्यपि उभौ धर्मेषु विकासित्वमाक्रिस्तधर्मात् प्रतिपन्नौ । एतादृशमेव मतं मोक्षमूलरीयतुलनात्मकधर्ममीमांसायामपि लक्षयितुं शक्यम् ।

एवञ्च विज्ञानमिति विख्यापितेऽपि मोक्षमूलरप्रवर्तिते धर्मपरिशीलने अभ्युपगतो लक्ष्यते कश्चिद् दृष्टिविशेषो यन्मूलं शर्मण्यदेशीये उदारधर्मशास्त्रे (लिबरल थियालजीत्याख्ये) हेगलीये च बुद्ध्यनुसारिधर्मदर्शने । आर्यजातीयमूलान्वेषणप्रवृत्तिस्तत्र हर्डरादिदृष्टान्ततरोमान्सवादनिबन्धनेति सम्भाव्यते[40] । यच्चास्य तुलनात्मकविज्ञानस्य नातिचिरेण ह्रासः समजनि तत्रास्य धर्मोत्कर्षापकर्षसिद्धान्तस्य इतिहासनिरूपणेनैव गतार्थत्वाभ्युपगमोऽपि हेतुः[41] । प्रायेण धर्मशास्त्रिणोऽस्मिन् सिद्धान्ते ईशप्रकाशिता-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गमस्यातर्क्यापूर्वत्वस्यावमानमेवापश्यन् । प्रथम-वैरिकनसंगीतौ पोपमहानुभावैः सकलकैथलिकधर्मसंघाधिपतिभिर्विकासवादः प्रबलतया खण्डितः[42] । असन्दिग्धोऽपि क्रिस्तीयमतेन क्रिस्तधर्मोत्कर्षो न विकासवादेन साध्यः ।

पुनश्च पक्षान्तरे समानरूपाणां तुलनात्मकाध्ययनं तदीयेतिहासपर्यालोचनया विना न सम्भवति, इतिहासेनैव हि तत्तद्रूपस्य अर्थवत्त्वसन्दर्भाः सांस्कृतिका ज्ञायन्ते[43] । इतिहासोऽपि पुनः प्राचीनकालिकः पुरातत्त्वविद्यया विना न प्रवर्तते[44] । एवमितिहास–पुरातत्त्वविद्याभ्यामुपबृंहिता एव पुरातनाभिलेखाः स्वार्थं सम्यगुन्मीलयन्ति, प्राचीनभाषाणां धर्माणां वा साहित्योपलब्धानि रूपाणि इतिहासविच्छिन्नानि तुलयित्वा न तेषाम् अर्थप्रयोजनाभिसम्बन्धाः प्रतिवेध्याः । उदाहरणान्यत्र कतिपयानि प्रस्तूयन्ते । क्रीटद्वीपीयोत्खननेन तथा माइकेलवेन्द्रिसकृत–लिनियर–बी–लिपिरहस्योद्घाटनेन प्राचीनयवनसभ्यतोदयकालस्येतिहासो नवीनेनैव प्रकाशेनोद्भासितः, तेन ज्ञातो विपुलांशो यवनभाषाशब्दानां देवकथानां च यवनेतरसभ्यताया अधमर्णः । एवमेव सिन्धुसभ्यताविष्कारो भारते मोक्षमूलरादिभिर्न कदाचित् सम्भावितः । इदानीं तु आर्यजातिकल्पनैव एकेषां मतेन न युक्तितुलां युक्तमारोहति[45] । नित्यप्रवर्धमानेनैतिहासिकज्ञानेन प्राचीनधर्मविषये मोक्षमूलरादिमतानि बहुशोऽप्रामाण्यं प्रापितानि । रूपकानवबोधाद्देवकल्पना प्रादुर्भूतेति नार्हति कस्यचिदपि श्रद्धाम् । रूपकादिविवेचनं निरुक्ते समुपलभ्यते, देवानां पुरुषापुरुषविश्त्वमुद्दिश्य एकानेकत्वविषये च तत्र विमर्शः सुविदित एव[46] । देवताविषये वेदान्तसूत्रेष्वपि तत्त्वविचारः प्राप्यते[47] । दयानन्दस्वामि–श्रीम्दरविन्दादिनवीनाचार्यैरपि वैदिकदेवतास्वरूपं समालोचितम्[48] । एतादृशानि प्राचीननवीनपरीक्षकाणां मतान्यालोच्य मोक्षमूलरीयमतानि देवविषयाणि बालिशविजल्पितानीव प्रतिभान्ति । तत्र मुख्यो हेतुर्मोक्षमूलरादीनां क्रिस्तधर्मधृतश्रद्धानां तदितरप्राचीनधर्मेष्वश्रद्धैव ।

अपरा धारा तुलनात्मकधर्ममीमांसायाः समाजविज्ञानाङ्गतया विकसता । तत्प्रवर्तकाः सर्वेष्वेव धर्मेषु विगतश्रद्धाः प्रत्यक्षवादि-दर्शनानुयायिनोऽभवन् । प्रत्यक्षवादोऽयं 'पाजिटिविज्म' इति संज्ञितः क्रिस्तीयाष्टादशशतकादारभ्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उपरञ्जयत्याधुनिकं दर्शनं मूलतश्च धर्मविरोधिदिशा तत्प्रवर्तयति । जीवेश्वर-पाप-पुण्य-स्वर्ग-निरयादि-पदार्थाः सर्वधर्मपरम्परासु प्रसिद्धा धर्मशास्त्रेषु विचार्यन्ते । (न च बौद्ध–जैनसम्प्रदाययोः ईश्वरो नाभ्युपगम्यते बौद्धे तु जीवोऽपीति वक्तव्यम्, तत्रापि संसारिणो, देवानां, कारुणिकस्य सर्वज्ञस्य च परमपुरुषस्य स्वीकारात् ।) धर्मशास्त्रीयाः पदार्थाः पुनरतीन्द्रियाः । स्वस्वागममेव तज्ज्ञानं धर्मशास्त्रिणः साधनं मन्यन्ते, आगमानुसारितया च तान् निरूपयन्ति । अतश्च धर्मशास्त्रानुरोधीनि दर्शनानि प्रमाणेषु मौलिभूतमागमं स्वीकुर्वन्ति, तत्साहाय्यार्थं च नानायुक्तीरनुमानाश्रिता अवतारयन्ति[49] । एवञ्च धर्मशास्त्रीयदर्शनेषु प्रयुक्तोऽनुकूलतर्क एकतं आगमं समर्थयति अपरतश्च न्यायाविरोधितामप्यस्य स्थापयति । इत्थमनेकधर्मपरम्परानुषङ्गिदर्शनेष्वनुकूलतर्को धार्मिकीं श्रद्धां न्यायबुद्धया सङ्गमयितुं प्रयतते तद्यथा आस्तिकेषु भारतीयदर्शनेषु क्रिस्तधर्मे वा स्कोलेस्टिकदर्शने । एतादृशेषु प्रयत्नेषु शास्त्राचार्यैर्वस्तुसतामर्थानां परोक्षापरोक्षविभागं विधाय आगमः कारुणिकसर्वज्ञवचनतयाऽवसीयमानोऽपरोक्षार्थप्रकाशकत्वेन निर्धार्यते । तद्यथा क्रिस्तधर्मे आगम ईश्वरस्यैव गृहीतमानवरूपस्य वचनमिति श्रद्धाय ईश्वरस्यास्तित्वसाधने पुनः बहून्यनुमानानि उपन्यस्तानि[50] । वैदिके धर्मे वेदः स्वयमेव नित्यज्ञानमयः ऋषिदृष्टः अथवा ईश्वरवचनमेव[51] । बौद्धजैनधर्मयोः सर्वज्ञवचनमेवागमोऽभ्युपगम्यते, सर्वज्ञत्वसाधने च युक्तिविन्यासो विधीयते[52] । बहुष्वपि प्रश्नेषु धर्मशास्त्रीयपदार्थविषयेषु विचारणार्हेषु द्वयं तत्र शेषानतिशेते– आगमप्रामाण्यम्, ईश्वरप्रामाण्यं च । ईश्वरवादिदर्शनेषु ईश्वरप्रामाण्यमेव मुख्यं तदधीनतयागमस्य, नास्तिकधर्मदर्शनेषु तु आगमप्रामाण्यमेव ।

यदि ज्ञानं सर्वथैव ऐन्द्रियप्रत्यक्षमूलं क्वाशातीन्द्रियार्थानामीश्वरादीनां प्रामाणिकत्वावधारणस्य परोक्षत्वादेव तज्ज्ञानस्यासम्भवात् । अयमेव प्रत्यक्षमात्रवादः, धर्मविरोधिदर्शनानां मूलभूतः । भारतीयपरम्परायां तु लोकायतिका एव एतादृशं वादं प्रतिपन्नास्त्रयीमध्यात्मविद्यां च प्रत्याचख्युः[53]। अन्ये दार्शनिका अनुमानं स्वतन्त्रं प्रमाणं स्वीकुर्वाणा अपि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रायेण प्रत्यक्षं साक्षात्कारात्मकम् अनैन्द्रियमपि स्वीचक्रुः[54] । मीमांसका मनुष्यस्यातीन्द्रियं ज्ञानं प्रत्याचक्षाणा अपि आगमम् अपौरुषेयं नित्यम् अतीन्द्रियज्ञानप्रकाशकं मेनिरे[55] । अतीन्द्रियं ज्ञानं प्रातिभाद् नित्याच्छब्दाद् ईश्वरवचनाद् वा भवतीति यथायोग्यं भारतीयसम्प्रदायाः स्वीचक्रिरे[56] । तेन प्रत्यक्षवादबुद्धिवादयोर्विवादो न तेषु तथा संलक्ष्यते यथा पाश्चात्त्येषु । तेषु प्राचीनकाले यवनाचार्येषु नासीदेवागमो नापि तत्प्रामाण्यचर्चा. देवाख्यानानि पुराणानि कविकल्पितानीति तिरस्कृतानि दार्शनिकैः, देहात्म-सम्बन्ध आकार्याकारकतया कल्पितस्तथा चेन्द्रियाणां देहनिश्रिततया अवि-शदज्ञानहेतुतया चानाश्वास्यत्वम्, बुद्धिमात्रगोचरत्वं चातीन्द्रियसतः, अपुरुष-विधता तात्त्विकमस्तित्वं चेश्वरस्य प्रत्यपाद्यन्त[57] ।

मध्यकाले आगमतर्कयोः समन्वयोऽसकृत् प्रतिपादितः । आगमेन दिव्यं सत्यं प्रतिपाद्यते । तर्केण ऐन्द्रियप्रत्यक्षसमनन्तरव्यापारवता सामान्यानि व्यावृत्त्या गृह्यन्ते तथा च मानवमर्यादाम् अनतिक्रम्य तत्त्व-प्रतिपत्तिः, एवम् मानवीयबुद्धिजन्यं ज्ञानम् ईश्वरीयज्ञानम् आगमप्रकाश्यम् अप्राप्य अपि न तद् विरुद्धं भवति कदाचित्[58] । शीलविधिः आध्यात्मिकं तत्त्वम् अतीन्द्रियाः पदार्थाश्च न्यायेन आगमिकेनैव विनिर्णेयाः । तर्कबुद्धिस्तत्र व्यावृत्तिनिबन्धनं सामान्याकारमेव ज्ञानं लब्धुं शक्नोति ।

आधुनिके युगे तत्त्वविचारकैः आगमप्रामाण्यं सर्वथैव त्यक्तम् । मानवीयग्रन्थसारूप्याद् आगमोऽपि मानवीयकृतिरेव । तस्य ईश्वर-रचितत्वप्रतिपत्तिः अन्धश्रद्धानिबन्धना एव । ज्ञानस्य पुनः द्वे एव साधने– ऐन्द्रियं प्रत्यक्षम्, बुद्धिव्यापारश्च तर्कानुमानादिः । देहातिरिक्तस्य चित्त-व्यतिरिक्तस्य वात्मनः प्रमाणाभावाद् अस्वीकारेण, लौकिकस्यैव मानवस्य तृप्तेः पुमर्थतया अभ्युपगमाच्च दर्शनम् अतीन्द्रियपरलोकादिविच्छिन्नं मानवीयं लौकिकं च सम्पन्नम् । तथापि आधुनिकविचारकेषु प्रत्यक्ष-वाद-बुद्धिवादयोर्विवादो विशेषेण समजनि । बुद्धिवादिभिरीश्वरास्तित्व-प्रतिपत्तावथ आचारविषये समाजव्यवस्थाविषये राजनीत्यां च स्वतन्त्र-बुद्धिरेव प्रमाणीकृता । ईश्वरोऽपि तैर्निर्गुणब्रह्मवद् मानवाकार-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वभावादिरहित एव परिकल्पितो मानवात्मनोऽपूर्णत्वबोधात् तत्प्रतियोगितया तथा परिच्छिन्नपरतन्त्रस्वभावस्य जगतो मूलत्वेनाक्षिप्तस्वभावः[59] । एवं स्कौलोस्टिकाचार्यैः साधितो मध्यकालिकः सन्धिरागमतर्कबुद्ध्योराधुनिके काले भग्नः, तर्कबुद्धिश्च धर्मशास्त्रीयशिविरं विहाय स्वातन्त्र्यमेव स्वकीयं परलोकविमुखत्वं च उदघोषयत् ।

प्रत्यक्षवादस्ततोऽपि दूरतरमुत्सारितवान् धार्मिकीमास्थाम् । आङ्ग्लदार्शनिकचूडामणिः ह्यूममहाशयः प्रत्यक्षवादं तथा व्याख्यातवान् यथा लौकिकं ज्ञानं सम्भावनात्मकं तत्तद्विद्यात्मकमध्यात्मविद्यात्मकं तु नितान्तं सांशयिकमेव प्रतीतम् । तन्मतेन यत्किञ्चिदस्मार्भिज्ञायते तस्य सर्वस्य द्वे एव मूले नीलपीतशीतोष्णाद्युपलम्भ ऐन्द्रियः, तद्विमर्शश्च[60] । एवञ्च प्रतिभासात्मकानि विकल्पात्मकानि च विज्ञानानि रचयन्ति मानवीयानुभवम् । तत्र ऐन्द्रियसंवेदनोपानीता एव विषया विमृश्यन्ते विकल्प्यन्ते च । अगृहीतमपि यद्यध्यवसीयते भ्रान्त एव सोऽध्यवसायः स्यात् । एतेन द्रव्यं कार्यकारणभावसम्बन्ध आत्मा चेति सर्व एवत्र विकल्पाः प्रत्यक्ष ग्राह्यमतिक्रामन्ति, ततश्चाप्रामाणिका मन्तव्याः । गुणेषूपलभ्यमानेषु द्रव्यत्वारोपः, पूर्वापरीभूतेषु वृत्तेषु कार्य-कारण-सम्बन्धकल्पना, प्रत्ययप्रवाहे च तदतिरिक्तात्मविकल्पो मानाभावे सन्देहास्पदमेव । मानस्य प्रत्यक्षोपलब्धिरूपत्वात् । अनुमानं विकल्पानामन्तःसम्बन्धवशात्प्रवर्तमानं विकल्पमूलभूतप्रतिभासगृहीताकारान् नातिशेते । एतादृश्या ज्ञानमीमांसया अदृष्टाः शास्त्रीयपदार्थाः सर्व एव सन्दिग्धा भवन्ति । अस्मिन्प्रत्यक्षवादे विधेर्मूलमपि ज्ञानं न भवितुमर्हति तस्य तटस्थत्वात्, नैसर्गिकी प्रवृत्ती रागद्वेषात्मिकैव विषयाभिमुखं विषयविमुखं वा प्रेरयते जनम् । कर्मणां दृष्टफलज्ञानं प्रवृत्तिनिर्दिष्टविषयेषु साफल्यार्थमेवोपयोगि, न तत् प्रवृत्तिं मूलतो निषेधितुं शक्नोति । तथा चाचारनीतिः समाजव्यवस्था राजनीतिश्च दृष्टसुखोपायतयैव निर्धार्या बुद्धिमद्भिः, न धर्मशास्त्रपर्यालोचनया ।

ह्यूमप्रवर्तितः प्रत्यक्षवादस्ततः प्रभृति अद्यावधि पाश्चात्यान् विचारकान् प्रबलतया प्रेरयति । तत्प्रतिपादितः संशयः परोक्षविषयेषु तदुत्तरवर्तिभिर्निषेध एव परिणामितः । तेषां मतेन यत्प्रत्यक्षोपलम्भयोग्यं नास्ति, तदसत्, तद्वचनमप्यनर्थकम्[61] । अदृष्टे मानाभावाद् जीवेश्वर-पाप-पुण्य-परलोका-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दिषु प्रतिषिद्धेषु धर्मस्वरूपं संवरणमात्रे लोकव्यवहारनीतिविशेष एव पर्यवस्यति[62] । एतया दृष्ट्या समाजविज्ञानविधासु धर्माणां तुलनापूर्वकं निरूपणं नानादिग्भिः प्रवर्तते । समाजविज्ञानप्रवर्तकः कौंतनामाचार्यो मानवबुद्धिम् अवस्थात्रयेण विवर्तिनीमाह । प्रथमावस्थायामनभिज्ञो मानवः प्राकृतिकपदार्थानां गतिपरिवर्तनादि विलोक्य तद्धेतुतया देवान् कल्पयामास । एषावस्था धर्मशास्त्रीया यस्यां नानाधर्मेषु यथेष्टं विविधा देवाः कल्पिताः । द्वितीयावस्थायां सामान्यतत्त्वानि विकल्पितानि तत्त्वमीमांसकैर्दार्शनिकैः । तथा च प्रत्यक्षानियतत्वात् कल्पनाया अनेकांशैर्निरंकुशत्वाच्च नानान्योन्यविरुद्धास्तत्त्वव्यवस्था मीमांसिताः । तृतीयावस्था वैज्ञानिकी अभिधेया प्रामाणिकज्ञानान्वेषणरूपा यस्यां तत्त्वानुमानं प्रत्यक्षनिदर्शनीयं भवति[63] ।

धर्मशास्त्राणि धर्मदर्शनानि चातीत्य प्रवर्तते धर्मतत्त्वविज्ञानं तुलनात्मकम् । मोक्षमूलरीयं तुलनात्मकं ज्ञानं भाषाशास्त्रं वाङ्मयं च मुख्यत उपादाय प्रवृत्तम्, इदं च समाजशास्त्रीयं तुलनात्मकं धर्मविज्ञानं नानादिमसमाजानां जातीयधर्मान् व्यवहाररूपान् प्रत्यक्षं पर्यालोच्य प्रवृत्तम् । प्रत्यक्षयोग्यव्यवहारेणैव धर्मोऽपि परिभाषितः । ननु कथं धार्मिको व्यवहारस्तदितरव्यवहारेभ्यो विवेचनीयश्चेद् अदृष्टकल्पनामूलकानुष्ठानपरिवर्जनादिलक्षणलक्षितो धार्मिको व्यवहार इत्यवधेयम् । टाइलरप्रभृतिभिः संस्कृत्यङ्गभूत एव धर्मो निर्धारितः, संस्कृतिश्च तत्तदवस्थजातीयसमुदायानाम् आचार-विचार-समुदाचारसंहितारूपेण व्याख्याता[64] । एवं धर्मोऽपरिष्कृतमतीनामविकासावस्थानामादिमजातीनामेव लक्षणम् । टाइलरेण धर्ममूलभूतायै जीवकल्पनायै एनिमिज्म इत्याख्या दत्ता । स्वप्नेषु भ्रमे वा मृतान् बन्धून् आलोक्य अविवेकी मानवो देहातिरिक्तं जीवं कल्पयामास । तथा चाचेतनेषु तरु-वात-सूर्यादिषु गतिमत्तां विलोक्य तत्रापि चेतनान् पुरुषान् देवाख्यान् विभावयामास । मैरेटमहाशयेन ऐनिमिज्मस्थाने ऐनिमैटिज्म इत्याख्यो वादः पुरस्कृतः[65] । न चेतना अचेतनेष्वधिष्ठातारः प्रत्युत तदभिन्ना एव कल्पिता अभूवन्निति तस्याशयः । फ्रेजरमहोदयैः सुविदिते बृहद्ग्रन्थे स्वर्णशाखाख्ये धर्मानुष्ठानानि तदनु-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

षङ्गितया च देवादिकल्पनं मिथ्येन्द्रजालान्नातिरिच्यन्ते स्मेति विभावितम्[66] । एवञ्च यथा यथा विज्ञानस्य समुन्नतिर्जायते तथा तथा धर्माख्यम् इन्द्रजालवद् अपयाति मत्यावरणं नीहार इव सूर्योदये ।

"धारणाद् धर्म इत्याहुः" इति यदुक्तं धर्मलक्षणं तदत्र नृतत्त्वविद्याविचार्ये जातीयान्वितिलक्षणायाः संस्कृतेरभिन्नत्वेन परिलक्षिते धर्मे सम्यगेव घटते । किञ्च तत्सूत्रं येन जातीयसमुदायो दृढं समन्वेति, तदेव तु विचारणीयम् । पूर्वोक्तलक्षणो धर्मः सत्यनिष्ठाधृतसंस्कारनिबन्धनां व्यवस्थामाह । नृतत्त्वविदां मतेन जातीयनिष्ठा विज्ञानाज्ञानाभ्यां शबलायते । अदृष्टकल्पना तत्र अज्ञानाङ्गमेव । केचिद् धर्मनिष्ठां जातीयान्वितिसहायकं तत् प्रतिबिम्बमेव वा मेनिरे । तद्यथा दुर्कहाइम–आचार्यः समाजं दृष्टतथ्यरचनां मन्यमानः पवित्रापवित्रविवेकमुपाश्रित्य प्रवृत्तनिष्ठाविशेषप्रयोजितं संघं धर्मं लक्षयामास ईश्वरं प्रति श्रद्धां च वस्तुतः समाजं प्रत्येव व्याचख्यौ । "न गणदेवो गणादन्यः" इति ब्रुवता तेन धर्मस्य गणसंहतिकारित्वं मुख्यं कार्यमिति प्रत्यपादि[67] । अन्ये समाजसन्धानसूत्रं निगूढसंस्कारोपस्थापितमबोधपूर्वमपि भाषानियामकं व्याकरणमिवावधारयन्ति । तन्मतेन धर्मस्तत्तज्जातीयसंस्कारानुकूलवर्जनाभिः परिव्यूतः[68] । सर्वेष्वेतेषु मतेषु संस्कारानुष्ठानोत्सवादिप्रत्यक्षीकरणेन धर्मस्य अन्तःप्रयोजनं सामाजिकभूमिका च स्पष्टीभवति, नान्यत् किमपि तत्र सारमाध्यात्मिकं पारलौकिकं वा ।

एतादृशं नृतत्त्वविज्ञानं धर्मं सर्वथा वार्तमानिकं प्रत्यक्षपर्यवेक्षणयोग्यं नियतविकासावस्थं चावधारयत् तस्य अनियतेतिहासपरम्परारूपतां नितान्तमुपेक्षते, इतिहासश्चातीतरूपः शब्दचिह्नादिगम्यार्थरूपो वा न प्रत्यक्षयोग्यः । तथा च केवलया बाह्यप्रत्यक्षपरया दृष्ट्या व्यवहाररूपोऽपि धर्मो न पर्यालोचयितुं शक्यः[69], व्यवहारस्यापि समीहाप्रयुक्तत्वात् समीहायाश्च मानसप्रत्यक्षविषयत्वात् । परव्यवहारज्ञानं परस्य प्रयोजनं भावं वा अज्ञात्वा कथं सम्यगालोचनपथमियात्[70] । न च प्रतिभागिप्रत्यक्षादिति वक्तव्यम्, तत्र हि पर्यवेक्षकः स्वविषयेण एकीभवन् जहात्येव बाह्यं तटस्थं च प्रत्यक्षम्[71] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अस्मादेव कारणात् वैबरादिभिः सुविख्यातैर्विपश्चिद्भिः समाजविज्ञानमितिहासपुरस्सरतयावधारितम् । नानापुरुषार्थगवेषणासु धर्मैषणाऽप्यन्यतमा इतरसंश्लिष्टा च । आचारपरैर्विधिनिषेधैः संस्कारैरनुष्ठानैः संस्थाभिश्च धर्मकलेवरं मुख्यतया निष्पद्यते । इदमेव धर्मस्य व्यवहारात्मकं रूपम् ऐतिहासिकत्वाच्चास्य प्रतिसम्प्रदायं भेदानुगतं सामान्यं रूपमवधारणीयं तुलनार्थं रूपैः सम्प्रदायान्तरीयैः । विकल्पनेनावधारितं प्रातिमानिकं निदर्शनम् अनिवार्यतयापेक्ष्यते नानापरम्परागतानां संस्थानां तुलनार्थम्[72] । एतादृशी चावधारणात्मिका प्रणाली ऐतिहासिकीं तुलनात्मिकां चोभे पद्धती संजिगमयिषति । भिद्यते चेयमतो विशुद्धतुलनात्मिकायाः पद्धतेर्यथा फेनोमेनोलेजिकीयपद्धतेः, तथा च सामान्यतत्त्वम् ऐतिहासिकार्थेष्वस्वीकुर्वत्याः पद्धत्या ऐतिहासिक्याः[73] । प्रायेण तु कालक्रमेण विवर्तमानस्यार्थस्य मध्यमानमिव निदर्शनं विकल्प्यैव तुलना सम्भवति । तुलनायाः सर्वथाभावे तु कस्यचिदपि देशकालविशिष्टार्थस्य भिन्नदेशकालावस्थितेन एकवाक्यतया निरूपणीयत्वमेव न सम्भवति । अन्यथा श्रौत-स्मार्त-वैष्णवार्यसमाज-ब्रह्मसमाजादिप्रभेदेषु कथं हिन्दूधर्म इति व्यपदेशः प्रयुज्येत, कथं वा क्रिस्तोपासकानां यह्वोपासकानां वा नानानिकायविप्रकीर्णासु परम्परासु एकान्वयः तुलना वा विधीयेत । तस्यामेव हि परम्परायां स एव शब्दोऽर्थान्तरं व्रजति, नानापरम्परासु नानापि शब्दाः सदृशार्थवाचका लक्ष्यन्ते । एवञ्च भेदपरम्परासु प्रयोजनापेक्षया भेदाग्रहपूर्वकं सामान्यकल्पनं विचारे अपरिहार्यमेव, यच्च विचारमात्रे अपरिहार्यं तत् सुतरां नानासमाजसंस्कृतिधर्मादीनां तुलनात्मके विचारे अपरिहार्यं स्यात् । तथापि नैतद् विस्मर्तव्यं यद् "आदर्शनिदर्शनानि" (आइडियल टाइप्स) भिन्नभिन्नाभ्योऽनुभूतिभूमिभ्यो विरूढानीति ।

मैक्सवैबर-मतेन मानवप्रवृत्तिप्रकारेषु द्वौ मूर्धन्यभूतौ—परम्पराप्रयोजितः, तर्कसङ्गत-स्वहितेप्साप्रयोजितश्च । तयोरादिमो धर्मव्यवहारे प्रमुखतया लक्ष्यमाणः प्राचीनेषु समाजेषु प्राधान्यमभजत्, अपरस्तु अर्थव्यवहारे प्रमुखो नव्यसमाजेषु च । तथा चानयोः प्रवृत्त्योः सम्बन्धा धर्मेतिहासस्य मुख्यविषयतयालोच्याः । धर्मस्याध्यात्मिकः पक्षश्चेत् लोके

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

समानचित्तताविशेषणत्वेनैव गृह्यते, न प्रत्यात्मवेद्यलोकोत्तरार्थत्वेन, तर्हि तस्य महत्त्वाकलनमर्थप्रधानलौकिकाभ्युदयप्रदानेनैव कर्तुं शक्यम्, तथा च संन्यास–तपः–सन्तोषादि–गुणानुपदिशन् धर्मो हिन्दूधर्मवन्नार्थचर्यां प्रोत्साहयति, काल्विनप्रवर्तितः सम्प्रदायस्तु संयमपूर्वकं कर्मयोगं शिक्षयन् धनसञ्चयमुद्योगवृद्धिं च प्रेरयति[74] ।

हिन्दुधर्मं वर्णजातिव्यवस्थालक्षणं विमृशन् मैक्सवैबरपण्डितोऽवोचत्, नात्र नैतिकनियमानां सहजं निरपेक्षत्वं दृष्टम्, प्रत्युत तत्तत्सन्दर्भसापेक्षतैव तेषां व्यवस्थापिता, सार्वभौममानवीयाधिकारकर्तव्यानामुपेक्षापूर्वकं तत्र तत्तन्मर्यादासङ्कीर्णा एवाचारनियमाः प्रदिष्टाः । जात्यवच्छिन्नत्वं धर्मस्य प्रतिहन्ति तस्य विश्वजन्यत्वम्[75] ।

अर्थचर्याया धर्मोदयव्ययहेतुत्वं भूयोऽपि प्रतिपादितं कार्लमार्क्साचार्यैः । दुर्कहाइम–वैबराचार्याभ्यां धर्मस्य कार्यकारणभावनियतसामाजिकतथ्यान्तर्भावोऽर्थचर्यामहत्त्वं च यत्प्रत्यपादि तन्मार्क्साचार्येण परां कोटिमनायि । हेगलीयविज्ञानवादं शीर्षासनं कारयित्वा मार्क्सेन नवीनो भौतिकवादः प्रतिष्ठापितः । स च वादस्तेन चिरन्तनाद् भौतिकवादाद् यान्त्रिक इति दत्ताख्याद् द्वन्द्वात्मक इति विशेषितः । भौतिकमेव मूलतत्त्वं स्वान्तःसङ्घर्षात् परिणमते, अपूर्वाणि च धत्ते रूपाणि । यथा विचारपद्धतौ तथैव मानवेतिवृत्तेऽपि स्वान्तर्विरोधवशात् समाजो विवर्ततेऽर्थतन्त्र- प्रतिष्ठः । धर्मादयस्तु समाजसंस्थायाः परतन्त्रभागीयाः । अर्थव्यवस्थामनुसृत्य समाजरचना युगाद्युगं क्रान्तिं याति तथा च चिन्तनधारा धार्मिकी व्यवस्था च तत्समवेता पुष्यति प्रभुशक्तिविशिष्टं वर्गं मिथ्याचेतनां च । मानवः प्रविधेरुपयोगकौशलेन अर्थोत्पादकेन च श्रमेण जीवति, धर्मस्तस्य काल्पनिकमेव सुखमुपनामयन् पातयति तं भ्रमावर्ते[76] ।

मार्क्सीयदर्शनं स्वात्मानं वैज्ञानिकं दर्शनं समाजविज्ञानमितिहासविज्ञानमित्याद्याभिराख्याभिराचष्टे । मूलतस्तु तदितिहासदर्शनमेव । भौतिकवादीनि चार्वाकादीनि दर्शनानि धार्मिकास्थाविषयान् बहुधा मृषा व्यवहारमात्रं च धर्मं प्रतिपद्यमानानि तत्र स्वार्थकुहकमेव पुरोधसां तदुपजीव्यानां च नरपतीनां सामन्तानां धनिकानां चापश्यन्[77] । न च तानि नियतेन क्रमेण विज्ञानप्रविधिसमाश्रितार्थतन्त्रपरतन्त्रेण वर्गसङ्घर्ष-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्रान्तिलक्षणेन समाजं विवर्तयन्तं न्यायं चावैषम्यलक्षणं स्वर्गमिव पृथिव्यामनागतेऽवतारयिष्यन्तमितिहासं कल्पयामासुर्यथा मार्क्सवादिनः । कथमचेतनभूतविवर्तो मानवं सृजति, कथं च परतन्त्रसमाजपरिवर्तनानि सुखोदर्काणि भावीनीति दुर्विज्ञेयम् । मानवस्य स्वातन्त्र्यं स्वपारतन्त्र्यपरिज्ञानादेव सम्भवतीति मार्क्सीयं मतम् । बुद्धिसहायश्च मानवः स्वभावचरितार्थतामन्विष्यन् विज्ञानपरिष्कृतया श्रमशक्त्या वर्गशक्त्या चाज्ञानेन अन्यायेन अभावैश्च युद्ध्यमानो राज्यशक्तिं भूयोभूयोऽन्यायकृद्भ्य आच्छिन्दन् इतिहासक्रमेण सिद्धिमाप्स्यतीति मार्क्सवादाभिप्रेतम् । नात्रेतिहासे काले वा काचिददृष्टशक्तिः कल्पिता ।

इदमवधेयं यदस्मिन् मते नेतिवृत्तं धर्मतत्त्वस्यागन्तुकम्, येन तद् धर्मदर्शनेनोपेक्ष्यं स्यात्, प्रत्युतान्तरङ्गमेव तद्धर्मस्य । न धर्मः सनातनः कश्चित्पदार्थो नापीश्वरप्रकाशितो मानवबुद्धिप्रसूतत्वात्तस्य । ईश्वराद्यदृष्टार्थाभावाद् दृष्टार्थानां च विज्ञानविषयत्वाद् धर्मस्य वास्तविको विषयो मानव एव । मानवतत्त्वस्य सामाजिकसम्बन्धात्मकत्वं समाजस्य चैतिहासिकत्वं सम्यगजानन् धर्मशास्त्री तन्निरूपणे भ्राम्यति, मानवसम्बन्धानेव अयथार्थं साभिसन्धि च कल्पयित्वा तत्त्वाभासेष्ववतारयति । नात इतिहासस्य सम्यक् परिशीलनेन विना धर्मतत्त्वानामभिप्रायो बोध्यः । तथा च भारतीयधर्मो व्याख्यायते कैश्चिदधुना । स्मरणीयमत्र यद् हेगलो मानवं बुद्धिलक्षणं मन्यमानस्तद्विकासमात्मज्ञानविकासप्रयोजितं प्रत्यपादयत्, न भौतिकप्रविधिप्रयोजितम् । अन्ये पुनर्धर्मबुद्धिमेवेतिहासनियामिकां मन्यन्ते, ईश्वरेच्छां वा धर्मपक्षपातिनीम् । तथा चागस्तिन्-नीबूर-टोयनबी-आदयो भारतीयो वावतारवादः[78] । एतेषु मतेषु न धर्मस्येतिवृत्तेऽन्तर्भावः पत्युत इतिहास एव धर्मेऽन्तर्भवति । आस्तां तावद् धर्मदर्शनापेक्षा दर्शनापेक्षा वेतिहासव्याख्या, न हि सा विवादास्पदतां विहातुं समर्था । वस्तुत एतादृशे व्याख्याने इतिहासो विश्ववृत्तसङ्ग्रहनिरूपणात्मनाऽवधार्यते, न तु तदवधारणं युक्तिसङ्गतं भाति विश्ववृत्तसङ्ग्रहस्यासम्भवादेव, अथ कतिपयवृत्तसङ्ग्रहोऽभिप्रेत इति चेत् कथमुच्चेतव्यानि वृत्तानि विदितानामपि वैपुल्यादसङ्ग्राह्यत्वात् । क्षुद्राणि विहायेति चेत् क्षुद्रमहत्त्वविवेकः सुप-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रीक्षितनिरूपणानन्तरमेव सम्भवति न ततः प्राक् । पुनश्च घटित-तथ्यनिरूपणं साक्ष्यापेक्षं भवति साक्ष्यं मूलतः साक्षिणोऽनुभव एव प्रमाणं न बाह्ये तद्विषये, वृत्तसाक्षिणो हि स्वस्वदृष्ट्या कञ्चिदंशं वृत्तस्य विज्ञाय बहुधा साभिनिवेशाः प्रयोजनविशेषापेक्षयैव स्वोपलब्धिं लेखेन निबध्नन्ति । न तद्विवरणेभ्यः सम्पूर्णं निर्दोषं वा तथ्यमुपलब्धुं शक्यम् । नैकसाक्षि-भिरवगतानां तथ्यानां तटस्थतथ्यत्वमात्रविश्रान्ते विवरणे विश्वासयोग्येऽपि यत्रापि तस्मिन् भावोद्बोधकत्वं श्रद्धाविषयत्वं वा वर्तते तत्र संशयोऽनि-वार्यः । केनचिद् महात्मना सिद्धिः प्रदर्शिता न वेत्यत्र प्रत्यक्षीकरणवादेऽपि साक्षिणां संशयो नापैति तथा च बाह्यकृत्येषु प्रत्यक्षीकृतेष्वपि मनोऽभिप्राया हेतुफलसम्बन्धा वा दुर्लक्ष्या एव तिष्ठन्ति । तथा च प्राचीनलेखेषु विशदवाक्याक्षरेषु सत्स्वपि न तेषामर्था अभिप्राया वा सर्वदा समानरूपेणैव व्याख्याकृद्भिर्बोद्धुं शक्यन्ते ।

अतीताभिलेखानां प्रामाण्यपर्यालोचनया अर्थनिर्वचनाच्च तत्राभिव्यक्त-चित्तस्याभिसम्बोध एव इतिहासस्य सम्यगर्थः, न चित्तबाह्यवृत्तान्तकथा-ख्यानम्, तादृशाख्यानानामसंख्यत्वाद् एकाख्यानस्य चासम्भवात् । एव-मवधारिते इतिहासतत्त्वे धर्मदर्शनपरिशीलनस्य इतिहासपुरस्सरत्वमनि-वार्यमेव । धर्मग्रन्थानां तत्तद्युगीनभाषाविद्धानां देशकाल-पात्रादि-विशेषित-नानासन्दर्भाणां प्रामाण्यमर्थो वा न सूक्ष्मान्वेषणेन विना सम्यगुपलभ्यते । तद्यथा महायानसूत्राणां तथागतरचितत्वं सन्देहं याति ऐतिहासिकपरीक्षणेन वेदानामर्थनिर्णये भाषेतिहासविवेचनमेव दुर्निवारं भाति, प्रभोर्योशोराख्याने सिद्धिचमत्कारप्राचुर्यं केषाञ्चिज्जनानां श्रद्धां जनयत्यन्येषां संशयम्[79] ।

ननु जीवनचरितादिविवेचने सम्प्रदायेतिवृत्तविवेचने ग्रन्थसम्पादने वा पूर्वापरविशेषस्य एतादृशी परीक्षापद्धतिरूपयुज्येत, न तत्त्वालोचने इति चेद् बाढम्, विशुद्धदार्शनिकतत्त्वविवचने तत्कालप्रचलितावस्थानुरोधेन स्थिरी-कृतमर्यादे शास्त्रार्थे तु काममितिहास उपेक्ष्यताम्, स्वकीयपरम्परा-नैरपेक्ष्येण समयमुक्ततया यत्र तत्त्वानि विमृश्यन्ते देशकालविप्रकृष्टा-नामाचार्याणां सम्प्रदायानां वा सिद्धान्ता आलोच्यन्ते तत्र कथं तेषामितिहास उपेक्षाविषयः स्यात् । धर्मदर्शनविचारणे तु तत्तद्धर्मप्रवर्तकचरितानामैति-हासिकत्वमेव प्रथमं विचारमर्हति । किं यीशुः प्रभुर्मृत्योरनन्तरं पुनरुत्थितः,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वासुदेवः कृष्णो वा ऐतिहासिकः पुरुष आसीद् इत्यादिप्रश्ना इतिहास-परीक्षामेवाक्षिपन्ति ।

परमार्थतश्चित्तस्य क्षणिकत्वाद् हेतुप्रत्ययनियतत्वात् सन्तानवर्तित्वात् स्वानुभववासनाविवर्तित्वाद् मौलिकमेव ऐतिहासिकत्वम्, चित्तातिरिक्तेषु विषयेषु तु ऐतिहासिकत्वमौपाधिकमेव[80] । ज्ञानकर्मादीनां चित्तव्यापार-निबन्धनत्वाद् अनुप्रविष्टं तत्र सूक्ष्ममैतिहासिकत्वम् । चित्तनिरपेक्षा अपि चेद् बाह्यार्था अभ्युपगम्यन्ते, न ते यथावत् साक्षाद् ज्ञायन्त इति तदा स्वीकर्तव्यमन्यथा भ्रान्तेरेवाभावात्, न हि तेषां ज्ञानमभ्रान्तमादर्शप्रतिबिम्ब-वद् अन्यथा भ्रान्तेरेव असम्भवात् । बाह्यार्था इन्द्रियविकारेण चित्त-विकल्पनेन च गृहीता अनियतज्ञानविषया एव । तत्त्वानि नित्यानि स्वतन्त्राणि चेत् स्फुटमेव तेषां शब्दाभिधेयं ज्ञानं विकल्पात्मकत्वाद् न नित्यम् । अथवा तत्त्वानि विकल्पा एव स्युः । प्रातिभज्ञानविषयस्तु अभिलाप्यतामतिक्रामति । अदृष्टार्थप्रतिपादकशास्त्राणां प्रामाण्यं तत्प्रवर्तक-पुरुषवैशिष्ट्यनिबन्धनमिति प्रवर्तकचरित्रेतिहासपरीक्षा तत्र प्रामाण्य-परीक्षाङ्गमनिवार्यतयैव । एवञ्च धर्मपरम्परासु ये सिद्धान्ताः परवर्तिनि काले उपलभ्यन्ते तेषां प्रामाण्यं समूलं न वेत्यत्रापि इतिहासान्वेषणमेव निर्णयावहम् । तद्यथा क्रिस्तानुयायिषु त्रिमूर्तिसिद्धान्तो बौद्धेषु वा त्रिकायसिद्धान्तो वैदिकधर्मे संसारवादो वा । तेषां मूलमागमेषु विद्यते न वेति इतिहासपरीक्षयैव निश्चेतव्यम्[81] ।

इतिहासं सर्वथोपेक्ष्य नैके धर्ममीमांसाभेदा इदानीं प्रवृत्तास्तद्यथा-बार्थाचार्यस्य भेदपरकशास्त्रम् 'डायलैक्टिकलथियोलजी', किर्केगार्डप्रभृती-नामस्तित्ववादस्तथा च भातिवादः (फेनोमेनोलाजी) । बार्थाचार्यमतेन धर्मो न संस्कृत्यङ्गभूतः प्रत्युत मानवेश्वरयोः स्वभावमात्रनिष्ठः सम्बन्धः । नास्य ज्ञानम् इतिहासेन ऐतिहासिकेन सम्प्रदायेन वा साध्यते । मानव ईश्वरान्नितान्तभिन्नः । ईश्वरोऽनन्तः । जीवः शून्यस्तुच्छः । स्वात्मनः तुच्छत्वबोधेन मनुष्य ईश्वरं प्रपद्यते । ईश्वरशब्दश्चागमरूपस्तत्कृपाद्वारं येन मनुष्यस्तत्सान्निध्यमनुभवति । एवञ्च ईश्वरवचनमेव मनुष्यस्य स्वेश्वरयो-र्भेदसागरं तरीतुं प्लवः[82] । संवेगश्रद्धातिरेकाभ्यां जायमानया प्रपत्त्या

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वथातिक्राम्यपीश्वरः सन्निकृष्यत इवेत्यत्र तत्त्वम् । ईश्वरमानवयोरात्यन्तिके भेदे कथं तयोः सम्बन्धः सम्भवेदिति त्वनुयोज्यम् ।

अस्तित्ववादो मानवस्य प्राकृतविषयातिरिक्तत्वं मर्त्यत्वं स्वातन्त्र्यबोधं त्रातरीश्वरेऽहेतुकं विश्वासं प्रपत्तिं च पुरस्करोति । न हेतुभिस्तर्कबुद्ध्या वा ईश्वरास्तित्वे विश्वसितुं शक्यम् । तथापि ज्ञानाभावेऽपि स्वतन्त्रसङ्कल्पदार्ढ्येन ईश्वरो मनसा प्राप्यः । स्वास्तित्वबोधप्रयोजितो मनुष्यः स्वातन्त्र्यबलादेव ईश्वरं प्रपद्यते[83] ।

भासमानेषु धर्मेषु तात्त्विकम् आकारं प्रकारान् वा यथार्थं निरूपयितुं भातत्त्वविज्ञानवादिन उद्युञ्जते । इतिहासविदोऽन्ये च तुलनापूर्वकपरीक्षका नानादेशकालविशेषितधर्मप्रकारान् तुलयित्वाधीयते, भातिविज्ञानविदस्तु प्रत्यक्षग्राह्यार्थाकारान् देशकालविशेषेभ्यो व्यावृत्य कोष्ठकीकृत्येति यावत् प्रतिभासप्रकारं तत्त्वमिव साक्षाद्भासमानं पर्यालोचयन्ति । तथा च धर्मतत्त्वमपि गृहीततथ्येभ्यो व्यावृत्त्य यथावद् निरूपयितुम् इच्छन्ति । चित्तमात्रमेते सविषयमवधारयन्ति विषयांश्च चित्तविभक्तान् तात्त्विकस्वरूपनियतान् । यथास्थिततत्त्वप्रतिवेधश्च बुद्धिप्रतिभानेन कार्यः । प्रत्यक्षानुमानाश्रितात् प्रकृतिविज्ञानाद् मूलतो भिन्नमेव देशकालकारणाभिव्यक्तपदार्थानां भातिविज्ञानाविषयत्वात्[84] । प्रत्यक्षपदार्थानां हि नियामकत्वं तेषामाकारमात्रसारे बुद्धिगोचरे तत्त्वे निश्चिन्वन्ति गोलत्रिकोणादीनामिव लक्ष्याणां तत्तल्लक्षणेषु । तथा च मानवास्तित्वप्रयोजितानां भावानां स्वरूपाक्षिप्तविषयाकाराणां भावानां वा चैतन्याक्षिप्तानां तत्प्रतिसंविदितानां च बुद्धिप्रतिभया निरूपणमिच्छन्ति । स्वसत्ताबोधः स्वनिधनाशङ्का उपासनामात्रे उपास्यस्याद्भुतमहिमेत्यादीनां निरूपणेषु स्फुटीभवति प्रतिभाविज्ञानविदां प्रतिभा[85] ।

ननु शास्त्रीयतत्त्वोपदेशास्तथा च आचार-व्यवहार-नियमाश्चेद् धर्मस्य बहिरङ्गतया उपेक्ष्यन्ते अन्तरतमश्च प्रत्यगनुभूतिपक्षस्तस्याभिषज्यते प्रधानपदे धर्ममीमांसा प्रत्यगनुभवमीमांसा सती नातिरिच्येत मनोविज्ञानाद् इति शङ्कायां वक्तव्यम्—मनोविज्ञाननिरूपणानि धर्मतत्त्वमन्तर्भावयन्त्येव तदभिव्यक्त्युपादाने चित्ते यथा पङ्कजं कश्चित् पङ्कमयं ब्रूयात् प्रतिबिम्बं च काचमयम् । भ्रान्तिश्चैषा मनोविज्ञानविद्भिर्बहुशो निदर्शिता । तद्यथा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

फ्रायडाचार्यः प्रैटमहाशयश्च धर्ममूलमन्तर्निगूढप्रतिहतायां कामवासनायाम् एकाग्रभावनाभिभूतमतिव्यामोहे वा निरविन्दताम् । ननु "कामस्तदेकः समवर्तताग्रे मनसो रेतः प्रथमं यदासीदि"ति श्रुत्यापि किं न कामस्य मूलभूतत्वं प्रतिपाद्यत इति चेद् बाढम् अस्त्येव कामो मूलम्, तथापि द्वे दिशौ कामस्य लोके दृश्येते–ऐन्द्रियसुखाभिमुखी, भूमाभिमुखी च । एकया कण्टकाकीर्ण इव मार्गे प्रचरन् क्लिश्यते, अन्यया विशुद्ध्यति स्वरूपानन्दं चोपैति । कामसुखमिति यन्निन्द्यते यच्च प्रशस्यते अकामहतं सात्त्विकं सुखमिति तयोर्भेदे स्फुटेऽपि गभीरः कश्चिदन्वयस्तयोर्निभालनीयः सूक्ष्मदृशा यथा जलप्रणालिकायामेकस्यां निरुद्धायामपरस्यां चेल्लक्ष्यते जलाभिवृद्धिरनुमीयते ततस्तयोर्निगूढः सम्बन्धः । अतश्चोक्तम्–

"विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते" ॥

अत्र हि तेनैव रसेन सर्वोऽपि विषयभोग आसिक्तो दर्शितः । तथा च तैत्तिरीयश्रुतिः अस्यैवानन्दस्य मात्रामित्यादिः[86] । ब्रह्मवित्तमाश्च याज्ञवल्क्यमहर्षयः स्पष्टमेवावोचन्–"आत्मनस्तु कामाय सर्वं प्रियं भवति" इति[87] । फ्रायडमहोदयस्तु कामं स्वच्छन्दं प्रज्ञाविरोधित्वाच्च मर्यादान्धं निरूपयन् कामविशोधनमशक्यममन्यत । तन्मतेन स्ववशे धावन् कामः सन्तृप्येत वा प्रतिहन्येत वा । प्रतिहतश्चासंविदिते चित्तगह्वरे निलीनः स नाना विकारान्, आधिव्याधींश्च जनयति । कदाचिच्च विषयविशेषानाकारितस्य तस्योर्जा सृज्यन्ते काव्यादीनि सङ्केतवर्तीनि । तथा स्वदमनोन्नयनाभ्यां कामो व्याप्नोति धर्मचर्यामिति[88] ।

अत्र कामस्य अप्रतिबोधत्ववादः स्वरूपतो ज्ञानविरोधित्ववादो वा भ्रान्तिकारणम् । ननु कामस्य अज्ञानमूलत्वादज्ञानस्य च तमोरूपत्वात्कथमत्र शास्त्रसम्मत इव सिद्धान्ते भ्रान्तेरारोपः क्रियत इति चेत्, श्रूयताम्–फ्रायडीये मतेऽचेतनभूयिष्ठस्य चेतसः कामनिलयस्य प्रवृत्तिमतः कश्चिदुपरितनश्चेतनो भागः प्राणिनो बाह्यार्थैषणाप्रयुक्तस्य बाह्यार्थानुकूल्यं सम्पादयतः प्रवृत्तिसाफल्यनियमाशयो भवन् बुद्धिरित्याख्यायते सैव च धर्मवृत्तेरप्यधिष्ठानं चेतनस्याहमोऽन्तर्देशिकोऽपि । अनयोश्चाहमिदमोः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धर्मकामवृत्त्योः स्वर्वासिविवरवासिनोर्देवासुरयोरिव प्रवर्तते सततं सङ्घर्षः । नास्मिन्मते आत्मा वा विशुद्धं चैतन्यं वा स्वीक्रियते येन चित्तनिवृत्तौ कामनिवृत्तौ वा स्वरूपोपलब्धिः स्यात् । न वा बौद्धमतवदत्र चेतसः प्रकृतिप्रभास्वरत्वमागन्तुकमलत्वं वाभ्युपगम्यते येन कामविजये बोधिप्राप्तिः स्यात् । न वाऽशुद्धकामः शुद्धकामस्यैव मलिनप्रतिबिम्बतयाऽवधार्यते । ये मनोविश्लेषका युङ्गानुयायिनोऽचेतनं चित्तं जातीयवासनाशयं मन्वते तेषां मतं पौराणिकाख्यानविशदीकरणार्थमुपयोग्यपि नात्माभावदूषणान्मुच्यते[89] ।

येन तु योगानुभूतिरात्मसम्मोहनत्वेन व्यामोहत्वेन वा व्याख्याता तेन योगार्थ एव नावबुद्धः[90] । न ह्येकाग्रतामात्रं योग उच्यते, एकाग्रभूमिकचेतसस्तु एकाग्रता योग इत्युच्यते[91] । पुनश्च न भावनामात्रं योगः, अपि तु विचारद्वारा सत्यत्वनिर्धारणपूर्वं भावना योगाङ्गमिति[92] । अपि चानुभूतेः प्रामाण्यं न्यायसङ्गतेरन्याभिज्ञसंवादात् प्रवृत्तिसाफल्यात् सदाचारपोषकत्वाच्च परीक्ष्यम् । तथा च विलियम-जेम्साचार्यैरुद्धृतम् : "स्वकर्मभिस्ते परीक्षिष्यन्ते"[93] ।

धर्मस्वरूपचर्चया प्रक्रम्य इदानीं धर्मदर्शनस्वरूपालोचनेन समापनीयम् । दर्शनमिदं धर्मविज्ञानेतिहासौ कथं स्वकुक्षौ प्रवेशयतीवेति संशयो मा भूद् यतः "प्रदीपः सर्वविद्यानामिति" प्रसिद्धं दर्शनं तथैव विद्यान्तरमपेक्षते यथा प्रदीपः प्रकाश्यपदार्थान् यदभावे अप्रतिफलिताः प्रकाशकिरणा नायान्ति दृष्टिपथम्, दर्शनमप्यन्वीक्षात्मकमीक्षामुपादाय प्रवर्तते, सेक्षा पुनः प्रत्यक्षजन्या स्यात्तत्तदागमजन्या वेति प्रसिद्धमेंव[94] । तत्र प्रत्यक्षज्ञानस्य न्यायेनालोचनमेवाधुना बहुभिर्विज्ञानमित्युच्यते[95] । यच्च नानागमाहृतं ज्ञानं तदन्वीक्षकेण दर्शनेन परामृश्यमानं तत्तज्ज्ञानेतिवृत्तान्नातिरिच्यते सम्प्रदायमात्रस्य ह्यैतिहासिकत्वात् । स्वयं दर्शनमपि सम्प्रदायरूपेण वर्तमानं स्वेतिहासस्मृतिं विनावस्थातुं न शक्नोति । पूर्वाचार्याणामितरसम्प्रदायानां वा स्मृतिरितिहासरूपैवोपलभ्यते, न च तया विना कस्यचित्समुदायस्य प्रतिष्ठा वृद्धिर्वा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ननु ईक्षापूर्वकत्वेऽप्यन्वीक्षायाः, नान्वीक्षा ईक्षैव, तथा च नानाशास्त्रपुरस्सरत्वेऽपि दर्शनस्य तेभ्यो विविक्तमेवं तत् (दर्शनम्), तदेव चात्र विवेचनीयमिति चेदुच्यते, यथा दृष्टान्तरहितं निर्विषयं वा ज्ञानं न विशेषेण प्रतिपादयितुं शक्यं तथैव ज्ञानेन विना ज्ञाननीतिर्न्यायात्मा निर्धार्या प्रतिपाद्या च न भवति । इदं च विषयभूतं ज्ञानं सामान्यानुभवात्मकं चेत्तत्प्रकाराविष्कारनीत्यात्मकं दर्शनं न्यायशास्त्रं तर्कशास्त्रात्मकं वेत्यभिधीयते । विद्याविशेषानुगृहीतं चेत्तज्ज्ञानं तदन्वीक्षा अध्यात्मदर्शनव्याकरणदर्शनादिव्यपदेशैर्व्यपदिश्यते । तथा च धर्मदर्शनमपि ।

ननु एवमपि धर्मदर्शनं धर्मशास्त्रमेवापेक्षेत नेतिहासादिकमिति चेद् बाढम्, धर्मशास्त्रमेवापेक्षते साक्षात् किन्तु तुलनात्मकं धर्मशास्त्रं स्वान्वेष्यपदार्थान् देशकालमुक्तान् नावधारयति, अपि तु ऐतिहासिकानेव । पुनश्च ये तेषु पदार्थेषु न श्रद्दधते ते तन्निरूपणं विज्ञानविशेषविषयतयाऽभ्युपगच्छन्ति । इत्थं नवीनं तुलनात्मकं धर्मशास्त्रं विज्ञानेतिहासाभ्यां नापरिगृहीतम्, तद्दर्शनमपि द्वयं पुरस्कृत्य प्रवर्तते । तथा च हेगलीयं धर्मदर्शनं नीबूरीयं वा इतिहासदर्शनाभिन्नमेव । ये पुनः धर्मशास्त्रविशेषे ऐकान्तिकीं श्रद्धां दधते यथा स्कौलेस्टिकदार्शनिका मीमांसका वा, ते धर्मदर्शनम् इतिहासनिरपेक्षमवश्यं मन्येरन् । ये च सर्वेष्वपि धर्मशास्त्रेषु ऐकान्तिकीम् अश्रद्धामेव दधते यथा नवीनसमाजविज्ञानविदः प्रत्यक्षवादिनो वा दार्शनिकास्ते धर्मदर्शनं भ्रान्तिमात्रं विज्ञानसापेक्षं मन्यन्ते ।

यावता धर्मदर्शनं तर्कशास्त्रमात्राद् विशिष्टं दर्शनं यावता चेदं ज्ञानक्षेत्रविशेषमवगाहते तावता धर्मसम्प्रदायानां तुलनात्मकेतिहासोपलब्धतत्त्वान्यनालोच्य न सम्यक् प्रवर्तितुं शक्नोति । नापि धर्ममात्रप्रतिक्षेपिविज्ञानोपारूढदर्शनमसमीक्ष्य स्वप्रतिपादने युक्तियुक्ततां समर्थयितुं शक्नोति । अतश्च पारम्परिकधर्मशास्त्रमात्रानिमग्नं तर्कशास्त्रमात्राच्च विशिष्टं धर्मदर्शनं न धर्मेतिहासं न वा धर्मविज्ञानमुपेक्षितुं शक्नोति ।

ननु दर्शनं प्राक्सिद्धान् प्रत्ययानेवालोचयति नानुभवव्यवहारसिद्धांस्तथा चेतिहासविज्ञानयोः सर्वथानुभवपरतन्त्रत्वाद् न दर्शनस्य ताभ्यां किमपि साम्यम्, न च धर्मदर्शनमेवासङ्गतं स्यादिति वक्तव्यम्, धर्मस्यापि प्राक्-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सिद्धानादिवासनाजन्यप्रत्ययरूपत्वादिति चेत्, न, तादृशविशुद्धप्रत्ययानां सम्यग्बोधोऽपि नानुभवविवेचनाद् विना सम्भवति यथा सामान्यानां विशेषालोचनेन विना । अयं च निर्गलितार्थः, तुलनात्मकधर्मदर्शनं परम्परागतधर्मदर्शनाद्विद्यमानं नवीनामेव धर्मतत्त्वमीमांसादिशमुद्योतयति । एवञ्च धर्मदर्शनं पारम्परिकं तुलनात्मकं वा आगमानुसारि, न्यायानुसारि वा, धर्मानुरोधि धर्मविरोधि वा । सर्वत्र च धर्मतत्त्वजिज्ञासा मूलभूता नवीनावतारं जिघृक्षति ।

धर्मस्य त्रिभूमिकत्वाद् उपरिनिर्दिष्टात् तदीयदर्शनालोचनस्यापि त्रैविध्यम् । आगमार्थविवेचनेन, आगमार्थविवेचकशास्त्रालोचनेन, शास्त्रीय-सिद्धान्तविवेचकदर्शनालोचनेन च त्रिधा विभज्यते धर्मदर्शनम् । आगम-विवेचनस्योदाहरणं लक्ष्यते श्रीमदरविन्दस्य वेदानुव्याख्यानेषु, शास्त्रा-न्वीक्षायाः शङ्करभगवत्पादादिभाष्येषु, शास्त्रीयदर्शनालोचनं पुनर्भाष्य-काराणामन्योन्यसिद्धान्तविवेचनेषु । श्रीमदरविन्दो वेदवाक्यानि महर्षीणां साक्षात्कारव्यञ्जकानि मत्वा तत्र निगूढानर्थान् व्याचष्टे । आर्षानुभूतिरेवात्र विशदीक्रियते न पुनः शास्त्रार्थाः प्रतिपाद्यन्ते लक्षणैः प्रमाणैर्वा । जैमिनीय-बादरायणीय – शास्त्रयोरालोचिताः सिद्धान्ता नानाभाष्यकारैः ! प्रस्थानानि च रचितानि विभिन्नानि कुमारिलभट्ट – प्रभाकर – शङ्कर – रामानु-जाद्यैः । एतेषां प्रस्थानानां मूलभूता अभ्युपगमाः प्रतिपत्तयश्च तैरेव परस्परं भृशमालोचिताः, यथा शङ्कराचार्येण साङ्ख्यानां रामानुजेन शाङ्कर-दर्शनस्य । उदयनाचार्यस्य आत्मतत्त्वविवेको बौद्धदर्शनमालोचयति, बौद्धानां तत्त्वसङ्ग्रहो बौद्धेतरदर्शनान्यालोचयति । एतादृशमालोचनं धर्म-सम्प्रदायानुगतशास्त्रीयप्रस्थानानां पारस्परिकदार्शनिकमालोचनं निदर्शयति । प्रायेण आधुनिकानि दर्शनानि अस्मिन्नेव विभागे निवेश्यानि । ननु निरागमत्वादाधुनिकदर्शनानां स्वतन्त्रप्रज्ञामूलत्वाच्च कथं तानि प्राचीनैः शास्त्रीयदर्शनैस्तुलनीयानीति चेत्, तेषामपि साभ्युपगमत्वाद् अभ्युपगमानां च परम्परया शास्त्रमूलत्वात्तद्विरोधे वा कल्पितत्वात् । हेगलादयो बुद्धि-वादिन ऋषिकल्पैर्यवनाचार्यैः क्रिस्तीयधर्मशास्त्रिभिश्च भावितानर्थानाश्रयन्ति स्वमूलप्रतिपत्तिषु बुद्धिमात्रसाक्षात्कार्यतत्त्वपरासु । प्रत्यक्षवादिनस्तु लोकाय-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तिकोपमा अदृष्टप्रतिषेधका धर्मशास्त्रीयपदार्थान् व्यवहारमूलकयुक्तिभिः खण्डयन्ति विपरीतांश्चार्थांस्तत्र कल्पयन्ति । फलतः शास्त्रसमर्थकानि शास्त्रविरोधकानि वा सर्वाण्येतानि दर्शनानि नवानि प्राचीनानि वा दृष्टिभेदमेवैकान्तिकं मत्वा प्रवृत्तानि प्रस्थानभेदं निदर्शयन्त्यसमाधेयम् । ततश्च "श्रुतयो विभिन्नाः स्मृतयो विभिन्ना नैको मुनिर्यस्य मतं न भिन्न"मिति विलोक्य संशय एव बहुलायते । आगमाः शास्त्रैर्दृढतरं पृथक् पृथक् प्रस्थानेषु निबध्यन्ते, शास्त्रीयसिद्धान्ताश्च तार्किकैरसद्धेतुकाः सत्प्रतिपक्षिता वा साध्यन्ते । तथा च यीशोरीशपुत्रत्वमीशस्य च त्रिमूर्तित्वं मुहम्मदीयसम्प्रदाये निषिध्यते । संसारवादो न स्वीक्रियते भारतीयेतरसम्प्रदायैः । न वा वेदानां नित्यत्वमवैदिकैः । ईश्वरं न स्वीकुर्वते बौद्धा आर्हता वा । अद्वैतवादं प्रहरन्ति द्वैतिनस्तर्ककर्कशाः । कियद्वा निबध्यतां विस्तरो भेदानां नानाप्रस्थानगतानाम् । तुलनात्मकपद्धतिमाश्रित्य प्रचलितानि च नवीनानि दर्शनानि समाजशास्त्राणि वा भेदानेतान् विकल्पमूलान् इतिहासनिबन्धनान् वा प्रतिपादयन्ति । शास्त्रीयसम्प्रदायाः स्वेतरसम्प्रदायसिद्धान्तान् मिथ्या घोषयन्ति ।

विवादसङ्ग्रामेऽस्मिन् अनिश्चयान्धकारे च अदृष्टान्येव लक्ष्याणि गृहीत्वा विध्यन्ति तर्कायुधजीविनः संशप्तका इव जुह्वति स्वमतीः प्राणायमानाः । विषमेऽस्मिन् समुपस्थिते कथं युद्धविरामः सम्पाद्यः कथं विजयः सत्पक्षस्य सन्धिर्वा तात्कालिकः । कथं वा सत्पक्षो निर्णेतव्यः । समाधानमार्गमन्वेषमाणेन प्रथमतस्तु इदमालोच्यं यद् व्यवहारबुद्धिः प्रमाणैः प्रत्यक्षयोग्यानर्थान् अन्विष्यन्ती विज्ञानात्मिका विद्याः साधयति प्रामाण्यं च सहेतुकं तासु विचारयन्ती स्वपरामर्शद्वारा तर्कशास्त्रं रचयति सर्वविद्याप्रदीपम् । यदा च व्यवहाराद् व्यावृत्ता मूलविकल्पान् परोक्षांश्चार्थाननुसन्धत्ते तदा नियामकाभावादन्तर्द्वन्द्वतां प्रतिपद्यते । सफलानुभवाकलनसम्भावनाजन्यपरिप्रेक्षणस्थाननियतदृष्टिनिविष्टमैकान्तिकत्वं प्रतिपन्नस्तर्कः स्वभावत एवाप्रतिष्ठः । तच्चाप्रतिष्ठितत्वमस्यालङ्कार एव नित्यनूतनोद्भावनाभिः सम्भाव्यार्थोपन्यासिकाभिर्युक्तिभिः परिष्कारपुरस्कारिकाभिः प्रवर्तमानस्य । नूतना दृष्टयो नवीना विकल्पा अपूर्वा युक्तयो दूषणानि च नूतनानि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शतशः समाविष्क्रियन्ते तर्कप्रचारेण । तर्कयानारूढस्य युक्त्यायुधस्य नाम्न्यन्तो दिग्विजययात्रायाः ।

ननु अनेकान्तवादिनोऽपि सन्ति तार्किका ये नयसोपानपरम्परया आंशिकसत्यालोचनेन परमार्थमारोहन्ति यथा हेगलीया आर्हता वा प्रकारान्तरेणेति चेत्, न, नयदूषणेनैव निर्दोषज्ञानानुपलब्धेः । दृष्टिसापेक्षो हि नयप्रमाणयोर्भेदः, प्रतिपत्तितारतम्यमपि दृष्टिनयापेक्षम् । परमार्थसद्वस्तु गुण एव क्षणिकः, द्रव्यं वानित्यम्, आत्मबोधो वा द्रव्यगुणादिपदार्थातीत इत्यादिषु विकल्पेषु न तर्कमात्रं विनिगमकमुपन्यसितुं शक्नोति । क्षणिकत्ववादिनो द्रव्यमात्मानं च प्रतिषेधन्ति, द्रव्यवादिन आत्मानं द्रव्यं बुद्धिं च गुणमाचक्षते, आत्मवादिनो द्रव्यवादिन आत्मानं द्रव्यं बुद्धिं च गुणमाचक्षते, अद्वैतिन आत्मवादिनो द्रव्यगुणादीनां दृश्यत्वमेव तन्मिथ्यात्वे हेतुं प्रतिपादयन्ति । धर्मकीर्त्युदयनमधुसूदनसरस्वतीनां को वरिष्ठस्तार्किकः ?

ननु सर्वा एव दार्शनिकप्रतिपत्तयस्तर्हि मिथ्यैवावगन्तव्या यथा प्रतिपादयन्ति माध्यमिका अद्वैतिनश्च श्रीहर्षादयस्तासां विचारविशारुत्वम् इति चेद् बाढम् । तार्किकाणि मतान्यैकान्तिकानि चेत् प्रतिपाद्यन्ते न तानि तथा विश्वासार्हाणि । द्वन्द्वबुद्धेः शून्यत्वमेव प्रज्ञयावगन्तव्यम् । जात्यन्धवत् तर्कस्तत्तदनुभवाकलनावष्टम्भः स्पृशन्निव सकलानुभवव्यापित्वेऽपि तदुत्तीर्णां तथतां वासनोपहितो विकल्पयन्नेव तां भ्रमति परमार्थात् । तथा च प्रयोजनीयसन्दर्भवशाद् दृष्टिं समालम्ब्य प्रत्यक्षागमोपलब्धिरन्वीक्षणीया बलाबलं च लक्षणादीनां विचारणीयं यावदस्ति नियामकं व्यावहारिकं नो चेत्प्रज्ञैव शस्या शून्यतावगमाद् विवृण्वती प्रतिभाद्वारम् ।

अथ मन्यते व्यवहारेऽपि कौशलेन विवर्धनीयत्वात् प्रत्यक्षोपलब्धेः परस्परं विरुद्धत्वाच्चागमानां तादवस्थ्यमेवानवस्थाया इति, सत्यम्, न मानवबुद्धिर्विकल्पापेक्षप्रत्यक्षाश्रिता विकल्पनीयागमवचनापेक्षा वा निःशेषपरमार्थावगमे समर्था । स्वभावश्चायं न दोषाय व्यवहारोपपादकत्वात्, परमार्थस्तु न सविकल्पकबुद्धिगम्यस्तर्कातीतः, सर्वात्मना तु सोऽधिगम्यः । इयमेव सर्वात्मनाधिजिगमिषा धर्मसाधना यत्प्रयाणकानि लक्ष्यं च सोपायं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वासनाधिकारभेदापेक्षमेव सामान्यतो निर्दिश्यन्ते आप्तैः। तद्वचनानि चागमरूपाणि न तार्किकाभिधानानि प्रतिपत्तव्यानि प्रत्युताध्यात्मिकानुभूतिप्रकाशकानि साङ्केतिकवाक्यान्येव नेयार्थानि । न चन्द्रं निर्दिशन्त्यङ्गुलिरेव चन्द्रत्वेन ग्राह्या नापि विषदिग्धबाणहतस्य चिकित्सकेन प्रहर्तुरेव जिज्ञासा कर्तव्या[96] । एवमागमाः साधनानि निर्दिशन्ति भावांश्चाध्यात्मिकान् व्यञ्जयन्ति, न ते तथ्यानि अभिदधते तत्त्वानि वा परिभाषन्ते, न तर्कसम्मितान् विकल्पसहान् सिद्धान्तान् प्रतिपादयन्ति । प्रायेणाख्यानस्तुत्यादिरूपेषु आगमेषु साधनोपदेशो भक्त्यङ्गतयोपलभ्यते, लोकोत्तराभिमुखभावसारत्वं च तेषां ततः प्रकाश्यते । भाषाप्यागमानां नानाविधवक्रतां बिभर्ति भाववृत्तविमर्शादिरूपा अप्यागमाः प्रत्यक्चैतन्योपसृष्टान् भावान् प्रकटयन्ति । एवमागमप्रकाश्यो धर्मस्तर्कव्यवस्थाप्याच्छास्त्रान्नितान्तभिन्न एव । श्रुतिस्मृत्यादिव्यक्तभेदान् विगाहिष्यमाणेन भाव एव निमज्ज्य हृदयगुहानिहितं धर्मस्य तत्त्वमधिगन्तव्यम् । आगमा अध्यात्मसाधनोपायावगमार्थमेव, सत्याधिगमस्तु प्रत्यात्मं स्वहृदयगोचर एव ।

ननु साक्षाच्चेदागमात् तत्त्वप्रतिपत्तिर्नेष्यते, अनावश्यकतैवागमस्यापद्येतेति चेत्, न, नागमः श्रुत एवानवबुद्धार्थमन्त्रवत् तत्त्वं बोधयति, श्रवणेऽप्यर्थबोधोऽपेक्ष्यते तदर्थं च श्रोतुः संस्कारवैशिष्ट्यं मननिदिध्यासनादीनि च यथायोग्यम् । पुनश्च नास्त्येवेतिहासलब्धः कोऽप्यागमविशेषो वेद-बाइबिल-कुरानादिर्येन विना परमार्थाधिगमो न स्यात् । आप्तवचनमेवागमः, आप्ताश्च सर्वत्र सदा चोपलभ्यन्ते तीव्रसंवेगैः परमार्थानुसन्धित्सुभिः । बहून्यत्रोदाहरणानि, अर्जुनः संवेगं प्राप्तः स्वसहचरे सारथावेव नित्यगुरौ अविदितस्वभावे लेभे प्रत्यक्षमाप्तम्, तथासुरिः कपिलाल्लब्धवान् ज्ञानम्, विवेकानन्दो रामकृष्णपरमहंसाद् अन्ये चासङ्ख्याः साधका अन्तर्गुरोरेव लेभिरे लभन्ते चाध्यात्ममार्गप्रकाशम् । बाह्या आगमाः सम्प्रदाया गुरवश्च तावदेव यथार्थनामानो भवन्ति यावदन्तःप्रेरणया आगम्यन्ते ते । अन्यथा हेरोड–पाइलेट–कंस–दुर्योधन–देवदत्ताजातशत्रुप्रभृतयः प्रत्यक्षीभवन्तमपि किमिति नाभिजानन्ति स्म लोकोत्तरमनुष्यभावं क्रिस्तकृष्णबुद्धादीनाम् । ते च धर्मप्रवर्तकास्तीर्थङ्करा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

महापुरुषाः क्षीयमाणधर्माचारेषु युगेषु प्रादुर्बभूवुः प्रदर्शनाय सन्मार्गस्य । कालेन धर्मो बाह्याचाररूढिष्वेव पर्यवस्यतीव यथा यह्वधर्मः क्रिस्तकाले वैदिकधर्मो वा बुद्धकाले । तथा क्रिस्तेन नियमात्मकधर्मस्थाने प्रेमात्मक-धर्मस्योपदेशः कृतः, बुद्धेनापि भगवता परोक्षपरककर्मकाण्डस्थाने शीलसमाधिप्रज्ञामार्ग उपदिष्टः । तत्तद्युगप्रवृत्तिभेदाद् उपदेश्यानां वासना-भेदाच्च महापुरुषदेशना अपि भेजिरे नानात्वम् । तथा क्रिस्तधर्मो यह्वोपासकेषु यवनदर्शनाभिज्ञेषु च प्रसारं लभमानस्ततस्तत्त्वानि गृह्णन् स्वीयाभिप्रायं प्रतिपादयामास । सौगतास्तु स्फुटमेव प्रतिपद्यन्ते 'विनेयभेदाद् देशनाभेदः' इति 'देशना लोकनाथानां सत्त्वाशयवशानुगा' इति च । अत एव च प्रतिधर्मसम्प्रदायं निकायभेदोऽपि विपुलो दृष्टिपथमायाति । विनेयभेदाद् भेदं भजत्यध्यात्मसाधनात्मके धर्मे, लोकसाधारण्येनैव प्रवर्तते शीलात्मको धर्मः । लोके मानवसङ्घानाम् ऐतिहासिकभेदात् साधारणोऽपि शीलात्मको धर्मो भजति वैविध्यं संस्कारोपरक्तः । मौलिकानि तत्त्वानि सर्वत्र तुल्यानि, विकल्पितानि रूढानि च भिन्नानि । अशोकेन धर्मराजेन सारं सर्वधर्माणां विज्ञापितं संयमो भावशुद्धिश्चेति । सर्वोऽपि सदाचारः संयममूलः शुद्धभावप्रयुक्तश्च । अहिंसादयाप्रेमादयः शुद्धा भावा इति सुविदितम् । अहङ्कारो विषयतृष्णा स्वार्थपरमा बुद्धिश्च मानवहृदि मलत्वेन स्थिता आच्छादयन्ति प्रज्ञां कलुषयन्ति कर्माणि । संयमेन कर्तव्यपालनेन परोपकारेण मौनेन ध्यानेन भक्त्या प्रपत्त्या चाध्यात्मसाधनं सदाचारश्च सर्वधर्मेषु प्रवर्तते । ननु ईश्वराभावे श्रमणधर्मेषु नास्त्यवकाशो भक्तेः प्रपत्तेश्चेति चेत्, न, तेष्वपि बुद्धादेः शरण्यत्वेन भजनीयत्वेन च स्वीकृतत्वात् । यीशुरीशपुत्रो मुहम्मदोऽन्तिमो भाववादी वेदा वर्णानु-पूर्वीरूपा अपि नित्या अपौरुषेयाश्चेत्यादीनि मतानि प्रशंसावाक्या-न्येवावगन्तव्यानि । स्वस्वागमप्रामाण्यं प्रतिपादयितुकामैरेतादृशीषु युक्तिषु अन्योन्याश्रयदोष एवागत्यापाद्यते । तथा च ईश्वरविषये त्रिमूर्तिवादो जगत्कर्तृत्ववादो निराकारवाद एकत्ववादो वा परोक्षविकल्पनान्येव नयाश्रितानि । निर्विकल्पोऽपरिच्छिन्नोऽनन्तश्च परमार्थ इति तु सर्वत्र सम्मतमेव । स च लोकोत्तरः परमार्थः समर्पिताखिलाचारेण स्वात्मनैव

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मौनेन साक्षादधिगम्य इत्यपि सर्वत्र प्रतिपन्नं ज्ञानिभिः । सर्वधर्माभेदं प्रतिपित्सुना तत्त्वविषयास्तार्किका विकल्पा आचारविधिसंस्कृताश्च लोकरूढयो गौणत्वेन द्रष्टव्याः, अनुभूतिमात्रे च परिस्फुरद्भूमाभासः परामर्शनीयो भावनीयश्च । स्वानुभूत्येकमानायेति यदुक्तं तदेव सर्वस्वं धर्मतत्त्वस्य । तदेव गुहानिहितं धर्मतत्त्वमुद्दिश्योक्तमृषिणा "एकं सद् विप्रा बहुधा वदन्तीति" । एकमित्यस्यार्थस्तु न सङ्ख्यायोग्यत्वे सति बहुत्वप्रतियोगित्वं स्वगतादिभेदत्रयरहितत्वं वा । सङ्ख्याभेदाश्च बुद्ध्यारोप्या धर्मा न तत्त्वगताः । एकमिति वचनस्याभिप्रायस्तु निःशेषत्वमनन्तत्वमतुल्यत्वादिविकल्पैः प्रतिषेध एव लोकविदितवस्तुधर्माणाम् । सदिति प्रतिषेधत्यसदेव परिच्छिन्नमनित्यं विरुद्धं च । बहुधेति प्रकारबहुत्वं वाग्विकल्पनिबन्धनमेव । ननु प्रतिषेधपरैरपि शब्दैः परिच्छिद्यत एव वस्तु निःसीमत्वं चास्य क्षीयत इति चेत्, न, प्रतिषिध्यमाना अपि प्रतीतिधर्मा वस्तुतः परिच्छेदात्मका एव । एवं चानन्तवस्तु यद् व्यवहारे विकल्पे चान्तवद्भाति तत्प्रतिषेधेन पुनरनन्तस्य सङ्केतो विधीयते । तद्यथा प्रत्यक्षानित्यविषयप्रतिषेधो जडत्वस्य वा प्रतिषेधः सच्चित्स्वरूपमात्मानं लक्षयति । सर्वथा च प्रतिषेधेऽभिमते शान्तत्वद्योतकं मौनमेवाश्रयणीयम् ।

पुंसां सर्वात्मना परमश्रेयःपर्येषणैव धर्मः । सा च साध्य-साधन-साधक-वैशिष्ट्येन विशिष्यते । तत्र, साध्यं विवेकसम्मतं परममभीष्टम्, साधनं भक्तिरध्यात्मयोगः सदाचारश्चेति त्रितयमप्यविश्लिष्टम्, साधकश्च लक्ष्यैकप्रहितचेताः सर्वस्वार्पणतत्परश्च । पर्येषणाधिगमाश्च परत्र सङ्क्राम्यमाणा रचयन्त्यागमसम्प्रदायम् । आगमशास्त्रदर्शनभेदेन सोऽपि त्रिपर्वा । शास्त्रमात्रानुसरणेन न स सम्यगवबुध्यते, शास्त्राणां दृष्टिसापेक्षत्वात् । विधिसंहिताऽपि शास्त्रीया धर्मसम्प्रदायाङ्गभूता न स्वतन्त्रा लोकरीतिभ्यो नापि आध्यात्मिकशीलावच्छेदेन तासु अन्तर्भाव्या । तत्त्वलक्षणान्यपि शास्त्रीयाणि विशीर्यन्ते प्रज्ञया विचार्यमाणानि । एवं सम्यग्ज्ञानस्य मूलं निर्विकल्पे प्रातिभसाक्षात्कारे, सदाचारस्य प्रमाणं भावशुद्धौ निर्धारयितव्यम् । आप्तवचनान्येव साक्षात्कारसाधने भावसाधने च प्रमाणतुलेव उपस्थितानि ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यच्चाप्तवचनेषु अन्तर्विरोध उद्भाव्यते तुलनात्मकदर्शनेषु तदवलम्बेन च तेषां मिथ्यात्वमितिवृत्तान्तर्भावो वा साध्यते । तस्य प्रतिपक्षे स्मरणीया सनातनपरम्परा सार्वभौमधर्मदर्शनस्य । दीर्घतमो – बुद्ध – महावीर–पुष्पदन्त –अभिनवगुप्त–मधुसूदनसरस्वत्यादयः प्राचीनाः, राममोहनराय–रामकृष्णपरमहंस – विवेकानन्दादयश्च नवीनाः सार्वभौममद्वयं सत्यं व्यजिज्ञपन् । अन्यत्रापि रूमी-गजाली–इबूनूरूश्द–आदयः प्राचीनाः, फ्रित्सश्वान–कुमारस्वामी–रनेग्वेनो–नस्त्रादयो नवीना इममेव सनातनं सम्प्रदायं व्याचख्युः [97] ।

●

पादटिप्पण्यः –

1. द्रष्टव्या मर्सियाइल्याड–सं., **एन्साइक्लोपीडिया ऑव रिलिजन्स** ।
2. इदमत्र तात्पर्यम्–ज्ञानमेव प्रमाणं प्रतिपद्यमाना बौद्धा ज्ञानस्य वस्तुतन्त्रत्वाद् वस्तुनश्च स्वलक्षण–सामान्य–लक्षणाभ्यां विभक्तत्वाद् ज्ञानमपि प्रमाणभूतं प्रत्यक्षानुमानाख्यं द्विधा व्यवस्थापयन्ति नैयायिकमतेन तु करणात्मकानि प्रमाणानि सम्प्लवन्ते प्रमेयेषु । धर्मे पुनः बुद्धादिसाक्षात्कारं प्रमाणीकुर्वन्ति सौगतादयः, वैदिकास्तु वेदानेवालोच्य धर्मस्वरूपमध्यवस्यन्ति । एवं बौद्धमते धर्मं साक्षात्कृत्य तल्लक्षणं प्रवेदितं भगवता बुद्धेन, वैदिकमते तु वेदेभ्यो लक्षणं विज्ञाय धर्मोऽन्वेष्टव्यः । धर्मः परमार्थतः परोक्षोऽपरोक्षो वेति विप्रतिपत्ति-मूलम् । तु. मम **भक्तिदर्शनविमर्शः**, पृ. ५४–५५ ।
3. द्रष्टव्यम्–गून्थर–डी–सौन्टाइमर तथा हरमान् कुल्के (सं.) **हिन्दुइज्म रिकन्सट्रक्टेड** (१९९१); साधुशान्तिनाथेन योगिना महता तर्काटोपेन सर्वधर्मखण्डनं व्यधायि स्वकीये **क्रिटिकल फिलॉसफी ऑव रिलिजन्स'** इत्याख्ये ग्रन्थे ।
4. तु. नागार्जुनकृताया **रत्नावल्याः** प्रथमः परिच्छेदोऽभ्युदयनिःश्रेयसोपदेशाख्यः । द्र. प्रो. के. सच्चिदानन्दमूर्तेः सारनाथसंस्थाने दत्तं भाषणं **नैःश्रेयसधर्म** इत्याख्यम् (प्रकाशितं सारनाथतः, १९८४) ।
5. सर्वथा स्वात्मसमर्पणेनैव परमार्थ उपेय इति निदर्शितं कथायां राजेन्द्रेण दह्यमानदेवायतनरक्षार्थं स्वप्राणानुत्सृजता ।
6. **गीताप्रवचनम्** इत्याख्ये ग्रन्थे ।
7. फौर्स्टर, **पैसेज टु इन्डिया** ।
8. सौगते सिद्धान्ते सञ्ज्ञा–वेदना–संस्काराः चित्तसम्प्रयुक्ता धर्माः चैत्ता अभिधीयन्ते । द्र. अभिधम्मत्थसङ्गहो (१९६७), ख. १, पृ. ८ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

9. सौगतनये पृथग्जनेभ्यो विविच्यन्ते आर्याः लोकोत्तरमार्गप्रविष्टाः । प्रसिद्धानि चत्वारि सत्यानि आर्याणामित्यार्यसत्यानि । द्र. **अभिधर्मकोशभाष्यम्**– ६।१।२ । विद्यागृहीतजन्मान्तरश्च स एव वैदिकपरम्परायां परमार्थतो द्विज इत्यभ्यधीयते ।
10. तथा चामृतवरपदं पर्येषमाणो बोधिसत्त्वः सङ्कल्पितसर्वस्वत्यागो बभूवेति प्रसिद्धम् ।
11. माध्यमिकदर्शनस्य स्वातन्त्रिकशाखाचार्याणां भावविवेकाख्यानां परमार्थद्वयप्रतिपादनम् अत्र स्मर्तव्यम् । द्र. **द नव नालन्दा-महाविहार-रिसर्च-पब्लिकेशन्स,** वाल्यूम न. १, पृ. ३०१-२ ।
12. तु. फ्रित्स शुऑन, **ट्रैन्सेन्डेन्ट यूनिटी ऑव रिलिजन्स** (आंग्लानुवादः, प्र. थियॉसोफिकल पब्लिशिंग हाउस, १९९३) ।
13. **उदानं, अट्ठकथा** (इगतपुरी, १९९५), पृ. २७५–८० ।
14. **सुत्तनिपातो, अट्ठकथा** (इगतपुरी, १९९५), ख. २, पृ. २४७ प्र. ।
15. तत्रैव, पृ. २४३ प्र. ।
16. **महाभारतम्,** शान्तिपर्व (राजधर्मपर्व), वनपर्व ।
17. द्र. हेनरीमेन, **एन्शैन्ट लॉ** (प्रथमं प्र. १८६१) ।
18. तथा च धर्मशास्त्रेषु मानव्यां दण्डनीत्यां च संलक्ष्यते । सर्वथा अधर्मपरायणश्चेन्मानवो भवेत् स्वकुटुम्बमपि न पालयेद् राजापि प्रजा भक्षयेदेव । सर्वथा धर्मपरायणश्चेद् मानवो न दण्डव्यवस्थां राज्यं वापेक्ष्येत ।
19. इदं तु गीतासु सुस्पष्टम् ।
20. तथाचार्यवरस्य प्लातोनः **संवादेषु** आख्यानानि विद्यारहस्यानीव समुल्लिखितानि । तथा च ब्राह्मणग्रन्थेषु आख्यानानि तत्त्वविवरणार्थमुदाहृतानि । आध्यात्मिक- तत्त्वपरतया आख्यानानि व्याचचक्षिरे अध्यात्मवादिन इति निरुक्तादवगम्यते । मीमांसकास्तु तानि अर्थवादपराणि प्रतिपादयन्ति । पौराणिकाख्यानानि न लौकिककथातुल्यानीति न विवादास्पदम् । आधुनिकैरपि कतिपयैर्विद्वद्भिरियं प्राचीना व्याख्यासरणिः स्वीकृता, तद्यथा कैम्बल–कुमारस्वाम्यादिभिः । अपरथा आख्यानमिथ्यात्वप्रतिपादकोऽर्वाचीनः पक्षः टाइलर, **प्रिमिटव कल्चर**–आदिषु प्रसिद्धेषु ग्रन्थेषु विस्तरेण प्रतिपादितः ।
21. द्र. **श्लोकवार्तिकं न्यायरत्नाकरसहितम्,** (वाराणसी, १८७८) पृ. ३८, शारीरक- भाष्यम्, २.२.३२ ।
22. अल्बेरुनीत्याख्यो विद्वान् स्वभारतविवरणे कथयति–भारतीयाः शास्त्रिणः शास्त्रार्थप्रिया अपि न विवादेषु हिंसया स्वनिष्ठां प्रदर्शयामासुरिति । तु. नीलकण्ठशास्त्री, **हिस्टरी ऑव साउथ इन्डिया,** पृ. ४२४ ।
23. बोधिधर्माख्य आचार्यो दक्षिणभारतात् चीनदेशं गत्वा यं ध्यानसम्प्रदायं प्रावर्तयत् स एव चीने **छन्** जापाने च **जेन्** नाम्ना प्रसिद्धिमगमत् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

24. यवनदार्शनिकप्रवरोऽरिस्तुतलः सर्वमुहम्मदीयदार्शनिकाचार्यैः प्रमाणभूतो मतः, तथा च इब्नेसिनाचार्ये इब्नरुश्दे च स्फुटं दृश्यते सूफीमते बौद्धानां प्रत्यभिज्ञादर्शनस्य च प्रभावः संलक्ष्यः । द्र. राधाकृष्णन् (सं.), **फिलॉसफी ईस्ट एण्ड वेस्ट,** खण्डो द्वितीयः, पृ., १७० प्र. तु. एनमारीशिमेल, **मिस्टिकल डाइमेन्शन्स ऑफ इस्लाम** (१९७५) पृ. ३४–३७ ।
25. यवनदर्शनमेवाश्रित्य क्रिस्तीयाचार्यैः स्वदर्शनं व्यवस्थापितमिति सुविदितम् । तथा अरिस्तुतलमनुसृत्यैव अक्विनासाचार्यैः सिद्धान्तसंग्रहः **(सुम्मा)** प्रतिपादितः । द्र. कौपल्सटन, **एक्विनास** ।
26. द्र. विधुशेखरभट्टाचार्याणाम् आगमशास्त्रम् (प्र. कलिकाताविश्वविद्यालयतः १९५०) ।
27. द्र. ताराचन्द, **इन्फ्लूयेन्स ऑफ इस्लाम ऑन इन्डियन कल्चर** ।
28. द्र. विल डूरेन्ट, **हिस्टरी ऑव सिविलिजेशन,** खण्डौ नवम-दशमौ ।
29. दिदरो–वोल्तेयरादयः क्रिस्तधर्मसङ्घं प्रत्याचख्युः फ्रांसदेशे, ह्यूम–गिबन–बेन्थमादयस्तथैव आंग्लदेशे बुद्धिस्वातन्त्र्यं प्रत्यपीपदन् । बुद्धिवादिनः प्रत्यक्षवादिनश्चोभयेऽपि तिरश्चक्रुरागमप्रामाण्यम् ।
30. धर्मस्वातन्त्र्यपरा नैपोलियनप्रवर्तिता विधिव्यवस्था शनैः प्रायः सर्वेषु योरोपीयदेशेषु प्रासरत् ।
31. "त्रिंशद्वर्षयुद्धान्ते वैस्टफेलियासन्धौ (१६४८ तमे क्रिस्ताब्दे) एतादृशी नीतिः योरोपीयराष्ट्रैः प्रायः स्वीकृता । ततः प्रभृति राज्यस्य धर्मात् स्वातन्त्र्यं बहुषु देशेषु स्वीकृतम् । धर्मात् स्वातन्त्र्यं धर्मसङ्घीयप्रभुत्वात् तन्निर्दिष्टविधिव्यवस्थातश्च राज्यस्य स्वातन्त्र्यं सूचयति । व्यवहारनियमाः स्वकार्यनीतिश्च राज्येन शास्त्रीयविधिनैरपेक्ष्येण निर्धारणीया । राजकीयनीत्या दृष्टविज्ञानाश्रितया ऐहिकहितसुखपरमया च भाव्यमिति तात्पर्यम् । एषा धर्मनिरपेक्षा नीतिरेव वर्तमाने भारते सर्वधर्मसमभाव इति व्यपदिश्यमाना अर्थान्तरं प्राप्नोति ।
32. आधुनिकयोरोपीयदार्शनिकेषु परां प्रसिद्धिं गतः शर्मण्यदेशीयः काण्टाचार्यो ह्यूमप्रतिपादित–प्रत्यक्षवादमूलक–संशयेभ्यो विज्ञानं धर्मं चोभयमपि स्वदर्शनेन अतिक्रामीतिविशेषितेन रक्षितुमियेष । प्रत्यक्षगृहीतप्रतिभासान् अनादिविकल्पैः संयोज्य प्रवृत्तत्वाद् विषयविज्ञानस्य न तत्प्रामाण्यं संशयवादेन विचालयितुं शक्यम् । एवं ज्ञानस्य विषयोऽनुभवसिद्धस्तत्प्रकारः प्राक्सिद्धो बुद्धिस्वरूपनिबन्धनः, तद्यथा "घटो रक्त" इत्यत्र देशकालविशेषाऽऽलिङ्गितोऽर्थो रक्ताभासतया गृह्यमाणः रक्तगुणविशिष्टं घटद्रव्यमित्यध्यवसीयते । रक्ताद्याभासः प्रत्यक्षबलादेव देशकालाकारालिङ्गितो ज्ञानविषयो द्रव्यगुणादिप्रकाराः प्राक्सिद्धा बौद्धाः । एवं ज्ञाने प्रत्यक्षाध्यवसाययोरन्वयं विधाय विज्ञानप्रामाण्यं रक्षन् काण्टो धर्मं परोक्षत्वादेव ज्ञानागोचरं प्रतिपादयामास । तथापि निष्कामकर्त्तव्यबुद्धिः पुरुषस्य स्वरूपबोधसहजा कर्तुः स्वातन्त्र्यममृतत्वं कर्मफलदाय-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कमीश्वरं चापादयतीति तन्मतम् । तेन एतेषां त्रयाणां स्वातन्त्र्यामृतत्वेश्वराणां सत्यत्वं ज्ञानाविषयमपि विश्वासार्हम् । एवं काण्टीयदर्शनं धार्मिकीं श्रद्धां प्रत्यक्षानुमानानुपपाद्यामपि आचारमूलभूतविवेकापाद्यां प्रत्यपादयत् । कांटीयदर्शनमनुसृत्य परिवर्त्य च श्लायरमाखरो हेगलादयो धर्मतत्त्वं व्याचख्युः । द्र. रायमुंडश्मित्, **कांट, दी द्राइ क्रितिकेन** (स्तुतगार्त, १९६९) ।

33. अस्या धाराया मूलं ह्यूमनाम्नः प्रसिद्धतमस्य आंग्लदार्शनिकस्य कृतिषु द्रष्टव्यम्–ह्यूम, **डायलॉग्स कन्सर्निंग नैचरल रिलिजन** ।

34. **अस्ताचलीयमित्याख्ये** मदीये ग्रन्थेऽयमनुवादो द्रष्टव्यः ।

35. तथा च फ्रित्सहॉफ श्वॉन–मार्कोपैलिस–सय्यदहुसैनस्र–विल्फ्रिड-कैंटवेल-स्मिथ–कुमारस्वाम्यादीनां कृतयः पर्यालोच्याः । संक्षेपेण एतेषां कृतिसमुल्लेखो द्र. नस्त्र, **रिलिजन एन्ड द ऑर्डर ऑव नेचर** (१९९६), पृ. ३–२८, तु. अमलदास, जोन एन्ड गिस्पर्ह–सौख, **थियोलजाइजिंग इन इण्डिया** (१९८१) ।

36. द्र. मर्सिया इलियाड (सं.), **एन्साइक्लोपीडिया ऑफ रिलिजन्स** ।

37. द्र. चार्ल्स टेलर, **हेगेल** (१९७५), पृ. ४८०-५१०; हेगेल, **एन्सिक्लोपेदी**(हाम्बुर्ग, १९६९), पृ. ४४६–५० ।

38. द्र. हेगेल, **पूर्व**. पृ. ५३–१९८ ।

39. तु. टेलर, **पूर्व**. पृ. ३८९ प्र. ।

40. **कैम्ब्रिज मॉडर्न हिस्टरी** (प्रथमसंस्करणम्) खण्डः अष्टादशशतकविषयः ।

41. तु. इलियाड, पूर्व. **"कम्पैरेटिव रिलिजन"** इति निबन्धः ।

42. तद्विपर्ययेण द्र. डौकुमेन्ट्स ऑव वैटिकन टू (१९६६) ।

43. युगभेदेन प्रसिद्ध एव धर्मभेदः । उक्तं हि देशकालकारणाद् धर्माधर्मौ विपर्यासं गच्छत इति । भाषा–विद्या–कला–विधि–नीत्यादिसमवायो विधृतसन्निवेशविशेषः समानचित्ताधिकरणः साध्यसाधनसङ्केतपारम्पर्यात्मकः संस्कृतिपदवाच्यः प्रकटयति बोधसन्दर्भं सर्वशास्त्राणाम् । तद्यथा बुद्ध–क्रिस्त–मुहम्मदैः प्रवर्तितानि शासनानि स्वस्वयुगसंस्कृतिसापेक्षाणि–द्र. मम **मीनिंग एन्ड प्रोसेस ऑव कल्चर**, तु. **पैलिकन थियॉलजी** (त्रयः खण्डाः) ।

44. लिखितग्रन्थानां तदा विरलत्वात् । प्राचीनदेवायतन–समाधि–राजकीयाभिलेखादीनां मुख्यतया ज्ञापकत्वात् । उदाहरणतया द्र. ब्रैस्टेड, **डवलेपमेन्ट ऑव रिलिजन एन्ड थौट इन एन्शैन्ट इजिप्ट**, हैरिसन, **प्रोलेगोमेना टु ग्रीक रिलिजन** ।

45. द्र. भगवान सिंह, **वैदिक हरप्पन्स**, स्वराज्य प्रकाश गुप्त, **सरस्वती-सिन्धु सिविलिजेशन** ।

46. **निरुक्तम्**, ७.४–६ ।

47. **वेदान्तसूत्राणि**, १३.२६–३३ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

48. दयानन्दः, **ऋग्वेदभाष्यम्** ,
अरविन्दः, **हिम्स टु मिस्टिक फायर** ।
49. द्र. मीमांसोपन्यस्ता युक्तयः **सर्वदर्शनसङ्ग्रहे** संक्षेपेणोपन्यस्ताः ।
50. टॉमस एक्विनासाख्यैराचार्यैः कैथलिकदार्शनिकशिरोमणिभिर्विस्तरेण ईश्वर-साधने युक्तयः प्रदर्शिताः । ता इत्थं सङ्ग्रहीतुं शक्याः –

गतीनां प्रथमो हेतुरध्यक्षः सर्वकर्तृणाम् ।
अनित्यानामधिष्ठानं पूर्णः सर्वनियोजकः ॥

अत्र प्रथमो हेतुः सर्वथा अरिस्तोतलीयः । चतुर्थः अन्सैल्म प्रतिपादनात्प्रकारविशेषेण परां प्रसिद्धिं गतः । अयं प्रत्ययेनैव सत्तां साधयति । पूर्णनिर्दोषस्वरूपतयावधारित ईश्वरो न सत्तारहितो भवितुमर्हति, सत्ताभावस्य दोषरूपत्वात् । अतश्चेश्वरास्तित्वमीश्वरलक्षणादेव सिद्ध्यति । तुलनीयं योगसूत्रम्–तत्र निरतिशयं सार्वज्ञ्यबीजम् । गुणोत्तराणां कल्प्यमानायां श्रेण्यामीश्वरः सर्वश्रेष्ठ एव सर्वगुणः सर्वथा चादोषः । बहुशोऽयं तर्को विचारितः प्रायश्च खण्डितो नव्यैः । तद्यथा कांटेन सत्तां स्वरूपानतिरिक्तां मन्वानेन । न लक्षणकल्पनेन वास्तविकत्वमपि सिद्ध्यति । द्र. कौपल्सटन **फिलोसफी ऑव एक्विनास**, पीटर्सन, हास्कर, राशनबाख, बेसिंगर, **फिलॉसफी ऑव रिलिजन** (१९९६), पृ. १४५-२२७, तु. विलियम पेली, **नैचरल थियोलजी**, टेलर, **मैटाफिजिक्स** (१९८३) ।
51. तु. अभ्यङ्करशास्त्रिकृतोपोद्घातस्तत्सम्पादितस्य **सर्वदर्शनसङ्ग्रहस्य**, पृ. ४९-५० ।
52. द्र. **तत्त्वसङ्ग्रहः** , अतीन्द्रियार्थदर्शिपरीक्षा ।
53. द्र. **सर्वदर्शनसङ्ग्रहः**, चार्वाकदर्शनम्, तु. कौटलीयमर्थशास्त्रम्, विद्यासमुद्देशः ।
54. ईश्वरानुमानमुदयनोपन्यस्तं न्यायकुसुमाञ्जलौ सुप्रसिद्धम् । पञ्च च तत्र हेतव ईश्वरसाधनार्थमुक्ताः

"कार्यायोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः ।
वाक्यात्संख्याविशेषाच्च साध्यो विश्वविदव्ययः ॥"

ईश्वरानुमानचिन्तामणौ परिष्कारो द्रष्टव्यः । सौगतैरार्हतैश्च बहुधा दूषित-मीश्वरसाधकानुमानम्– द्र. मम **श्रमण - ट्रैडिशन**, पृ. ५२ ।
प्र. **तत्त्वसंग्रहः**, ईश्वरपरीक्षा प्रभाचन्द्रः, **प्रमेयकमलमार्तण्डः** ।
55. द्र. श्लोकवार्तिकम्, पृ. ९७-१४८, ६६९-७२ ।
56. द्र. म. म. गोपीनाथ कविराज, **दि डोक्ट्रिन ऑव प्रतिभा इन इन्डियन फिलॉसफी**, सेलैक्टेड राइटिंग्स (१९९०) ।
57. द्र. टेलर, प्लेटो (१९६०), अरिस्तोतिलेस, **मैटाफिजिक्स** (अनु. वॉरिंगटन), बर्नट, **ग्रीक-फिलॉसफी** ।
58. द्र. जिल्साँ, **द स्पिरिट ऑव मेडिईवल फिलोसफी**, तु. विल डूरेन्ट, **द एज ऑव फेथ** ।
59. तथा च देकार्तीयदर्शने उपपाद्यते ईश्वरास्तित्वम्–द्र. मेडीटेशन्स ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

60. द्र. ह्यूम, **एन एसे कन्सर्निंग ह्यूमन अन्डरस्टैंडिंग** ।
61. आधुनिकानां तार्किकप्रत्यक्षमात्रवादिनां **लौजिकलपौजिटिविस्ट** इत्याख्यानामिदं मतम् । द्र. फ्लू एन्ड मैकिन्टायर, **न्यू एसेज इन फिलसौफिकल थियॉलजी** (१९५५)
62. तथा च बृहस्पतिमतमर्थशास्त्रे उद्धृतम्, द्र. **कौटलीयम्**, विद्यासमुद्देशः ।
63. द्र. रेमॉ एरॉन, मेन करेन्ट्स इन सोसियोलॉजिकल थॉट, खण्डः प्रथमः, पृ. ६५ प्र. ।
64. द्र. टाइलर, **प्रिमिटिव कल्चर** (१८७१); एनिमिज्म इत्याख्यस्य जीववाद-स्यालोचनं दुर्कहाइमद्वारा अधोनिर्दिष्टग्रन्थे–पृ. ६८–७१ ।
65. द्र. मैरेट, **द थ्रैशहोल्ट ऑव रिलिजन** (१९१४) ।
66. द्र. फ्रेजर, **गोल्डन बाउ** (१९०७–१५) ।
67. द्र. एरॉन, **पूर्व.**, २, पृ. २१ प्र., दुर्कहाइम, **एलीमेन्टरी फार्न्स ऑव रिलिजन**, ऑग्लानुवादः स्वेनकृतः, द्वितीयसंस्करणम् (१९७६), पृ. ४१३ प्र. ।
68. तु. दुर्कहाइम, **पूर्व.**, पृ. ४०९ प्र. एरोन **पूर्व.** ख.२, पृ. ५० प्र. ।
69. वाचां कर्मणां च वक्तुः कर्त्तुश्चाभिप्राये तात्पर्यम्, तदनवबुध्य कथं व्यवहारार्थोऽवगम्यः ।
70. अतश्च वैबरेण **फेरश्तान्द** (अन्तरवबोधः) इति वीक्षणात् पृथग् व्यापारः कल्पितः । द्र. ऐरोन, **पूर्व.** ख. २, पृ. १९१-९२ ।
71. नृतत्त्वविज्ञाने समाजविज्ञाने च जिज्ञासाप्रकारविषये तु. बौटोमोर, **सोसियॉलजी** (द्वि. सं.), पृ. ४८ प्र. ।
72. अयं वैबरीयः सिद्धान्तः **आडियल टाइप्** (आदर्शप्रकारः) इत्याख्यः । द्र. एरोन, **पूर्व.** ख. २, पृ. २०६ प्र. ।
73. ऐतिहासिकपद्धतिविषये द्र. इलियाड (सं.) **पूर्व.** ।
74. तु. वैबर, (आंग्लानुवाद) **द प्रोटेस्टेन्ट एथिक एन्ड द स्पिरिट ऑव कैपिटलिज्म** (न्यूयार्क, १९५९) ।
75. तु. वैबर, **द रिलिजन ऑव इन्डिया** (१९५८) ।
76. तु. **ऐरोन**, पूर्व. ख. १, पृ. १११-८९, मार्क्स, **क्रिटीक ऑव पुलीटिकल इकॉनमी** (अनु. १९०४) ।
77. तु. "संवरणमात्रं त्रयी लोकयात्राविदः" (अर्थशास्त्रम्) ।
78. द्र. अगस्तिन्, **दे सिविटाटिस देई** (आंग्लानुवादः); नीबूर–एलियाड, **पूर्व.**, टॉयनबी, **स्टडी ऑव हिस्टरी** (नवीनमेकखण्डात्मकं संस्करणम्, १९७९) ।
79. तथा चैतिहासिकैः संशयपुरस्सरं समीक्षिताः क्रिस्तीयधर्मागमाः – द्र. **पैलिकन थियॉलजी**; त्रयः खण्डाः ।
80. द्र. **मम मीनिंग एन्ड प्रोसेस ऑव कल्चर** ।
81. द्र. मम **स्टडीज इन द ओरिजिन्स ऑफ बुद्धिज्म** ।
82. द्र. एलियाड (सं.) **पूर्व.**, **पैलिकन थियोलजी** ।
83. **सिक्स एग्जिस्टैन्शलिस्ट थिंकर्स** ।
84. द्र. निनियन् स्मार्ट, **सायंस ऑव रिलिजन**, मार्विन फर्वर, फैनमेनोलजी, तु. यशदेव शल्य, **विषय और आत्म**, एलियाड (सं.) **पूर्व.** ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

85. स्मार्ट, **पूर्व.** ।
86. द्र. तै. ।
87. बृ. ।
88. फ्रायड, **दि फ्यूचर ऑव एन इल्यूजन** (अनु. १९२८), **द ईगो एन्ड द इड** (१९२३), तु. रीफ, **फ्रायड, द माइन्ड ऑव ए मौरिलिस्ट** (१९६१) ।
89. फ्रीडाफोर्डहम, युंग्स साइकौलजी (पैलिकन) ।
90. प्रैट, **द रिलिजस कौन्शसनैस** ।
91. तु. **योगभाष्यम्** ।
92. तु. ज्ञानश्रीमित्रस्य, **निबन्धावली** ।
93. द्र. विलियम जोन्स, **वैरायटीज ऑव रिलिजस एक्सपीरियन्स** ।
94. द्र. **वात्स्यायनभाष्यम्**–१.१ ।
95. तु. नागल, **स्ट्रक्चर ऑव सायन्स** ।
96. उपमे इमे प्रसिद्धे बौद्धागमेषु शब्दग्राहितां विकल्पप्रियतां च तिरस्कुरुतः ।
97. बुद्धोदाहृता जात्यन्धोपमा उदाने प्रथमनानातीर्थिकसूत्रे लभ्यते । सुत्तनिपाते चूलव्यूहसुत्तं महाव्यूहसुत्तं च द्रष्टव्यम्–
"एकंहि सच्चं न दुतियमत्थि यस्मिं पजानो विवदे पजानं ।
नाना ते सच्चानि सयं थुनन्ति तस्मा न एकं समणा वदन्ति ॥
कस्मानु सच्चानि वदन्ति नाना
उदाहु ते तक्कमनुस्सरन्ति ॥ (चूलव्यूहसुत्ते)
सकञ्हि धम्मं परिपुण्णमाहु ।
"अञ्ञस्स धम्मं पन हीनमाहु ॥ (महा.)

अशोकराजस्य धर्मलिपिरित एव प्रभाविता । तथा चतुर्दशशिलालेखेषु सप्तमे– "सर्वे पाषण्डा वसेयुः । सर्वे हि ते संयमं भावशुद्धिं च इच्छन्ति" । तथा चैकादशे – "आत्मपाषण्डपूजा परपाषण्डगर्हा च न स्यात् ।"

अभिनवगुप्तपादानां तन्त्रालोके पञ्चत्रिंशमाह्निकं सर्वशास्त्रसम्मेलनमधिकृत्य प्रवर्तते । एक एवागमोऽधिकारिभेदाद्भिद्यत इति तत्र सारम् ।

जैनानामनेकान्तवादोऽप्यत्रालोच्यः । बौद्धानां प्रसिद्धमेव वचनं विनेय- भेदाद्देशनाभेद इति ।

मुस्लिमदार्शनिकेष्वपि सूफीमतानुयायिषु सदृशं मतमवलोक्यते । तथा रूमी कविनोक्तम्–
"अज़ नज़रगाहे अस्त, ऐ मग्जेवजूद, इख्तिलाफ मोमिन गब्र यहूद ।" दृष्टिभेदेनैव सम्प्रदाया भिन्ना इत्यर्थः ।

आधुनिकेषु द्रष्टव्याः –
मार्कोपैलिस, **द वे एन्ड द माउन्टेन** (लन्दन, १९९१)
फ्रित्स शुवॉन, **इसौटेरिज्म एज प्रिन्सिपल एन्ड एज वे** (१९९०)
ट्रैन्सेन्डेन्ट यूनिटी ऑव रिलिजन्स
रने ग्वेनॉ, **द फन्डामेन्टल सिम्बल्स ऑफ सेक्रेड सायन्स** (१९९५) ।

●

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्वितीयं व्याख्यानम्

यत्सानोः सानुमारुहत्

(आध्यात्मिकानुभूतिसोपानपङ्क्तिः)

व्याप्नुवन्नपि लोकचर्यां लोकव्यवस्थां च धर्मो लोकोत्तरमर्थमुपनयति पुरुषम् । तत्त्वमुपदिशन् विदधानो यजनोपासनाद्यनुष्ठानं निर्दिशन् सदाचार–व्यवहारनीतिं धर्मः साधयति पुंसामुत्तममर्थं स्वयं साध्यमानः सर्वात्मना श्रद्धा–विवेकोपसंहितेन कर्मकौशलेन जिज्ञासया भक्त्या योगेन । सम्यगर्थकामयोर्द्वारभूते ज्ञानलक्षणतया चाभिन्ने मोक्षाद् अनेकविधे धर्मेऽशेषं संगृह्यते श्रेयः । श्रेयोरूपः श्रेयःसाधनं चेति हि लक्षणं धर्मस्य प्रसिद्धम् । श्रेयः–प्रेयो–विवेको विशिनष्टि मानवस्वभावं प्रतिष्ठापयति च मानवमाद्ये धर्मे । कस्यचिदपि वस्तुनो नियामकः स्वभावस्तस्य धर्मो व्यपदिश्यते । मानवस्य धर्मो विवेकात्मेति सुतरां सिद्ध्यति । विदितमेव यत् पशव इन्द्रियसहजयैव प्रीत्या कामबन्धनेन विषयैराकृष्यन्ते, प्रवृत्तिपरतन्त्रतयैव च जीवन्ति । मनुजास्तु स्वातन्त्र्यबोधविशिष्टा बुद्धिमन्तश्च तात्कालिकानि प्रतिविशिष्टानि च प्रेयांसि विभावयन्तः सुखमहत्त्व–दुःखाल्पत्व–संसाधनार्थं निर्धारयन्ति नीतिमेवं च विवेचयन्ति हितं प्रियात् । एतादृशी परिणामाकलनात्मिका नीतिनिर्धारिका मतिमत्ता सर्वत्रोपयुज्यते साध्य-साधनसंयोजने, विशेषतस्तु अर्थशास्त्रे दण्डनीत्यां च । साधनौचित्यपरमा नीतिर्न चरमं साध्यं निर्धारयितुं क्षमा । सुखावाप्तिदुःखविरहावेव चरमसाध्यतयावगम्य प्रेयोराशिमेव च हितं मत्वा प्रवर्तते नीतिः । त्रिविधेषु सुखेषु यान्युत्कृष्टानि सात्त्विकानि तेष्वपि अहङ्कारबन्धनात् सङ्गाद् दुःखचाञ्चल्यसंस्पर्शात् सापेक्षत्वानित्यत्वादिहेतोश्चास्त्येव मलिनच्छायत्वम् । कामसुखस्यैन्द्रियविकारत्वाद् आत्मार्थत्वाच्च तत्र प्रतिभातप्रियत्वस्य यथा यथा सुखं कामाद् दूरीभवति सन्निकृष्यते चात्मनस्तथा तथोज्ज्वलोज्ज्वलतरप्रभं विभाति, स्वाभाविके चात्मानन्दे पर्यव-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्यति । नन्विच्छाविषयोपसर्जनीभूतमेव सुखमत्यन्तविभक्तं च विषयभेदादतुल्येभ्यः स्रक्चन्दनवनितादिभ्यो जायमानं कथं कामान्निःश्रेयसपर्यन्तं श्रेयस्त्वावच्छेदकं प्रतिपत्तव्यम् । इति चेद् बाढम्, आत्मार्थत्वमेव श्रेयस्त्वावच्छेदकमस्तु, स्वपरामर्शमात्रेऽप्यात्मनीच्छातुल्यतरङ्गकल्पनाद् इच्छाविषयत्वेऽपि तस्य न क्षतिः । अनात्मकामे विकारात्मके सुखे च बन्धाय दुःखाय च वर्तमानेऽपि आत्मकामे न तथा, प्रत्युत तद् भूमानमेवोपनयति निष्कामतापूर्वामाप्तकामताम् । ननु नात्मानमेव परमार्थमभ्युपगच्छन्ति सर्वेऽध्यात्मवादिन ईश्वरपरमत्वाद् अनात्मवादित्वाद् वा तेषाम्मिति कथमात्मार्थता नैःश्रेयसिकी स्यादिति चेत्, नात्मकामताविद्यकात्मकामतावगन्तव्या प्रत्युत परात्मकामतैव, तस्याश्चेश्वराभिन्नत्वान्न दोष ईश्वरवादेऽपि, अनात्मवादिनस्तु अनात्मनिषेधकत्वाद् अनिर्वाच्यपरमार्थस्वीकाराच्च प्रकारान्तरेण न आत्मवादिनां विसदृशा नापि निरपेक्षतयात्माभावप्रतिपादकाः । न च द्वैतवादिमतेन जीवेश्वरयोर्भेदोऽत्र उदाहार्यः, द्वैतेऽपि ईश्वरस्य परमात्मरूपत्वाद् जीवात्मनोऽप्यन्तरतमात्मत्वाद् येन जीव आत्मानमनात्माध्यासनिवृत्तं कामयमानः परमेव कामयते, सा चात्मकामनाऽविसंवादिभ्रमरूपा स्यात्तर्हि । उक्तं हि–

उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः ।
परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः ॥ (गीता–१३.२२)

तेन देहाद्यभिमानी वर्णाश्रमादिलौकिकभूमिकाभिमानी च मिथ्यागौणप्रत्ययविभ्रमितः पुरुषस्तत्तत्साधनायासखिन्नो भोगेष्वतुष्यन् सर्वात्मना ऐकान्तिकमात्यन्तिकं च श्रेयः पर्येषमाणोऽध्यात्ममेव लोकोत्तरमनन्तमर्थं गवेषते । पर्येषको मिथ्याबुद्ध्या लोककारानिगडितः, पर्येष्योऽर्थो लोकोत्तरः परात्मभूतः । कथं च प्राकृतबुद्धिर्लोकोत्तरमर्थमवाप्नुयाद् विवेकनिर्दिष्टम् ? विवेकोद्बोधितश्रद्धापुरस्सरा भक्तिरेव तत्र साधनं भवितुमर्हति । मिथ्याभिमानं तिरस्कुर्वन्नध्यात्मजिज्ञासां प्रयोजयति हृदयोत्साहं श्रद्धा, यश्च लोकोत्तराभिमुखः प्रह्वीभावः प्राकृतबन्धनखिन्नस्य सैव भक्तिः । अवरं परं चात्मानं जीवमीश्वरं च भुवं दिवमिव योजयति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भक्तिर्नानापर्वा । सैव वीर्यमुद्बोधयन्ती कर्मयोगप्रयोजिका, अपरोक्षबोधमर्पयन्ती ज्ञानस्वरूपा, स्वात्मानमन्तर्भावितजीवेश्वरा विवृण्वती स्वरूपतो रसरूपा । तथा चोक्तं भगवता–

भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः ।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥

अत्र प्रथमा भक्तिः कर्मात्मिका ज्ञानस्योपकारिणी, ततोऽनन्तरं तत्त्वज्ञानात्मिका, पश्चिमा च रसात्मिका । योगशब्देनापि नानापर्वेयं भक्तिर्व्यपदेश्या, अविनाभावित्वाद् योगभक्तयोः । ननु हठयोगादिषु व्यभिचारदर्शनान्नाविनाभाव इति चेत्, न, सर्वत्रैव योगेषु गुरुभक्तेरभ्युपगतत्वात् । बौद्धानामपि तत्सम्मतम्, बुद्धस्य शरणगमनेन विना तच्छासनेऽपि प्रवेशासम्भवात् । प्राकृतसाधकोऽभीप्साप्रयुक्तोऽनुगृह्यते लोकोत्तरशक्त्येति योजनात्मको व्यापारो योगस्य ।

इच्छा–ज्ञान–कर्मादीनां सहैवोपलम्भाद् गौणमुख्यत्वभेदात्तस्मिन्नेव चेतसि, एकमेव धर्मसाधनं परमार्थतः । व्यावृत्तिभेदाद् भूमिभेदाच्च भिद्यन्ते साधनरूपाणि । नानासम्प्रदायेषु च शास्त्रीयकल्पनापुरस्सरा अपि लक्ष्यन्ते भेदा अध्यात्मसाधनानाम् । तथापि निभालनीया सूक्ष्मदृशाऽन्तःसलिला सरस्वतीव काचिद् विश्वजन्या अध्यात्मसंस्कृतिः साधनभूतानुभूतिप्रधाना ।

आध्यात्मिकानुभूति-विवेचनपद्धतिः

आदावेवायमुदेति प्रश्नः – केयमाध्यात्मिकानुभूतिः ?

कोऽस्याः शास्त्रप्रमाणके धर्मे उपयोगः ? का चोपयोगपद्धतिः ? तत्रायं प्रतिपाद्यसङ्क्षेपः –

नानुभूतिर्मनोवृत्तं बाह्यार्थज्ञापनं न च ।
कल्पना–स्मृति–रागादिर्न भावो वा विकारजः ॥ १ ॥
साक्षात्कारात्मिका संविद् विमर्शात्माऽविकल्पिका ।
लोकोत्तरानुभूतिः स्याद् योगजा पारमार्थिकी ॥ २ ॥

न मनोविज्ञानविषयतया नापि प्रमाणशास्त्रविषयतया अनुभवोऽत्र विवक्षितः[1], प्रत्युत प्रत्यगात्मविषयतया । प्रत्यगनुभूतिरपरोक्षाऽपि परामर्श-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्मिका निर्विकल्पात् सविकल्पविमर्शाच्च भिन्ना । यदा स्वबाह्यविषयेभ्यः प्रत्यावृत्तो विषयी स्वात्मन्येव प्रतिभातमर्थं पर्येषमाणः स्वात्मानं विमृशतीव तदास्यानुभव आध्यात्मिक इति वक्तुमुचितम् । प्रत्यगनुभवधारेयं विगलत्सांव्यवहारिकबोधा तत्त्वमभिमुखीभवति लोकोत्तरं विशुद्धभावा ।

आत्मा, ज्ञानं, ज्ञानसम्प्रयुक्ताश्च धर्माः, तत्समवेताश्चान्ये तदपरोक्षाश्च धर्माः सर्व एवैते अतीन्द्रिया आध्यात्मिकपरामर्शगम्याः[2] । यथा देहभिन्नतया स्वात्मनः प्रतीतिः, स्वसंवेदनतया ज्ञानस्य, ज्ञानसम्प्रयुक्ततया इच्छा – श्रद्धा – चमत्कारादीनाम्, आत्मापरोक्षतया च परात्मसन्निकृष्टसत्य-श्रेयस्त्व-सौन्दर्यादीनां, देवत्वादीनां वा लोकोत्तरार्थानां परमात्मनो विभूतिमतो वा भक्त्या । लोकोत्तरानुभूतिः स्वरूपतो भक्तियोगात्मिका । यद्यपि इन्द्रियमनो-बुद्धि-जीवेश्वरादीनां पृथक् पृथग् ज्ञानानि वितर्क्यन्ते प्रायेण, ज्ञान-तन्तुस्त्वेक एवाशेषानर्थान् व्याप्नोति तत्तदुपाध्युपरक्तस्तत्तद्विषयाकारश्च । एकाग्रभूमिकचित्तैकाग्र्ये समाहिता बुद्धिः प्रज्ञापरपर्यायप्रतिभापदमारोहति । विषयनिवृत्ता प्रत्यक्चैतन्याभिन्नेव सार्पयति स्वानुभूतिम् । तथापि यथा आत्मप्रतीतिर्देहाध्याससंवलिता सौन्दर्यप्रतीती रूपाद्युपाधिका दृश्यते, तथैव लोकोत्तराध्यात्मिकी चानुभूतिरपि लौकिकाधिभौतिकोपाधिसहिता, उत्तरोत्तरा वाधराधरोपाधिका । अतश्चोच्यते–

दृष्टादृष्टतया भावा लौकिकालौकिकाः पृथक् ।
अध्यासेन सहाभान्ति नृणां ते तु परस्परम् ॥ ३ ॥

न केवलम् आत्मानात्मानौ परस्परमध्यस्तौ यथा भगवत्पादैः प्रतिपादितम् अध्यासभाष्ये[3], सर्वत्रैव दृष्टविषयेषु अदृष्टार्थानां तत्त्वानां च अध्यासात् तेषु ज्ञानयोग्यता अवतरति, क्षणदृष्टलुप्तस्यार्थस्य तु निरुपाख्यस्वरूपत्वात् । सामान्यानि सम्बन्धाश्च बुद्ध्यैव विकल्प्यन्ते शब्दसाहाय्येन[4] । तथा च ऐन्द्रियप्रतिभासेषु बुद्ध्यपरोक्षाणां तत्त्वानां निर्देशकत्वं प्रतिपत्तव्यम्, बुद्धिज्ञानविषयाणां स्वतन्त्रे लोके कल्प्यमानेऽपि तत्प्रतीतिद्वारं प्रत्यक्ष एव लोक इति प्रसिद्धं पृथग्जनस्यापि[5] । ये च सामान्यानि समवायसम्बन्धेन विशेषगतानि गुणात्मकं च संयोगं वस्तुगतं प्रतिपद्यन्ते, तेऽपि प्रकारान्तरेण प्रतिपद्यन्त एव दृष्टादृष्टसमावेशम्, तद्यथा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सामान्यविशेषयोः, समवायसमवायिनोः, गुणद्रव्ययोश्च[6] । वस्तुतस्तु ऐन्द्रियेऽपि विषयजाते प्रत्यक्षलोकतया प्रसिद्धे यदिन्द्रियेण साक्षाद्गृह्यते निर्विकल्पं तत्तु स्पर्शरेखासन्निभम्, यच्च तदनुषक्तमिवाध्यवसीयते तद् बृहन्मण्डलोपमम्[7] । सर्वत्रैव च जिज्ञासुः अर्थार्थी च निपुणगवेषको दृष्टमतिक्रम्य विमृशति चैतन्यार्पितमिवादृष्टाभासं स्वात्मरहस्याभिमुखमुपनिमन्त्रयमाणमिव लोकोत्तरं तत्त्वम् । देहेन्द्रिय–मनः–प्राण–बुद्धि–जीवेश्वर–तत्त्वानि सोपानपङ्क्तिमिवारोहति अध्यात्मानुभूतिः संवेदन-प्रत्यवेक्षणापवर्जनभक्तिभिर्विशुध्यमाना विगलदहङ्कारा ।

ननु शास्त्रप्रमाणके धर्मे क्वानुभवस्योपयोग इति चेत्,

शब्दस्य पौरुषेयत्वात् प्रामाण्ये न स्वतन्त्रता ।
पौरुषेयं हि विज्ञानमनुभूतिनिबन्धनम् ॥ ४ ॥

मतं चेदं नानायुक्तिभिराचार्यैर्विशेषतो बौद्धाचार्यैः प्रतिपादितम्[8] ।

ननु अनुभवस्य अनित्यत्वाद् अनियतत्वात् प्रतिपुरुषभिन्नत्वाद् दुर्वचत्वाद् अदृष्टार्थे चायोग्यत्वात् कथमस्य प्रामाण्यं प्रतिपद्येमहि[9] इति चेत्,

अनुभूतिः प्रमाणं तु स्वस्मिन् निस्संशयं यतः ।
स्वसंवेदनमागम्य निरपेक्षा प्रमाणता ॥ ५ ॥

स्वबोध्यविषयेषु अनुभवस्य प्रामाण्यं दोषसम्भवादयोग्यतया वा सन्दिग्धमपि न व्यभिचारयति तत्प्रामाण्यं स्वसम्प्रयुक्तेषु अपरोक्ष-विषयेषु[10]। पुनश्च प्रामाण्यगवेषणे क्वचित् स्वतःप्रामाण्यम् अभ्युपगन्तव्यम् अनवस्थापरिहारार्थम्[11] । तच्च स्वसंवेदने स्वप्रकाशत्वे वानुभवस्य अवगन्तव्यम्, एतदेव हि ज्ञानं जडाद् व्यावर्तयति[12] । अन्यथा जगदान्ध्य–प्रसङ्गात् ।

अनुभवपरामर्शोऽत्र कीदृशोऽभिप्रेत इत्युच्यते–

व्यावृत्त्या प्रत्ययाः सिद्धास्ते च तत्त्वोपदर्शकाः ।
धर्माणां लक्षणानि स्युर्भावा याथात्म्यदर्शिनः ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्मर्तव्यात्र विज्ञानवादिनां नानाविज्ञानभागकल्पना[13] । तत्र च नीलनिमित्ते प्रतिभासमाने नील इति सञ्ज्ञा दर्शनभागः, नीलत्वप्रकारताबोधोऽपि स एव । एवं नीलत्वप्रत्ययो व्यावृत्त्या सिद्ध्यति, तस्य च लोके सारूप्यात् तत्त्वोपदर्शकत्वं प्रतिपद्यते[14] । नीलादीनां चक्षुरादीनां चायतनस्कन्धादिषु सङ्ग्रहं कृत्वा धर्मस्वभावा लक्ष्यन्ते । धर्मावच्छेदकानि च लक्षणानि अनित्यत्वादीनि वस्तुयाथात्म्यग्राहकाणि[15] । एवञ्च नीलत्व-रूपत्व-स्कन्धत्व-धर्मत्व-सत्यत्वादिषु दृश्यते प्रज्ञावधारणसोपानम् । अभिधर्मे प्रसिद्ध एव धर्म-लक्षण-संग्रहः[16] । किन्तु महायानिकैरद्वैतिभिश्च पाश्चात्त्यैश्च हेगल–ब्रैडले–आदिभिः खण्डितानि लक्षणानि तदन्तर्गतविरोधापादनात्[17] । तथा च–

अन्वीक्षायां तु तत्त्वानां व्याघातप्रतिपादनात् ।
प्रवर्ततेऽद्वया प्रज्ञा विकल्पप्रतिषेधनात् ॥ ७ ॥

विषयस्तु लक्षणानां संवृतिर्व्यवहारो वा, तथा च इन्द्रियंगोचरनिश्रिताद् रूपत्वादारभ्य अनित्यत्वपर्यन्तानि लक्षणानि सांवृतत्वे व्यावहारिकत्वे वा सङ्गृह्यन्ते । धर्ममात्रलक्षणनिषेधेन नैरात्म्य–शून्यत्व–शान्तत्वाद्वयत्वानिर्वाच्यत्वादीनि पुनः परमार्थं सूचयन्ति[18] । अयं च व्यवहारपरमार्थयोर्भेदः सौगतैरद्वैतिभिश्चाभ्युपगम्यते[19] । साधनपक्षे च प्रवृत्ति–निवृत्ति–भेदस्तमनुसरतीव । प्रवृत्तिलक्षणधर्मो व्यवहारसत्यम् अप्रतिपद्य न शक्यतेऽवस्थातुम् । निवृत्तिलक्षणोऽपि पलायनवादाद् । भिन्नश्चेद् व्यवहारनिषेधकं परमार्थमेव प्रतिपद्यते । तथा च ज्ञानात्मा निवृत्तिः समस्तभेदजातं क्रियाकारकविचित्रं वैतथ्यकुक्षौ प्रवेशयति वाङ्मनसातीतं चाद्वैतं प्रकाशयति[20] ।

तथापि न सर्वो व्यवहारः सदृशो नापि सर्वः परमार्थो नापि तयोर्भेद आत्यन्तिकः । तथा हि व्यवहारेऽपि कर्म-योग ईश्वरभक्तिः शीलसमाचार इति वा साधनानि पुष्करपलाशवद् व्यवहारमध्येऽपि निर्लिप्तानि न तत्र निमज्जन्ति[21] । परमार्थस्थिताश्च बुद्धेश्वरादयो निर्माणकायमवतारं वा गृहीत्वा व्यवहारेऽपि संसारिणः स्वकृपया उद्धरन्ति[22] । सिद्धा जीवन्मुक्ताश्च परमार्थदर्शिनो न व्यवहारभूमेर्लोकाद् विलोपमेव गच्छन्ति । उभय-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चारिण इव ते लोके विद्यमाना लक्ष्यन्ते[23] । एवम् आध्यात्मिकानुभूतेः साध्य–साधन–प्रतीत्यात्मिकाया नानाभूमयो विभक्ता विलोक्यन्ते याः शास्त्रैर्मनीषिभिश्च बहुशो निरूपिताः । एवञ्च–

क्रमेणोन्मील्यतेऽध्यात्मबुद्धिः साधनभूमिजा ।
आरोहति परामर्शं प्रज्ञासोपानपर्वसु ॥ ८ ॥
प्रत्ययैर्लक्षणैर्भावैः विचार्या बोधभूमयः ।
प्राचीनानां नवीनानां सन्ति मार्गा अनेकधा ॥ ९ ॥

आध्यात्मिकानुभूतिरन्तर्द्वन्द्वनिवर्तनपुरस्सरा भूमेर्भूमिमारोहति विमृश्यते च प्रज्ञया । तत्तद्भूमियोग्याश्च भावा दृष्टयो दर्शनानि च नानानयप्रतिष्ठितानि व्याक्रियन्ते । तेष्वैकान्तिकतां विहाय अध्यात्म–यात्रा–प्रयाणकानि आलोच्यानीति निराग्रहैः प्रतिपत्तव्यम् ।

परमार्थपर्येषणारम्भः - मृत्युबोधः

"गृहीत इव केशेषु मृत्युना धर्ममाचरेत्" ।

इति यदुक्तं तेन सूच्यते मृत्युबोधजन्यसंवेग एव धर्माचरणस्यासन्नो हेतुः । कैश्चित् त्वाधुनिकैः कीर्केगार्डादिभिर्मृत्युबोधजन्या भयैकाकित्वासहायत्वादिभावा धर्माभिमुख्यहेतुतया उपन्यस्ताः[24] । अन्यैश्च प्राकृतजनस्य मृत्युभयेन धर्ममन्वेषमाणस्य चेष्टां विलोक्य धर्मो भयजनिता कल्पनैव यथा भूतप्रेतादय इति प्रत्यपादि[25] । अत्रोच्यते–

मृत्योर्भयमनुप्राप्ताः पर्येषन्तेऽमृतं पदम् ।
पश्यन्तो हि स्वकं रूपं स्वभावाभासदर्पणे ॥ १० ॥

मृत्युमासन्नं विदित्वा "चेतनसत्तावानहं विनाशमुपैमीति समकालमेवात्मनो मृत्योश्च बोधात् समुपैति धर्मसंवेगम् । आत्मबोधो मृत्युबोधो मृत्योरपरिहार्यत्वबोध आत्मनि चामृतत्वाशंसा इत्येतच्चतुष्टयं समुच्चित्य प्रवर्तयति परलोकधर्मे । स च परलोकधर्मो विदित एवेतिहासेनापि प्राचीनतमो मनुष्याणामिति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मृत्युं समक्षमालोक्य चिरभ्यस्तं स्वात्मभावं विनश्वरं त्याज्यं चावगम्य तद्व्यतिरेकेण स्वामृतत्वमाशंसन् जनो धर्मेऽधिकारमर्जयति परलोकगामिनि । नात्र भयं मुख्यम्, प्रत्युत अपूर्व एव कश्चिदात्मबोधो येन सुपरिचिता देहप्रतिष्ठा विषयासक्तिः, तद्भोक्तृत्वेन च स्थूलदेहाभिमानः झटित्येव तिरस्कारिणीवापसार्यते, पुरतश्च स्थिते विजृम्भमाणमुखे शून्ये सुरसायमाण इव सर्वग्रासिनि मृत्यौ विदेहं छायाभासमिवात्मानं पश्यति । अयं च सूक्ष्मदेहावभासो मृत्युबोधजन्यसंवेगसम्प्रयुक्तः परलोकधर्मस्य शाश्वती प्रतिष्ठा । श्रीमदरविन्दमहर्षिणोक्तमस्मिन्नेव सूक्ष्मदेहबोधे प्रतिष्ठितं होमरमहाकवेर्महाकाव्यम् इलियदाख्यम्[26] ।

कीर्केगार्डादीनां मतं तु अन्यैरस्तित्ववादिभिरेवापास्तम् । सार्त्रादयो हि अस्तित्वविनाशबोधेन न धर्ममभिमुखीभवन्ति प्रत्युत स्वकीयं चैतन्यं जडप्रकृतिविलक्षणं पश्यन्तोऽपि तदनित्यतामपरिहार्यां मन्यमाना वीरायमाणाः स्वतन्त्रतया कृतं स्वकीयं सङ्कल्पितं कार्यमेव सम्पाद्य कृतार्थतामिच्छन्ति । एतन्मतेन आत्मा देहाविनाभावी निस्तत्त्वोऽनित्यश्च, परनिषेधेनैव च स्वास्तित्वं प्रतिपद्यते । स्वातन्त्र्यमेवास्य परमार्थः[27] । मृत्युविषया एतादृशी दृष्टिरद्यत्वे विपुलं प्रचारं लब्धवतीति विचारार्थमत्र उपन्यस्ता । कीर्केगार्डमतेन तु मृत्युं पश्यन् जीवः स्वामेकाकिताम् असहायतां च बुध्यमानः श्रद्धामात्रकृताश्वासः तार्किकसंशयान् परास्य स्वतन्त्रसङ्कल्पलब्धबल ईश्वरं प्रपत्तुमर्हति । एतादृशी प्रपत्तिस्तस्यात्मबलस्य परीक्षैव[28] ।

एतेन ज्ञायते बहुविधो हि मृत्युबोधो न सर्वान् धर्ममभिमुखयति । शूरास्तावद् मृत्युं क्षुद्रहृदयदौर्बल्यं मत्वा तमुपेक्षन्ते । स्मरणीयात्र कथा इलियद् इत्याख्ये महाकाव्ये अखिलीजलुकौनयोः संवादस्य । मृत्योरभयं याचमानाय लुकौनाय तं हन्तुमुद्यतस्य अखिलीजस्य वचनमित्थमनुवदितुं शक्यते[29]–

मूढ, मृत्योः समासन्नादनिवार्याद् विभेषि किम् ।
त्वत्तः श्रेष्ठा नरा याताः प्रयास्याम्यहमेव च ॥

प्राकृता जनाः पश्यन्तोऽपि न पश्यन्ति मृत्युम्, यथोक्तं च –

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अहन्यहनि भूतानि गच्छन्ति यममन्दिरम् ।
अन्ये जीवितुमिच्छन्ति किमाश्चर्यमतः परम् ॥

पुनश्च उद्योगिनः संसारासक्तचित्ता मृत्यौ पुरःस्थितेऽपि "अजरामरवत्प्राज्ञो विद्यामर्थं च चिन्तये"दिति वचनमेवानुसरन्ति । तथा च ब्राउनिंगाख्येन महाकविना प्रसिद्धे स्वकीये काव्ये "वैयाकरणस्य शवयात्रा" इत्याख्ये यद् वैयाकरणचरितं चित्रितं तदत्रोदाहार्यम् । जरद्वैयाकरणो मृत्युमासन्नमुपेक्ष्य व्याकरणाध्ययनमेवापरिशेषं कर्तुं व्यवसितः । पद्यमेकमित्थमनूद्यतेऽत्र[30]–

मृत्युनाक्रान्तकण्ठोऽपि घर्घरायितनिःस्वनः ।
अचिन्तयद् विभक्त्यर्थान् निपातांश्चादिशत्तथा ॥ ११ ॥

यथावद् धर्मसंवेगजनकश्च मृत्युबोधो नचिकेतसो रमणमहर्षेर्वा द्रष्टव्यः । दक्षिणासु नीयमानासु नचिकेतसं श्रद्धा आविवेश स आलोचयत्– "सस्यमिव मर्त्यः पच्यते सस्यमिवाजायते पुनरिति यममेव च तृतीयवरं साम्परायिकं पप्रच्छ येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके" इत्यादिना । आख्यायिकैवेयमिति चेत् तत्रापि तत्त्वनिर्देश एव प्रयोजनम् । पुनश्च रमणमहर्षीणां चरितादैतिहासिकाद् इदं श्रूयताम् तेषामेव वचनैः संक्षिप्यानूदितैः – "मधुरागमनात् पूर्वं षड्भ्यो मासेभ्यो महदिदं परिवर्तनं मम जीविते घटितम् । एकाकी स्वगृहे आसीनोऽहं सहसा महता मृत्युभयेनाक्रान्तः । सर्वथा नीरोगश्चासम्, नातश्चास्य भयस्य हेतुर्व्याधौ क्वचित् सम्भाव्यः । अहमेतदेवान्वभूवमासन्नो मृत्युरिति । मृत्युभयस्याकस्मिकेन आघातेन मम चित्तम् अन्तर्मुखीकृतम् । व्यचिन्तयं देहोऽयं मृतः श्मशानमप्नीतो दाहार्थम्, अहं च रुद्धेन्द्रियो रुद्धवाग् रुद्धश्वासो रुद्धचित्तप्रचारस्तथैव वर्ते सततस्फुरिताहम्प्रत्ययः, ततः प्रभृति मृत्युभयम् अपयातम् आत्मस्फुरणं च नित्यमेवेति"[31] ।

इदमत्रोल्लेखनीयं यद् बहवो जनाः चिकित्सकैर्हृद्गतिनिरोधान्मृता इति विज्ञापिताः पश्चाच्च पुनः अतर्कितहेतुवशाद् उज्जीविताः पृष्टाश्च स्वानुभवमौर्ध्वदेहिकमिवावर्णयन् । बहूनामेतेषां वर्णनानि सादृश्यं प्रदर्शयन्ति, येन सम्परायविषये सम्भावयितुं शक्यते प्रमाणपदवीमनारुह्यापि[32] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मृत्युबोधेन सम्पृक्तश्च नचिकेतसः साम्परायिकः प्रश्नः प्रेतोऽस्ति न वेति, तत्र धर्मं पर्येषमाणस्य दृढ एवायं निश्चयः –

मृत्योरनन्तरं जीवः शिष्यते न तु नश्यति ।
निष्ठैषा सर्वधर्माणां मूलभूता चिरन्तनी ॥ १२ ॥

परलोकनिष्ठैषा आदिमगणजातिष्वपि प्रमाणिता पुरातात्त्विकैः[33] । कथं च परलोकविषयः सहजः संशयो निरसितव्य इत्यत्र प्रमाणान्वेषणे ज्ञानिवचनम् आम्नायः स्वानुभूतिर्वा शरणम् । नाचिकेतोपाख्याने वैवस्वतो यम एव अनन्य उपदेष्टेति कथितम् । भगवत्पादैश्च उक्तं बृहदारण्यक-भाष्योपोद्घाते देहान्तरसम्बन्धिन आत्मनोऽस्तित्वमागमादेवावगन्तव्यं सर्वप्रथमतः । यानि चात्मप्रत्ययलिङ्गानि मीमांसकैस्तार्किकैः प्रस्तुतानि तानि आगममूलान्येव । अत एव च चार्वाका बौद्धा वा न ताभिर्युक्तिभिः प्रसादिताः । इदं त्वत्रावधेयं यद् बौद्धा देहात्मवादिनो न सन्ति पुनर्जन्म च पुरुषस्य प्रतिपद्यन्ते । चार्वाकाः स्वाभिमतप्रत्यक्षवादाग्रहादेव देहातिरिक्त-मात्मानं न प्रतिपन्नाश्चैतन्यं मदशक्तिवन्मन्यमानाः[34] । तथा च भूयांस आधुनिकास्तार्किका अपि चैतन्यं देहव्यवहारविशेषं प्रतिपादयन्ति, देहविकारे चैतन्यविकारस्य उपलब्धत्वात्, आत्मानं पुनः स्वरूपत एव उपलम्भायोग्यं तेनैव हेतुना निराकुर्वन्ति[35] । नोपलभ्यते तस्मान्नास्तीति च युक्तिर्बौद्धैरपि प्रयुक्ता[36] । विषयस्यायोग्यत्वादेव च सा उदयना-चार्यैर्निराकृता[37]। आधुनिकाः प्रत्यक्षवादिनस्तु प्रत्यक्षायोग्यत्वं विषयस्य सत्तायां स्वरूपायोग्यतामाहुः, वेतालानुपलम्भवत्[38] । अयं त्वतिवाद एव प्रत्यक्षवादिनां सर्वथा चानादरणीयो यत उपलम्भोऽपि नेन्द्रियोपलम्भविषयः, नाप्यतीतेतिहासः प्रत्यक्षयोग्यो न वा कश्चिद वादः प्रत्यक्षवादादिः[39] ।

इदमवधेयम्, चैतन्यस्य स्वसंविदितस्य सर्वव्यवहारात् प्राक्सिद्धस्य अनपोह्यत्वम्[40] अतीन्द्रियत्वादेव च ऐन्द्रियाद् देहाद् भेदश्च न्यायतः सूपपाद एव, तथापि चैतन्यस्य नित्यत्वं देहाभावेऽप्यस्तित्वं च दुरुपपादम्[41] । चित्तसाक्षित्वात् कौटस्थ्यम् अनंशत्वाद् चाविकारित्वं सिषाधयिषितम्[42] । विषयविषयिभेदो विषयिणं तस्य पृथगवच्छेद्यत्वेऽपि पृथगस्तित्वशालिनं साधयतीति सन्दिग्धमेव[43] केषाञ्चित्, तथैव चैतन्यस्य द्रव्यत्वम् तद्धर्मकस्य वा अभौतिकत्वं न सिद्धम्[44] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उपनिषत्सु स्थूलदेहच्छायोपमत्वं सूक्ष्मदेहापन्नस्य जीवस्य उल्लिखितम् उपलभ्यते । तथा च छान्दोग्ये प्रजापतिना इन्द्रविरोचनसंवादे छायात्मना प्रतिबिम्बात्मना वा परिख्यायमान आत्मा दर्पणे अप्सु वा स्थूलदेहाभिन्न एवेति देहात्मवादो विरोचनरुचिरो व्याख्यायि, सूक्ष्मदेहस्तु स्वप्ने परिख्यायमान इन्द्रेण विवेचितः[45] । माण्डूक्येऽपि अयमेवच्छायात्मा तैजस इति व्याख्यातः[46] । स्वप्नस्य जागरितनिबन्धनत्वेऽपि स्वप्नद्रष्टा जागरितद्रष्ट्रभिन्न एव स्मृत्यविच्छेदेन चैतन्यावच्छेदेनेति स्वानुभूतिसिद्धं सर्वस्य, तथापि चित्तावस्थाभेदेनायं भेदो व्याख्यातुं शक्य इति न तत्र स्वप्नमात्राद् देहान्तरस्य सूक्ष्मस्य सिद्धिः[47] । देहातिरिक्तस्यात्मनोऽस्तित्वे तु विश्वजनीनः सर्वागमिकः चिरन्तनः सम्प्रदाय एव मुख्यं प्रमाणम्, तत्समर्थने च विशिष्टा अनुभूतय उदाहरणीयाः । यथा रमणमहर्षीणां पूर्वोक्ताः, यथा वा टेनिसनमहाकवेः स्वनाम उपांशु जपतः[48] ।

तथापि किंस्वरूपोऽयमात्मेत्यत्र नानामतानि नानासम्प्रदायेषु । भगवत्पादैः साङ्ख्य-काणाद-मीमांसकादीनां विप्रतिपत्तय उदाहृताः[49] । पाश्चात्त्येषु जीवो ज्ञानकर्मशक्तिश्चित्तादनतिरिक्त एवाभ्युपगम्यते, न चापि सर्वथा विदेहः स कल्प्यते । एवञ्च सामीयधर्मेषु मृत्योरनन्तरं देहस्य पुनरुज्जीवनकालाच्च प्राग्जीवोऽव्यक्तचैतन्य एव तिष्ठतीति प्रतिपद्यते[50] ।

ननु मतभेदोऽयं किं जीवविषये अज्ञानमेव न सूचयति सर्वे शास्त्रसम्प्रदाया हि आगममूला अपि जीवास्तित्वं प्रतिपद्यन्ते, न तु तत्स्वरूपं निर्धारयन्त्यैकमत्येन । विवदमानाश्च ते अज्ञानमेव किं न दर्शयन्ति यथा पूर्वोल्लिखितायां तथागतनिदर्शितायाम् उदानसङ्गृहीतायां जात्यन्धकथायाम् । कथं च धर्मं प्रतिपित्सव एतादृशे जटिले ब्रह्मजाले निबध्यमाना धर्मे आश्वासं लभेरन्[51] । अत्र इदं प्रतिवचनम् । धर्मोपयोगिनी श्रद्धा अन्या, दार्शनिकमतप्रतिपत्तिरन्या । दर्शने तार्किकविकल्पनाद् विप्रतिपत्तयोऽनवस्थाश्चापरिहार्याः । अनवस्था हि तर्कालङ्कार इत्युक्तम्[52] । धर्मप्रतिपत्तौ तु श्रद्धाया दार्ढ्यं निष्कम्पता च अपेक्षिता प्रशस्या च । तथा च न तार्किकदर्शनं श्रद्धाधारो भवितुमर्हति, नापि धर्मदर्शनं निरागमं विशुद्धतर्काधारं वा । श्रद्धया प्रस्थितेऽपि तस्मिन् न तर्कोऽनुपयोगी । तर्केण

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

असम्भावना विपरीतभावना च निवार्या, एवं श्रद्धामार्गे कण्टकनिवारणमेव तर्कस्य धर्मे साहाय्यम्, यथा दण्डनीतिः सदाचारपथे कण्टकशोधनी तथैव आन्वीक्षिकी श्रद्धापथे । श्रद्धाविषयाणां सूक्ष्मैः प्रत्ययैरवधारणक्रमेण तु सा तत्र असंख्यसंशयापादनाद् विघ्नमेव कदाचिद् उत्पादयेत् । तथा चोक्तम्– "अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्" । देहाभावेऽपि सम्भवित्वं चैतन्यधर्मस्य आत्मन इत्येतावदेव तर्केण प्रतिपाद्यम्, न तु आत्मा एतत्स्वरूप इति निश्चयस्तर्केण कर्तव्यः । प्रत्यक्षयोग्यत्वाभावे अनुमानस्यापि आत्मा अविषय आगमम् अनवलम्बमानस्य, तथा च अप्रत्यक्षे विषये स्वरूपविकल्पाः संशयमेव जनयन्तीति सुविदितम्, तथा च प्रत्यपादि धर्मकीर्तिना। एवञ्च परलोकधर्माय यावदपेक्षितो विश्वासस्तावद् आगमसम्प्रदायेन विशिष्टानुभवैश्च समर्थितेन लभ्य इत्यवगन्तव्यम् । एवञ्चाध्यात्मिकी श्रद्धा आगमसम्प्रदायजन्या आस्तिक्यबुद्धिस्तर्कप्रवणेन दर्शनेन साक्षाद् न साध्यते नापि बाध्यते, तयोः पृथगवस्थितयोर्विषयभेदात्[53] । श्रद्धाविषयः प्रत्यक्षानुमानागोचर आगमैकगम्यो यथा मृत्योरनन्तरं प्रेतस्य अस्तित्वम् । दर्शनविषयस्तु सम्भाव्या अर्था विकल्पा वा नित्यापरोक्षा वा, न तु प्रत्यक्षगोचराणि तथ्यानि तद्धर्मा वा अनुमानगोचराः । प्रत्यक्षानुमानमात्रसाध्यं बाह्यार्थविषयं ज्ञानं तु विज्ञानमेव । तथा शल्यचिकित्सा देहविषयं प्रत्यक्षविज्ञानमाश्रित्य प्रवर्तते । रोगो भूतावेशात् सम्भवी न वेति संशये दर्शनप्रवृत्तिर्युक्ता । रोगः प्राक्तनकर्मफलमेवेति प्रतिपत्तिः श्रद्धामात्रमवलम्बते । एवं विभिन्ना एव विषया विज्ञानदर्शनधर्माणाम् । ननु प्रेतादीनामनुभवविषयत्वाद् विज्ञानविषयत्वम्, जीवयोनिविशेषतया आत्माभिन्नत्वाच्च तेषां दर्शनविषयत्वमपि, इति चेद् बाढम्, अतीन्द्रियं प्रत्यक्षं स्वीक्रियते चेत् प्रेतविज्ञानमपि स्वीकार्यं स्यात्[54] । स्वानुभूतिपरामर्शात्मकं तु दर्शनं माण्डूक्यादिश्रुतिषु उदाहृतमेव । वस्तुत औपनिषदमात्मविज्ञानम् आगमरूपमपि आत्मदर्शनमिति वक्तुं शक्यम् ।

तथा च प्रेतोऽस्तीति निश्चितेऽपि तद्विषये नानावितर्कसहजा उत्पद्यमाना जिज्ञासा अनिवार्या असमाधेया अपि नानाधर्मसम्प्रदायेषु विविधं समाधीयन्ते, तथा–

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रेतस्य कीदृशं रूपं गतिर्वा तस्य कीदृशी ।
निश्चया अत्र धर्माणां विभिद्यन्ते तु भूयसा ॥ १३ ॥
केचिन्नराकृतिं प्रेतं केचित् सूक्ष्मं मनोमयम् ।
चित्तातिरिक्तमात्मानं केचित्सूक्ष्मं न्यरूपयन् ॥ १४ ॥

बहुषु प्राचीनधर्मेषु प्रेताश्छायाकाराः पृथग्लोकनिवासिनः कल्पिताः, तथा च प्राचीनयवनधर्मे[55] । प्राचीनमिस्रधर्मे स्थूलदेहातिरिक्तौ द्वावन्यावात्मानौ ब–क–इत्याख्यौ स्वीकृतौ, तौ च मृत्योरनन्तरं देहं पुनरुज्जीवयताम् ऋत्विजां कार्यं समर्थयतः[56] । प्राचीनवैदिकधर्मेऽपि प्रेताः पितृलोकं गता वर्ण्यन्ते[57] । सामीयधर्मेषु मृत्योरनन्तरमव्यक्तवदवस्थिता जीवाः कर्मफलनिर्णयसमये पुनरुज्जीविताः स्वर्गं नरकं वा उपयन्ति[58] । बौद्धा मनोमयमेव जीवं मन्यमाना देहातिरिक्तं चित्तादनतिरिक्तं मृत्योः समकालमेव पुनर्जातं प्रतिपादयन्ति च्युतिक्षणमेव च प्रतिसन्धिक्षणम्[59] । आर्हतेषु[60] साङ्ख्यादिषु[61] च देहचित्तातिरिक्ता एव जीवाः ।

यथा मृत्योरन्तरं जीवः शिष्यते न तु विनश्यतीति सर्वैर्धर्मैः प्रतिपद्यते तथैव सर्वैः साम्परायिकगतिरेतज्जन्मकृतकर्मणां फलत्वेन निश्चीयते । प्रेतस्य अस्तित्वं निश्चितम्, तस्य रूपम् अवस्थितिदेशकालौ कर्म च कल्पनाव्यूढं विप्रतिपत्तिसंवृतं चेति वक्तव्येऽपि प्रेतनियतिः कर्मापेक्षया निर्धार्येति सर्वसम्मतं प्रायेण, किञ्च तन्नियामकं कर्म कालश्च तत्फलरूपा गतयः इत्यत्र तु दृश्यते प्रपञ्चो मतजालस्य ।

कर्ममूलां गतिं प्राहुः सर्वे धर्मा असंशयम् ।
कर्मस्वरूपे हेतुत्वे गन्तव्ये मतयः पृथक् ॥ १५ ॥

'यथात्राचरति तथैवातः परं भुङ्क्ते' इति सामान्यनियमे स्वीकृते[62] स्वाभाविका इमे प्रश्नाः – कथं कर्मफलानुरूप्यं निश्चीयते, को नु कर्मेतिवृत्तमभिलिखति संरक्षति च, का विधिसंहिता दण्डपुरस्कारनियमावलिरूपा, को निर्णयं कुरुते, निर्णयं च पुनः कश्चरितार्थं करोति? एते प्रश्ना मानवव्यवहारप्रतिमानका इति बहुभिस्तेषां युक्तत्वं संशंस्यते । अन्यैश्च तेषां स्फुटमेव सकल्पनाविलासम् उत्तराणि दत्तानि पुराणानि च रचितानि[63] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रायेणात्र द्विविधानि मतानि लभ्यन्ते । केचिदीश्वरवादिन ईश्वरमेव नियमविधातारं निर्णयकर्तारं कर्माभिज्ञं च प्रतिपादयन्ति । यद् यन्मनुष्यः कुरुते तत्सर्वमीश्वरो जानाति कर्मानुरूपं च फलं परलोके विधत्त इति तेषां प्रतिपत्तिः । निरीश्वरवादिनः पुनः कर्मैव पुण्यपापात्मकं संस्काररूपेण अपूर्वरूपेण वा विद्यमानं स्वतोऽपूर्वद्वारा वा फलदायकं मन्यन्ते । उभयोः पक्षयोः संशयाः सावकाशाः । ईश्वरश्चेत् सर्ववित् फलदातृतया च न्यायकारी, कथं स कृपालुर्व्याख्यातव्यः[64] । न्यायोऽपि वा कथं दृष्टादृष्टलोकद्वयविभक्तो व्याख्येयः ? परलोके कर्मानुरूप्यं विदधानः किं श्रेय ईश्वरस्तदानुरूप्ये पश्यति । सकृदेव चेत् पुरस्करोति दण्डयति च यथा सामीयधर्मेषु, न किमपि ततः साध्यं स्यात् । ईश्वरेण नियमाः पुरुषाणां श्रेयःसाधनार्थमेव विहिता इति तदवहेलनेन तेषां श्रेयो विहतं स्वयं स्यादिति किमर्थं पुनरपि ते परलोके दण्डनीयाः । यथा असद्भोजनेन अजीर्णत्वं गतो न वैद्येन पुनर्दण्ड्यते प्रत्युत चिकित्स्यते, प्रमाददग्धो बालकोऽपि न पुनस्ताडनमर्हति । एवमेव ईश्वरविहितनियमानाम् अनुपालनेन लङ्घनेन च मनुष्याः स्वहितमहितं वा विदध्युरस्मिन् लोके, न तदर्थं ते पुनरपि तादृशं फलं परलोके प्रापणीयाः । परलोके च तेषां स्वातन्त्र्याभावाद् नवीनं कर्म तत्फलं वा सम्भवि न स्यात् । न हीश्वरेण राजवत् स्वादेशमहिमस्थापनार्थं प्रजा इव मनुष्या दण्ड्या अनुग्राह्या वा लोकान्तरे । न वा तथा विधानेन इह व्यवस्था दृढीभवेत् परलोक-फलानामिह अविदितत्वात्, नापि परलोके व्यवस्था रक्षणीया तत्र मनु-ष्याणां स्वातन्त्र्याभावात् ।

पुनश्च यैरेकमेव जन्माभ्युपगम्यते तैरिह दृष्टे भोगवैचित्र्येऽपि हेतु-र्वक्तव्यः । तत्र केचित् क्रिस्तानुयायिनो निसर्गसिद्धं मूलं पापं प्रतिपादयन्ति यद्वशान्मानवा दुःखं पापप्रवृत्तिं चास्मिन् जन्मनि लभन्ते[65] । केचिदन्ये ईश्वरेण जन्मनः प्रागेव सर्वेषां भाग्यं प्रतिस्वं नियतमिति प्रतिपादयन्ति[66] । सामान्यतया क्रिस्तीयमतेन मूलपापापसारणार्थम् ईशपुत्रे प्रपत्तिः संस्का-राश्च ईश्वरकृपाद्वारभूता अपेक्षिताः, तथा च प्रायश्चित्ताचरणं सदाचारो भक्तिश्च पापविशुद्धये पुण्यार्जनाय च साधनानि मतानि यथाशास्त्रो-पदेशम्[67] । केचिद् अनुष्ठानादिषु विगतश्रद्धा भक्तिमेव प्रधानीकुर्वन्ति[68] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भारतीयधर्मेषु पुनर्जन्माभ्युपगमोऽपूर्व एव देशान्तरेष्वप्रसिद्धः[69] । अविद्याक्लेशकर्माणि रचयन्ति संसारबन्धम्[70] । तपसा ज्ञानेन भोगेन च स क्षपणीयः । बौद्धैः स्थिरमात्मानमस्वीकुर्वद्भिर्विज्ञानसन्तान एव संसारित्वेनाभ्युपेयते । स्थिरात्मनोऽभावे कथं कर्मफलभोगो न्याय्यः स्यादित्यत्र प्रवाहरूपेण ते कर्मफलानुपूर्वीं स्वीकुर्वते[71] । आर्हतैः सहैव ईश्वराभावं व्याचक्षाणास्ते कर्मैव स्वतः फलदायकं प्रतिपादयन्ति । यथा पितुर्ऋणं तदुत्तराधिकारिणं सुतं बध्नाति तथैव कर्तृविज्ञानवासना उत्तरवर्तिभोक्तृविज्ञानम्[72] । सुख-दुःखभोगः स्वयंकृतः परकृत उभयकृतोऽनुभयकृतो वेति विकल्पचतुष्टये भगवता बुद्धेन विचारार्थं निर्दिष्टे, विभज्यैव हेतुर्नानाभोगेषु वक्तव्यः[73] । प्राचीनकर्मवादेन प्रथमः स्वयंकृतत्वपक्षः सविशेषमनुमतस्तदुपपादनार्थं च जन्मान्तरकल्पना समर्थिता[74] । लोकायतिकैः प्राचीनैर्नवीनैश्च परकृतत्वपक्षः प्रायेणाश्रीयते, तथा च लभ्यते दण्डनीत्या अवकाशः प्रजानां हितसुखविधानस्य[75] । लोके जनसमवायं समानकर्मतया संस्यन्दिनं दृष्ट्वा उभयकृतत्वपक्षो युक्तो भाति । स्थिरात्माभावपक्षे सूक्ष्ममनोविज्ञानगम्ये शुद्धसंस्कारपुञ्जोऽयमिति प्रतिपादिते अनुभयकृतत्वपक्षो युज्यतेतराम्[76] । अस्मिन् पक्षे ज्ञानेन कर्मबन्धनान्मुक्तिः सम्भवति । यथा अनुपायमार्गे[77] ।

परलोकधर्मे त्रिविधानि कर्माणि सङ्गृहीतानि लक्ष्यन्ते आनुष्ठानिकानि आराधनात्मकानि सदाचारात्मकानि चेति । आनुष्ठानिककर्मकाण्डपक्षो मीमांसकैः 'यागादिरेव धर्म...' इति समुद्घोषयद्भिः प्रबलं प्रतिपादितः । प्राचीनासु जातिषु तदीयधर्मेषु कैथलिकधर्मसङ्घे चायं प्रकारो धर्मस्य सुप्रचलितः । ऋतशब्देन आचारनियमो यागादिरपि च व्यपदिष्ट इति विदितमेव[78] । यावज्जीवं संस्कारनिर्वर्तने देवोपासने तत्तत्कामावाप्तये च नित्यनैमित्तिककाम्यानि कर्माणि अनुष्ठेयानि । एवञ्च धर्मो नाम श्रेयःप्राप्तिनिमित्तभूता अनुष्ठेयविधिसंहिता प्रतिभाति । कथं यागादिकर्मानुष्ठानमीश्वरमनपेक्ष्यैव परलोकहितावहमिति तु दुःसमाधेयमेव । चार्वाकैराधुनिकैश्चैतादृशः कर्मकाण्डो दृष्टकार्यकारणनियमानतिक्रम्य फलदानं प्रतिजानानो मिथ्याडम्बर एव विज्ञाप्यते[79] । ज्ञानिभिश्च

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृष्ण-बुद्ध-नानक-कबीरादिभिः कर्मकाण्डं विहाय शीलाधियोगो ज्ञानमीश्वरभक्तिश्च श्रेयसे उपदिष्टा । 'यागादेः स्वर्गप्राप्तिः' इत्यत्र चार्वाकः कामपि उपपत्तिं न पश्यति स्वर्गस्य कार्यकारणभावस्य च असिद्धत्वात्[80] । बुद्धादयस्तु स्वर्गं न निषेधन्ति तत्साधनार्थं तु सदाचारमेव पर्याप्तं मन्यन्ते । ईशपुत्रेण यीशुना क्रिस्तेनापि प्रसिद्धे गिरिशिखरोपदेशे उद्घोषितम्– विमलचेतसा अद्रोहेण सौहार्देन भक्त्या च स्वर्ग ईश्वरसान्निध्यरूपः प्राप्तव्य इति[81] । हेलियोदोरेणापि भागवतेन प्राचीनं भागवतं मतमित्थं निर्दिष्टम्– त्रीणि अमृतपदानि स्वर्गद्वाराणि दमस्त्यागेऽप्रमादश्चेति[82] ।

निर्गलितार्थस्त्वयम् – परलोकनियामकत्वं कर्मसु विविधं कल्पितम् । नानाधर्मसम्प्रदायेषु केचिद् विधिना कृते कर्मणि शक्तिं कल्पयन्ति अदृष्टसंस्कारोत्पादनद्वारा फलप्रदानस्य, अन्ये ईश्वरकारित्रमेवात्र पश्यन्ति[83] । तत्र कोऽयं कर्मगतविशेषो येन कर्म धर्मपदमारोहतीति प्रश्नो विचार्यः । केचिद् धर्मो विधिरूपः शाब्दीभावनेति वा नियोग इति वेति प्रतिपादयन्ति[84] । कथं तु शब्देन कर्म वैशिष्ट्ययोजितं भवतीति न सुबोधम् । शब्दः कर्तारं प्रेरयेत्, कर्म निर्दिशेत्, वक्तुरभिप्रायं विज्ञापयेत्, कर्मस्वरूपं न तेन भिद्यते । ननु यथा राजनियोगेन कर्मणाम् अपराधादिव्यवस्था क्रियते तथैव शास्त्रेणापि पाप-पुण्य-व्यवस्था क्रियते कर्मस्विति चेत्, न, निषिद्धादिकर्मणामपराधादितुल्यता चेत् तेषां दण्डाद्यनुषङ्गं सूचयन्तः शास्त्रविधयोऽपि व्यवहाराङ्गमेव भवेयुः, यथा विवाहादिनियमेषु स्फुटं दृश्यते[85] । अन्यथा व्यवहारं विडम्बयेयुर्वा यथा यागादिषु प्रायश्चित्तादिविधयः[86] । राज्ञादिष्टानां निषिद्धानां वा कर्मणां कर्त्ता राजशक्त्यैव फलं प्राप्नोति, न कर्मनिष्ठया शक्त्या । तथा च यागादीनां शक्तेः किं मूलमिति त्वनुत्तरितमेव ।

कर्मणः फलहेतुत्वमूलं शब्दः स्याद् इच्छा वा मानवस्येश्वरस्य वा । शब्दोऽपि लौकिक इच्छोद्भूत एव । नित्योऽपौरुषेयश्च कल्प्यमानः शब्दः प्रेरणात्मकश्चेत् सोऽपि लोकोत्तरेच्छाप्रतिरूप एव स्यात्, तथा च सर्वेष्वपि विकल्पेषु इच्छैव कर्मफलदात्री स्यात् । ननु वृक्षात् फलं पततीत्यत्र केच्छायाः शक्तिरिति चेत्, सत्यं जडपदार्थानां परिस्पन्दात्मकेषु कर्मसु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दृष्ट-कार्य-कारण-भाव एव व्याप्रियमाणो लक्ष्यते, तथापि आद्यप्रवर्तकत्वं तत्रापि चेतनेच्छाया एव युज्यते । चेतनाधिष्ठितेषु कर्मसु तु स्वाभाविक-फलातिरिक्तफलानि दण्डपुरस्काररूपाणि प्रयोक्त्रा प्रयोजकेच्छयैव लभ्यानि स्युः । ईश्वरेच्छा चेन्न स्वीक्रियते कर्मणां फलानि दृष्टान्येव स्युः, न पारलौकिकानि ।

इदमपि च स्मर्तव्यं यत् कर्म मूलत इच्छैव कर्तुः । तथा च स्मर्यते "चेतना चेतयित्वा च कर्मोक्तं परमर्षिणा" इत्यादि[87] । चेतनाशब्दोऽत्र सङ्कल्पमेव द्योतयति मानसकर्मात्मकम्[88] । कर्मकर्तुर्मानवस्य चेतनानिष्ठ एव कश्चिद् विशेषस्तदीयानि कर्माणि धर्ममधर्मं वा करोति । स तु चेतना-प्रयोजकश्चेतनासम्प्रयुक्तो वा विशेषः स्यात्, यागादिविषया श्रद्धा वा ईश्वरीयनियमानुपालनभक्तिर्वा, निष्कामकर्तव्यबोधो वा, परत्र मैत्रीकरुणादि-र्भावो वा । यागादिविषया श्रद्धा तु यागादिसाध्यप्रयोजनोपरक्ता तदैव वस्तुतो धर्मः स्याद् यदा प्रयोजनं श्रेयः श्रेयस्करं वा स्यात्, श्रेयस्त्वं च काम्यार्थेषु विवेकगोचरमेव, न हीष्टत्वेनैवार्थस्य श्रेयस्त्वं निष्पद्यते, अपि तु प्रियत्वे सति विवेकोपसंहितत्वेन[89] । विवेकोऽपि निःस्वार्थतया पौरुषार्थगवेषी परिणामदर्शी च भवति । एवञ्च परमार्थतः कुशल-हेतुप्रयुक्तत्वमेव चेतनात्मकस्य कर्मणो धर्मत्वे कारणम् । चिरन्तने याग-बल्यादिप्रधाने परलोकधर्मे इदं लक्षणं व्यभिचरति, तच्च चिरन्तनैरपि दृष्टम् – "क्रूरा वा एतत्कुर्वन्ति यत्पशुं सञ्ज्ञपयन्ति" इत्यादि कथ-यद्भिः[90]। चिरन्तन-परलोक-धर्मस्यान्तर्विरोधादेव विशुद्धतरधर्मावधारणं भागवत- बौद्धादिधर्मप्रस्थानेषु प्राकाश्यमगमत् ।

एकतो मृत्योर्घोरं रूपं जनयति मानवानां चेतस्सु संवेगं साम्परायिकम्, आत्मानं त्रातुं च प्रवर्तयति तान् अनुष्ठानाद्यवलम्बनेन, निदर्शनं च तस्य प्रस्तूयते यागादिभिः श्राद्धादिभिश्च, विचित्राकारैश्च शवनिधानागारै-र्महास्तूपैर्घनत्रैपार्श्वैकैर्मिस्रदेशीयैर्विहसद्भिरिव कालम्[91] । अपरतो जन्म-यौवनोद्गमपरिणयवार्धकादिजीवनयात्राप्रयाणकानि रहस्याच्छन्नानि प्रेरयन्ति मानवान् अज्ञातविषयाभासोद्गताभिश्चिन्ताभिः, सकौतूहलैश्च भयोद्वेगैः[92] । दृष्टविषयेषु प्राकृतेषु मानवीयेषु च व्यापारेषु अदृष्टशक्तिः काचिद् लक्षिता

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्राचीनतमैरपि मानवगणैः । इयमेव चादृष्टशक्तिरन्तर्बहिश्च मानवेषु सम्भाव्यमाना अविदितस्वरूपा नानादेवरूपेषु कल्पिता । यथा बाह्याः पिण्डा देवविहितं स्वभावमनुवर्तन्ते तथैव मनुष्या अपि देवविधानमनुवर्तितुमर्हन्ति । इदं च सर्वनियामकं विधानं वेदेषु ऋतमिति सञ्ज्ञितम् । ऋतं नाम देवव्रतमेव प्रतिमानमिव च मानव-कर्मणाम् । यद् देवैः पूर्वं कृतम्, यन्नित्यमेव दिवि विद्योतते तन्मनुष्यैरनुकरणीयम् । यज्ञविधिषु च रूपं क्रियते ऋतस्य । तैरेव विधिभिः संस्कार्याणि मानवकर्माणि[93] । तथा चोक्तम् –

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्[94] ॥

सर्वमपि मानवचरितं जन्मनो मृत्युपर्यन्तं व्याप्तं यज्ञेन संस्कारविधायकेन देवप्रसादकेन कृतार्थत्वप्रदायकेन च । एवञ्च यज्ञानुष्ठानबुद्धिर्देवप्रतीत्या ऋतबुद्ध्या श्रेयःसाधनबुद्ध्या च परिगता यज्ञं कामधेनुमिव साक्षात् पुरस्करोति । एवञ्च ऐहिकं पारत्रिकं च श्रेयः साधयन् यज्ञो लक्ष्यीभवति कणादस्य धर्मलक्षणस्य–' "यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः" इति[95] । न केवलं वेदेषु, अन्यत्रापि प्राचीनेषु धर्मेषु नैसर्गिकाणि प्रवृत्तिजनितानि कर्माणि संस्कार्याणि नानानुष्ठानैः । काम्यानि आभ्युदयिकानि अरिष्टनिवारकाणि च विविधान्यनुष्ठानानि निर्दिष्टानि सर्वत्र । अयं यागादिः सार्वत्रिकः प्रवृत्तिधर्मो मानवस्य ।

प्रवृत्तिधर्मो द्विविधः प्राचीनोऽभिनवस्तथा ।
आर्षः पुरातनो धर्मः श्रौतानुष्ठानलक्षणः ॥ १६ ॥
इहामुत्र हितान्वेषी यज्ञात्मा च प्रधानतः ।
आख्यायिकाप्रवादी च निष्कम्पः क्षुण्णवर्त्मनि ॥ १७ ॥
अध्यात्मगुणसम्पत्त्या नीत्या लोकानुकम्पया ।
ईशभक्त्या प्रयुक्तश्च मर्यादालक्षणो नवः ॥ १८ ॥
विशोधनेन भावानां प्रज्ञया च स्वतन्त्रया ।
कर्तव्यबद्धेरुन्मेषो युगान्तरवशात्तथा ॥ १९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जायते, स्वोदयं किन्तु न नवीनमभिमन्यते ।
अन्विष्यन्मौलिकं रूपमाश्वासं चाप्यलौकिकम् ॥ २० ॥
एकतः स्थिरमर्यादा दृष्टादृष्टनिबन्धनाः ।
उपास्यन्ते यथाप्राप्तं लोके राज्य इवैश्वरे ॥ २१ ॥
व्यवस्था कर्मणोऽदृश्या सर्वलोकविधारिका ।
अन्तर्गृहीतभेदापि सर्वधर्मेषु सम्मता ॥ २२ ॥
लोकेऽनुविधित्सन्ति स्वस्वबुद्ध्या विकल्पिताम् ।
दिव्याया मानवीं व्याख्यां स्वस्वशास्त्रीयसंहिताम् ॥ २३ ॥
कथं लोकोऽनुवर्तेत मर्यादा विधितक्षिताः ।
अनुष्ठाने तथोपास्तावाचारव्यवहारयोः ॥ २४ ॥
इत्यत्र नानाधर्मेषु वैमत्यं दृश्यते स्फुटम् ।
केचिद् धर्मशास्त्रीयतन्त्रमिच्छन्ति शासने ॥ २५ ॥
स्वातन्त्र्यं शासितुः केऽपि मार्गाणां च नृणां तथा ।
धर्मस्य स्वस्य श्रेष्ठत्वं सर्वेषां वा समानताम् ॥ २६ ॥
भाग्ये लोकव्यवस्थायामनाश्वासात्तथा युगे ।
अन्यतोऽन्विष्यते हेतुरतिक्रामी नियामकः ॥ २७ ॥
आर्ता देवोन्मुखा वा स्युर्विषमे समुपस्थिते ।
युगधर्मे व्यवस्थायां प्रतिस्वं नियतौ तथा ॥ २८ ।

प्रवृत्तिधर्मो नैहिकीं चर्यां हेयपक्षे निक्षिपति प्रत्युत लोकानुभ ।न श्रेयांसि पारलौकिकैः सहैव सिषाधयिषति । तत्र साध्ये सुखात्मक ।प्यवधारिते न साधनं लौकिकनीतिमात्रव्यपाश्रयम् । प्रवृत्तिधर्मे सा ।बुद्धिर्दृष्टहेतुफलभावं तद्विज्ञानं वा नाद्रियते प्रत्युत क्वचिददृष्टविधया क्वचिच्चातर्क्यश्रद्धयाथवा अहेतुकतया कर्तव्यतामात्रं प्रतिपद्य प्रवर्तते । एवञ्च सकामतानिष्कामतान्यतरावच्छिन्नकर्तव्यताबुद्धिनिबन्धनः प्रवृत्तिधर्म इति वक्तुमुचितम् ।

कर्तव्यबुद्धिश्च सा त्रिधा लक्ष्यते – ऋतानुष्ठानबुद्धिः, शीलाचरणबुद्धिः, लौकिकभूमिकानिर्वाहबुद्धिश्चेति । कर्तव्यबुद्धेरेते भेदाः प्राचीनविवरणेषु साधारणधर्म–वर्णाश्रमधर्म–राजधर्मादिशब्दैः शील–शीलव्रत–

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गृहिविनयादिशब्दैर्वाभिधीयन्ते[96] किन्त्वेतेषु भेदलक्षणानि न स्फुटानि, अद्यत्वे कर्त्तव्यबुद्धिविभाग आनुष्ठानिकः सामाजिको नैतिकश्चेति क्रियमाणो लक्षणभेदमपि प्रकाशयति । याज्ञिकानुष्ठानेषु संस्कारेषु वा कर्तव्यबुद्धिः अदृष्टहेतुषु श्रद्धातः प्रवर्तते फलाभिसन्धिरपि न तां धर्मपदाच्च्यावयति । कर्तव्यबुद्धिर्वर्णाश्रमाद्यभिमानात् प्रवर्तमाना नानाजनसमाजेषु तदीयव्यवस्थानिबन्धना भवति व्यवहारपरम्परां समयं नीतिं वा पुरस्कृत्य । नैतिकी कर्तव्यबुद्धिरहेतुका भवति फलाभिसन्धिवर्जिता । केचित् तत्रापि परिणामाकलननिपुणां नीतिं हेतुतया कल्पयन्ति, अन्ये ईश्वरनियोगं श्रद्धाविषयम्[97] । एवं कर्तव्यबुद्धेर्मूलं श्रद्धा–विवेक–नीतीनां त्रितयं त्रिधा निर्देष्टुं शक्यते ।

अपरिवर्तनशीलेषु समाजेषु गतिमान्द्याद्वा अलक्ष्यपरिवर्तनेषु त्रयोऽप्यमी पंक्षाः कर्तव्यबुद्धेरन्योन्यसंश्लिष्टा अभिन्ना इव उपलभ्यन्ते । यथा वर्णाश्रमधर्मे वैधानुष्ठानानि यागादीनां, लौ॥ककव्यवहाररीतीनामनुपालनं, विशुद्धकर्तव्यबुद्ध्या च कर्मवर्त्मानुसरणमिति सहैव त्रीणि लक्ष्यन्ते अविश्लिष्टानि, एवञ्च साधारणधर्मा जात्याद्यनवच्छिन्ना जातिजानपदधर्माश्चानन्तवैचित्र्यभाजोऽत्यन्तभिन्ना अपि वर्णाश्रमधर्मे गजपदे पदान्तराणीव निलीयन्ते[98] । एतेनैव हेगलीयव्याख्याने ज़ितलिशकाइत इत्याख्यं तत्त्वं विस्मरत इव वेबरस्य तिरस्कारो वैदिकधर्मस्य– "नात्र अनवच्छिन्नत्वं शीलनियमानामवबुद्धं सर्वत्र तत्तदधिकारनियतत्वादस्येति" स्वयं तिरस्कार्यः [99] । यदा च सामाजिकं परिवर्तनं त्वरितगत्या प्रवर्तते युगं च युगान्तरे क्रामतीव, तदाऽभ्यस्ता व्यवस्था कालात्यस्तेव प्रतिभाति । तथा च महाभारते युगान्तप्रतीतिश्चित्रिता "श्वः श्वः पापीयदिवसा पृथिवी गतयौवनेत्यादिना[100] । अर्जुनो महायुद्धाद् भीत इव कृष्णं शाधि मां त्वां प्रपन्नमिति ययाचे वासुदेवश्च तं कालानलसन्निभं स्वकीयं रूपं लोकक्षयकरं प्रदर्शयामास[101] । तस्मिन् अव्यवस्थितप्राये युगे सर्वाचारव्यवहाररीतयः संशयविषया जाताः । तथा च श्रीमदरविन्दमहर्षिभिरुक्तम्–व्यासस्य प्रतिभा धर्मसंकटग्रस्तप्रश्नमीमांसाप्रवणा, न तत्र किमपि यदतिक्रामति विषयतां पर्यनुयोगस्येति[102] । एवमेव बुद्धस्य भगवतोऽपि कालः संक्रान्तिकाल इति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुविदितम्[103] । तदापि नानापरिव्राजका भिन्नानि दर्शनानि प्रवर्तयामासुः । तथा द्वापरान्ते भगवान् कृष्णोऽवतीर्णो यागप्रधानकर्ममार्गस्थाने विशुद्ध-कर्मयोगस्य भक्तिसमवेतस्य प्रवर्तनार्थम्, तथैव कलाववतारभूतो भगवान् बुद्धोऽपि शीलसमाधिप्रज्ञामयं मार्गमुपदिदेश यज्ञधर्मं च निनिन्द[104] । भागवताः सौगता आर्हताश्च सर्व एव यज्ञानुष्ठानं पशुहिंसामलिनं कामोपहतं च हेयं विज्ञाप्य वर्णाश्रमधर्ममपि उपेक्ष्य जातिकृतं वैषम्यं च अयुक्तं निर्धार्य साधारणधर्मान् एव भक्तिसहितान् दयापरमान् सर्वमानवेभ्य उपादेयान् प्रतिपादयामासुः । भागवता आसन्नतरा अपि वैदिकधर्मस्य न यज्ञधर्मं नापि धर्मे जातिकृतमधिकारं स्वीचक्रुः[105] ।

एवमेव यदा यह्वोपासका असुरजातीयैर्बाबेरूशासकैश्च उत्पीडिता अभूवंस्तदा तेषु तीर्थकरा 'आदेशका' भाववादिन इति व्यपदिष्टा विशिष्टाः सम्बभूवुः[106] । यीशोर्धर्मोऽपि नानाधर्मसंस्कृतिसङ्गमप्रदेशे एशिया- महाद्वीपस्य पश्चिमान्ते प्रथममुद्बभूव । प्रसारोऽप्यस्य तदा विशेषेण जातो यदा रोमीयं साम्राज्यं पतनशीलमासीत् । तदा च व्यवस्थाक्षयम् अशान्तिं चालक्ष्य विचारका लोकोत्तरमाश्वासम् अन्विष्यन्ति स्म समाजे, इतिहासे प्रतिस्वं नियतौ च[107] । सर्वत्र च ईश्वरदत्तो नियमो यीशुसन्देश-प्रकाशित आशाप्रभास्वरो लक्षितः । यीशुशरणगमनेन प्रतिस्वं पापान्मुक्ति-रुद्धारश्च भावीति प्रतिपन्नं श्रद्धालुभिः, तथा च सङ्घशरणगमनात् समाजे ईश्वरीयनियमस्थापनं दृढायत इति च । अगस्तिनूनामकैराचार्यैश्च इतिहासे साम्राज्यानामुत्थानपतनलीलायाम् आसुर्याः सम्पद एव क्षयो न्यरूप्यत ईश्वरस्य च इतिहासनाट्ये सूत्रधारत्वम्[108] ।

एवमेव श्रमणसम्प्रदाया अपि जातिधर्माद् राजधर्माच्च पराङ्मुखा अध्यात्मसाधने भिक्षुसङ्घे च आश्वासं गवेषमाणा धर्मस्य तत्त्वं गुहायामेव अपश्यन् । इदमपि न विस्मयकरं यत् ते केवलं हृदयगुहायां ध्यानेन तत्त्वमन्वेष्टुं न सन्नद्धाः, अपि तु बाह्यपर्वतेष्वपि गुहालयनानि विचित्रा-ण्यकारयन्[109] ।

यद्यपि श्रमणाः कर्मैव संसारनियामकं जगन्नियामकं च अवधारया-मासुः, अन्ये भागवतादयः क्रिस्तीयादितुल्या ईश्वरमेव परमनियामकत्वेन प्रतिपन्नाः । तथा च भगवता वासुदेवेन अवतारवादः प्रकाशितः –

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्"[110] इत्यादिना ।

य एव धर्मसंस्थापको युगविधारकश्च स एव सर्वभूतगुहाशयोऽपि [111] । एवञ्च प्राचीनयज्ञधर्मगतनानादेवानां गणराज्यमिव विहाय प्रवृत्तिलक्षणो धर्म ईश्वरस्यैकच्छत्रे राज्ये सदाचारं कर्मसंहितभक्तियोगं च प्रधानीकृत्य अवस्थितः । प्रवृत्तिलक्षणं धर्मम् अप्रतिपद्यमाना अपि भिक्षुभ्यः, श्रमणनिकाया उपासकेभ्यस्तमनुमेनिरे, यज्ञधर्मं विहाय ईश्वरस्थाने च त्रातारं महापुरुषं बुद्धादिरूपं प्रतिष्ठापयामासुः । एवञ्च विशुद्धशीलनिश्रित ऐहिकपारत्रिकाभ्युदयसाधक उपासकधर्मः श्रमणेषु प्रवृत्तिधर्मविशेष एव । कालान्तरे व्यवहारे च श्रमणधर्मानुयायिनो वैदिकसंस्कारान् नानालोकधर्मांश्चानुष्ठितवन्त इति ज्ञायते उदयनाचार्यादिवचनैः[112] । ईश्वरवादानुगृहीतश्च स्मार्तो धर्मः प्रवृत्तिं निवृत्तिं चाविरोधेन प्रतिपादयामास । तथा च प्रशस्तपादाचार्याः "धर्मः पुरुषगुणः कर्तुः प्रियहित-मोक्ष-हेतुः,अतीन्द्रियः अन्त्यसुखसंविज्ञानविरोधी, पुरुषान्तःकरणसंयोगविशुद्धाभिसन्धिजो वर्णाश्रमिणां प्रतिनियतसाधननिमित्तः" । इत्यादि व्याचक्षाणाः साधनेषु सामान्यधर्मान् वर्णाश्रमधर्मैः सहैव विस्तरेण प्रत्यपादयन्[113] । तथा च गीताभाष्ये भगवत्पादाः "अभ्युदयार्थोऽपि यः प्रवृत्तिलक्षणो धर्मो वर्णान् आश्रमांश्च उद्दिश्य विहितः स देवादिस्थानप्राप्तिहेतुरपि सन् ईश्वरार्पणबुद्ध्या अनुष्ठीयमानः सत्त्वशुद्धये भवति फलाभिसन्धिवर्जितः । शुद्धसत्त्वस्य च ज्ञाननिष्ठायोग्यताप्राप्तिद्वारा ज्ञानोत्पत्तिहेतुत्वेन च निःश्रेयसहेतुत्वमपि प्रतिपद्यते" इति स्पष्टमूचुः । एवञ्च स एव प्रवृत्तिलक्षणो धर्मः कर्माणि विदधानः प्रवृत्तीर्नियमयन्[114] निष्कामकर्मयोगतया भक्तियोगतया च प्रतिपद्यमानो निवृत्तिलक्षणं ज्ञानं मोक्षं च परम्परया उपकरोति ।

एवञ्चार्थं सूचयन्ति कारिकाः –

त्रयः प्रकारा धर्मस्य साध्यसाधनभेदतः ।
प्रवृत्तिश्च निवृत्तिश्च परावृत्तिस्तथैव च ॥ २९ ॥
लौकिकान् केचिदिच्छन्ति भोगान् स्वर्गोचरानपि ।
अदृष्टहेतुनिष्पन्नान् दृष्टादृष्टसुखात्मकान् ॥ ३० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तदीयं साधनं कर्म शास्त्रप्रोक्तमुपासनम् ।
मर्यादापालनं चैव शास्त्रविद्यानुसारतः ॥ ३१ ॥
विप्रकृष्टाभिसम्बन्धः कथं वा कर्मणां भवेत् ।
प्रध्वस्तं वा कथं कर्म सूते योग्यतया फलम् ॥ ३२ ॥
दृष्टेन हेतुना लभ्ये फले नादृष्टकल्पना ।
युक्त्या नीत्यां विलीयेत धर्मो निरदृष्टकः ॥ ३३ ॥
चेतना कर्मयोगः स्यान् निष्कामा शुद्धभावजा ।
व्यञ्जयन्ती स्वमात्मानं शीलेऽध्यात्मगुणान्विते ॥ ३४ ॥
कर्तव्यमात्रनिष्ठायां न्याये लोकहितैषिणि ।
भजने जगदीशस्य नानोपायोपवर्णिते ॥ ३५ ॥

प्रवृत्तिशब्दो बहुधा प्रयुज्यते । एकतो ज्ञानपूर्वा प्रवृत्तिरवधार्यते यथा घटयागपाकादिसाध्या कपालहविस्तण्डुलाद्युपादाना जलाहरणस्वर्गौदनाद्युद्देश्या, अपरतो देहिनामिन्द्रियविषयेषु सहजापि प्रवृत्तिर्लक्ष्यते यथा बुभुक्षा-रिरंसादिः । तत्र प्रथमे प्रकारे चिकीर्षायाः कृतिसाध्यत्वधिया इष्टसाधनत्वधिया च सम्प्रयुक्तत्वेऽपि सा श्रेयोऽभिमुख्येव न प्रेयोमात्राभिमुखीति न निश्चीयते । अपरस्मिन् प्रकारे तु प्रवृत्तिः प्रेयोमात्रमन्वेषते । श्रेयःसाधनतया धर्मः प्रवृत्तीर्नियमयन् प्रवृत्तिधर्म आख्यायते । तद्यथा रिरंसादिर्विवाहादिना नियम्यते । ननु यागादेरपूर्वविधिरूपत्वाद् धर्मः प्रवर्तकत्वादेव प्रवृत्तिधर्म इति चेत्, न, तत्रापि यागादिलभ्यार्थस्य इच्छाविषयत्वात् स्वर्गादेः सुखरूपत्वकल्पनाद् अस्त्येव काचित्प्रवृत्तिः प्राथमिकी या पूर्वाविदितसाधनोपदेशेन अपूर्वविधिरूपेण कृतार्था भवति । एवञ्च सोऽपूर्वविधिरपि नाकामस्य प्रत्युत स्वाभीष्टार्थं सिषाधयिषतः । अतश्च या सहजा सुखार्था प्रवृत्तिः सैव कल्पनाबलेन नित्योत्तममौर्ध्वदैहिकं सुखं विषयीकुर्वती साधनविषये नियम्यते यागादिविधिनेति वक्तव्यम्– "चोदनालक्षणोऽर्थो धर्मः" इति वदता जैमिनिनाप्यर्थपदग्रहणेन धर्मं चरिष्यतः इच्छात्मकप्रवृत्तेः पूर्ववर्तित्वं सूचितम् । तथा च मनुनोक्तम्–

कामात्मता न प्रशस्ता न चैवेहास्त्यकामता ।
काम्यो हि वेदाधिगमः कर्मयोगश्च वैदिकः ॥ इति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुनश्च –

"सङ्कल्पमूलः कामो वै यज्ञाः सङ्कल्पसम्भवाः ।
व्रतानि यमधर्माश्च सर्वे सङ्कल्पजाः स्मृताः" ॥ इति च ।

भागवतेऽपि स्फुटमेवोक्तं धर्मस्य नियमरूपत्वम् ।

कर्मनियमात्मको धर्मो लोकमर्यादोल्लङ्घनपरानुद्दामकामानेव दमयति । एवं कामात्मिकां प्रवृत्तिम् इन्द्रियाणां परागृवृत्तिन्निबन्धनामनुमन्यमानोऽपि प्रवृत्तिधर्मो न प्रेयसि विश्राम्यति अपि तु कामसंयमनपरोऽन्ततो निष्कामतामेव पुंसि अवतारयितुं यतते । स्मर्यते चात्र–

"कर्माकर्मविकर्मेति वेदवादो न लौकिकः ।
वेदस्य चेश्वरात्मत्वात्तत्र मुह्यन्ति सूरयः ॥
परोक्षवादो वेदोऽयं बालानामनुशासनम् ।
कर्म मोक्षाय कर्माणि विधत्ते ह्यगदं यथा ॥
वेदोक्तमेव कुर्वाणो निःसङ्गोऽर्पितमीश्वरे ।
नैष्कर्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः" ॥ (भागवते)

एवं कर्मयोगात्मकः प्रवृत्तिधर्मो निष्कामतां सम्पादयंश्चित्तविशुद्धिद्वारा ज्ञानयोगं भक्तियोगं चोपकरोति । अदृष्टश्रद्धामूलं यागाद्यनुष्ठानम्, परम्परायातसंस्कारानुकूलं लोकमर्यादानुपालनम्, निष्कामतापुरस्सरा च कर्तव्यबुद्धिरिति नैका भूमयोऽस्य कर्मयोगस्य । परिणतिश्चास्याध्यात्मयोगे ज्ञानभक्त्यात्मके ।

आधुनिकाः प्रायेण सदाचारनीतिमेव धर्मसारं प्रतिपादयन्ति । तन्मतेन शीलनिश्रितकर्तव्यबुद्धिः परमो धर्मः, कर्तव्यबुद्धिश्च शास्त्रसमयादिनिरपेक्षा स्वविवेकजा फलाभिसन्धिवर्जिता । शर्मण्यदेशीयैः काण्टाचार्यैरेतादृशमेव लक्षणं धर्मस्य बुद्धिसम्मतस्य प्रत्यपादि । द्विविधो विधिरुपलभ्यते । एकस्मिन् प्रकारे फलापेक्षया कर्म विधीयते यथा लाभार्थिना वाणिज्यमाश्रयणीयमिति । विदेशं चेद् जिगमिषसि विमानेन याहीति वा । अपरत्र हेतुनैरपेक्ष्येण ऐकान्तिकतयैव कर्म विधीयते यथा सत्यं वदेति । प्रथमप्रकारको विधिर्हेतुहेतुमद्भावोपसंहितः सापेक्षः, द्वितीयप्रकारको निरनुबन्धो निरपेक्ष

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ऐकान्तिकश्च । सर्वान्प्रत्यविशिष्टश्चायं विधिस्तुल्यत्वात् स्व-परयोः । यत्स्वस्मै युज्यते तत्सर्वेभ्योऽपीति मत्वा स्वीक्रियते शुद्धकर्तव्यबुद्धिः । अयं द्वितीयः प्रकार एव सदाचारविधिषु लक्ष्यते, अन्यथा आचारविधिर्व्यवहार-नीतेरभिन्नः स्यात् । स्वतन्त्र एव पुरुषः सदाचारपालने समर्थः । स्वातन्त्र्याच्च पुरुषः प्रकृतेरतीतः सिद्ध्यति । सदाचारो नान्ततो निःसुखो भवितुमर्हतीति परलोके न्यायशेषस्य सुखस्य सम्भवित्वमपि युक्तम्, तत्प्रदाय-कत्वेन चेश्वरास्तित्वमपि युज्यते । एवं शुद्धकर्तव्यबुद्धिरूपो धर्मोऽर्थतः स्वातन्त्र्यममृतत्वमीश्वरसत्तां चापादयतीति काण्टाचार्याणां मतम् ।

इदमत्र पर्यनुयोज्यम्, कथमात्मसाधारणतया अहेतुकतया कल्पितो निरवच्छिन्नो विधिः स्वीकर्तव्यः कश्च हेतुस्तमध्यात्मगुणैर्योजयन् सत्कर्म-विधिं करोति । विधेर्विषयः स्फुटमेव न हेतुः, विषयाणां नानात्वात् । निरवच्छिन्नप्रकारत्वमेव विधेर्वैशेष्यं चेद् भावनाया नियोगस्य वा सर्वसाधारणश्च हेतुरन्वेष्टव्यः । वस्तुतो निःस्वार्थबुद्धिहेतुकत्वमेव तत्र प्रतिपत्तव्यम्, तथा चात्मौपम्यबुद्धिजन्या उदात्ता भावा एव साधारणधर्मेषु निष्कामकर्मसु अध्यात्मभावनासु च प्रयोजका द्रष्टव्याः । काण्टाचार्यमतेन विषयेन्द्रियसंयोगपरतन्त्रत्वाद् इच्छायाः प्रेयोबुद्धिरिष्टबुद्धिर्वा श्रेयोबुद्धे-र्नितान्तं भिन्ना । श्रेयोबुद्धिः पारमार्थिकात्मपरामर्शसम्भवा विवेकात्मिका, नेच्छारूपा । विवेकबुद्धिरियमध्यात्ममूला कार्याकार्ये प्रभुवत् शास्ति निःस्वार्थत्वादहेतुका स्वपरवैषम्यशून्या च । एतादृशो विवेकनिबन्धन आचार एव सदाचारः, स च धर्मो बुद्धिसङ्गतः ।

यदि कर्तव्यबुद्धेः शीलभावनायाश्चाध्यात्मपरामर्शसम्भवत्वं न स्वी-क्रियते, तर्हि सदाचारो लोकाचार एव पर्यवस्येद् धर्मश्च नीत्याम् । उपपत्तिश्चास्य पक्षस्य लोकायतदर्शनेनैव सम्भवति । तदस्वीकारे तु परमार्थाज्ञेयत्वस्वीकारेऽपि स्वतन्त्रविवेकनिबन्धनः सदाचारात्मको धर्मः स्वीकार्यो भवति । तथाप्याचारनियममात्रावधृतो धर्मो न कस्यचित् स्थायिनमावहति हृदयतोषम् । सुखनिरपेक्षतया क्रियमाणं कर्म चित्तं विशोधयदपि आसक्तिबन्धनं च शिथिलयदपि किं स्वत एव परमपुरुषार्थमारोहयति पुरुषम् ? यथा सकामकर्मानुयोगो दृढयति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वासनाजालं तथैव निष्कामकर्मयोगस्तच्छिन्दन् चित्तविशुद्धिद्वारा प्रतिष्ठापयति पुरुषं बुद्धियोगे वैराग्यं जनयन् । तथा चोक्तं भगवता–

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय ।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥
बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।
तस्माद् योगाय युज्यस्व योगः कर्मसु कौशलम् ॥
यदा ते मोहकलिलं बुद्धिर्व्यतिरिष्यति ।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥
श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥

एवं प्रवृत्तिधर्मः कर्मयोगपरमः स्वान्तर्व्यापारेणैव वैराग्यबोधं जनयति । तथा च अदृष्टबुद्धिसंवलितः कर्तव्यबोधश्चेत्प्रथमं सोपानमध्यात्मारोहणस्य वैराग्यबोधो द्वितीयं सोपानम् ।

वैराग्यबोधोऽयं नासीदेव बहुषु प्राचीनधर्मेषु । प्राचीनमिस्रसभ्यतायां मृत्युबोधे स्फुटेऽपि नाजायत वैराग्यबोधः । एषैव स्थितिः प्राचीनसामीयधर्मेषु प्राचीनभारोपीयधर्मेषु चीनदेशे च । वैराग्यबुद्धेः स्फुटः प्रकाशः प्रथमतः श्रमणधर्मेषु भारतीयेषु लक्ष्यते । बौद्धजैनागमेषु महाभारते च बहुशो वैराग्यपरं काव्यं सन्दृश्यते । मध्यकालिके क्रिस्तधर्मेऽपि वैराग्यमूलकः संन्यासधर्मो भिक्षुचर्या च स्वीकृता, तथा च केषुचिद् मुहम्मदीयभिक्षुनिकायेष्वपि । प्रायेण यावद् ऐहिकं जीवितं सकृदेव लभ्यमिति प्रतिपद्यते न तावद् वैराग्यबोधः स्थायित्वमाप्नोति । मृत्युरेव सकृल्लभ्यस्य सुदुर्लभस्य यथाशक्यमप्रहेयस्य जीवितस्य अनित्यत्वं द्योतयन् परलोकचिन्तां जनयति । सा चेह समुचितकर्मानुष्ठानार्थं प्रेरयति । सकृन्मृत्युबोधः प्रवृत्तिधर्ममेवाभिप्रेरयति पुमांसम् । संसारवादाभ्युपगमे तु जन्ममृत्युपरम्परा दीर्घदीर्घतरा भीषयते जन्तुम् । "पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम्" । एवञ्च दुःखबहुलत्वादनित्यत्वाच्च भोगानां संसारो दुःखलक्षणो व्याख्यातः सर्वैरपि भारतीयैर्धर्मैर्दर्शनैश्चेति सुविदितमेव । सन्तोषपरमाणि सुखान्यपि दुःखपक्षे निक्षिप्तानि । नेदं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दुःखसत्यं प्राकृतजनस्य सुबोधम्, यस्तु सूक्ष्मवेदनशीलोऽक्षिपात्रकल्पस्तस्य पुनरसन्दिग्धम् । एवं कर्ममूलकपुनर्जन्मरूपं संसारवादमभ्युपगम्य दुःखसत्यं प्रतिबुध्य नानाब्राह्मणश्रमणनिकाया वैराग्यपूर्वं संन्यासं नैष्कर्म्यं भिक्षुचर्यादिकं च निःश्रेयसार्थमुपादेयं मेनिरे । यथैहिकं सुखं तथैव पारत्रिकमपि नश्वरमेव । अशेषानित्यसुखं दुःखं मत्वा दुःखहानिमैकान्तिकीमात्यन्तिकीं च संसारोपरमे प्रतिपादयामासुः सर्वदर्शनानि । तस्याश्च मुक्तिरित्याख्यापि सुप्रचलिता ।

संसारचक्रमवगम्यापि केचन आस्तिकाः कर्मैव मुक्तिमार्गमाचख्युः । निष्कामकृतैः कर्मभिः प्रक्षीणपापा अनुपचितकर्माणो देहत्यागेनावसितप्रारब्धा न पुनर्जन्मार्हन्ति प्रत्युत मोक्षमेवावाप्नुयुरिति तेषामभिमतम् । तेषु केचिदीश्वरानुगृहीतं कर्मैव मोक्षहेतुमाहुः । ईश्वराराधनमेव तादृशे कर्मणि प्रधानम् । मृत्युभयजनितसंवेगप्रतिबोधितसम्परायः प्रवृत्तिधर्मः कर्तव्यबुद्धौ जगदीश्वरबुद्धौ च प्रतिष्ठितस्तीव्रानित्यत्वबोधेन विचाल्यमानः सुखान्वेषणस्थाने मुक्तिमेवान्वेषते विरक्तेभ्यः । पुनर्जन्माप्रतिपद्यमानाः सामीयधर्माः क्वचिद् वैराग्यं स्वीकुर्वाणा अपि स्वर्गमेव नित्यं कल्पयित्वा कर्मोपसंहितभक्त्या प्राप्यं मन्यन्ते । संक्षिप्य इदं वक्तुं शक्यते–

अनित्यमसुखं लोकं मत्वा भोगेषु निःस्पृहाः ।
हित्वा प्रवृत्तिमिच्छन्ति निवृत्तिं सूक्ष्मवेदिनः ॥ ३६ ॥

प्रवृत्तौ चैतन्यस्य आत्मविस्मृतिपूर्वमिव बहिर्मुखत्वं लक्ष्यते । ईश्वरभक्तिस्तत्राप्यवश्यमेव अन्ततोऽन्तर्मुखत्वं कारयेत्, यथोक्तं योगसूत्रेषु– "ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावाश्चेति",[115] तथापि निवृत्तिस्तु स्वमूलभावे चैतन्यस्य निवर्तनरूपा प्रत्यग्भावात्मिका साक्षादेव महाफला ।

नानापथविभक्तेषु निवृत्तिवादिषु सन्त्यनुगतानि विषमाणि च लक्षणानि । तदेवं वक्तुं शक्यन्ते संगृह्य सामान्यानि लक्षणानि–

संसारान्मुक्तिमिच्छन्ति मृत्योश्चैवामृतं पदम् ।
भोगमात्रनिवृत्तिं च शान्तिं चैवोत्तमोत्तमाम् ॥ ३७ ॥
परमार्थो निराभासो निर्विशेषोऽविकल्पकः ।
आत्मनैवाभिसम्बोधाद् वेद्योऽविद्यातमोऽत्यये ॥ ३८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संसारोपरमम् अमृतत्वप्राप्तिं सुखदुःखभोगनिवृत्तिं परमां शान्तिं च निःश्रेयसे निर्दिशन्ति निवृत्तिमार्गाचार्याः । अविद्यातृष्णाकर्माणि जन्महेतुत्वेन प्रसिद्धानि येषु पूर्वपूर्वापाये उत्तरोत्तरापायः । तत्र अविद्यास्वरूपविषये सन्ति बह्व्यो विप्रतिपत्तयः, तथापि मिथ्यात्मबुद्धिरेव सर्वत्र अविद्यास्वरूपमिति वक्तुं शक्यते । एवं निवृत्तिमार्गो ज्ञानमार्ग एव सम्पद्यते । ज्ञानं च आत्मानात्मविवेकस्तत्त्वसाक्षात्कारपर्यन्तः । तत्त्वमपि क्रोडीकृतानात्मनिषेधं स्वरूपमेव प्रत्यग्द्रष्टुरविवेकोऽपि तत्रानात्मनि आत्मबुद्धिरेव मुख्या । तथा च बौद्धा अपि आत्मानं प्रतिषेधन्तोऽपि स्कन्धेष्वनात्मसु आत्मबुद्धिमविद्यां व्याचख्युः । एवं सर्वैरपि निवृत्तिमार्गिभिः संसारदुःखोद्विग्नैः स्वाभ्यस्तदेहेन्द्रियादिभोगविरक्तैः कोऽहमित्येव प्रथमतो जिज्ञास्यम् । भगवान् बुद्धोऽपि अमृतपदं पर्येषमाणो नात्माभावमात्रमुच्छेदमात्रं वा प्रतिपन्नः । शाश्वतोच्छेदान्तद्वयं हित्वा मध्यमां प्रतिपदं हि स उपदिदेश । उक्तञ्च–

"यत्र स्वरूपबोधो न तत्रास्तित्वनास्तित्वे प्रकृतिगुणसमवेते इति"[116] ।

सुखदुःखयोरिन्द्रियविषयसम्प्रयोगजन्यत्वाद् मुक्तौ च करणविगमादात्यन्तिक एवाभावस्तयोः । न तु भोगाभावोऽभावमात्रं चैतन्यलयो वा शून्येऽपि शान्तिरूपत्वान्मुक्तेः । तथा च सौगतानामपि प्रसिद्धं "शान्तं निर्वाणमिति" । जीवन्मुक्तलक्षणान्यप्यत्र गीतोक्तानि समालोच्यानि । भेदाश्च नानानिवृत्तिमार्गाणामेव प्रतिपाद्याः –

अनिर्वाच्येऽद्वये तत्त्वे द्विविधो भात्युपक्रमः ।
नैरात्म्यवादिनः केचिदपरे ब्रह्मवादिनः ॥ ३९ ॥
सम्प्रदायभिदा द्वेधा ब्रह्मवादिषु लक्ष्यते ।
ईश्वरवादिनः केचित् केचिन्निर्गुणवादिनः ॥ ४० ॥
ईश्वरवादिनः केचिल्लोकेऽस्मिन् निःस्पृहा अपि ।
आनन्दं परमे लोके वाञ्छन्तीश्वरसन्निधौ ॥ ४१ ॥

इदं तु स्मर्तव्यं न मुक्तिश्चित्तवृत्तिविशेषः प्रमाणादिः प्रत्युत आत्मनैवात्मनो बोधः स्वरूपस्थेन द्रष्ट्रा परमार्थावगमो वा । कः परमार्थमवगच्छति, कया शक्त्या, क्व च चित्तं तदा तिष्ठतीत्यादिप्रश्नेषु नानाप्रतिपत्तयः प्रसिद्धाः । तासु सतीष्वपि सन्त्येव परमार्थस्य कानिचन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लक्षणानि सुविदितानि । तथा च परमार्थ इन्द्रियमनोबुद्धिगोचरविलक्षणत्वाद् निर्विकल्पः सामान्यविशेषहीनश्च । नापि करणगोचरः परमार्थः स्वरूपशक्त्यैव विज्ञेयत्वात् । कथमन्यथा निरुद्धचित्तप्रचारः प्रत्यावृत्तधीः सर्वसाक्षिप्रकाशं पश्येदुषसमिव तमोऽत्यये । सौगता अपि आत्मप्रतिषेधकाः प्रत्यात्मवेद्यं वदन्ति परमार्थम् आत्मना भगवानवेदीन्मौनेनेति च । वेदनं चात्र न ग्राह्यग्राहकभेदपूर्वम्, नाप्यज्ञातज्ञापनवत् प्रत्युत विदिताविदितकोटि-भेदासङ्गृहीतम् अनाद्यज्ञाननिवर्त्तनादेव[117] ।

नन्वद्वैतवेदान्तमहायानसम्मतत्वेऽप्येतादृशपरमार्थस्य, नान्यैर्नानात्व-वादिभिरीश्वरवादिभिर्वा स तथा प्रतिपद्यते । बाढम्, तत्तु शास्त्रोक्त-लक्षणदृशा, नाप्तवचनदृशा । तथापि च प्रकारान्तरेणेदमेव स्वरूपं परमार्थस्यापतति सर्वत्र । सर्वत्रैव ईश्वरवादिषु ईश्वरः परमार्थरूपो न वाङ्मनसगोचरः स्वरूपेण । यत्तु ईश्वरवादिन्यपि न्यायदर्शने मुक्तावनुभव एवापलप्यते, निरीश्वरवादिनि साङ्ख्येऽपि कैवल्ये तथैवानुभवापलापो दर्शनान्तरेष्वपि च परमार्थस्य नानानिरूपणं तत्र हेतुः शास्त्रीयतर्काग्रह एव । वस्तुतः शास्त्रीयग्रन्थेभ्यः परमार्थलक्षणं विकल्पनात्मकं तर्काश्रयं च लभ्यते । स्वमुख्यतत्त्वोपपादनार्थमेव तेषां मुख्यो यत्नः, न तु आगमवेद्यपरमार्थानुभूतिविवरणे । न्यायदर्शने व्यवहार्यपदार्थानां लक्षण-प्रमाणनिरूपणमेव मुख्यम् । मुक्तिस्तु व्यवहारोपरमात्मिका आत्मद्रव्यस्य स्वविशेषगुणाभाव एवाविद्याविगमात् । एवं चानुमानेन व्यवहाराभावतया साध्या मुक्तिर्न साक्षात्कारगोचरा तद्दर्शने । तथा च साङ्ख्येऽपि कैवल्यं तत्त्वान्यतिक्रामति, आप्तागमादेव च सिद्ध्यति, कथं केवलिनो वा वचनं सिद्ध्येद् निर्माणकायमन्तरा कथं वा निर्माणकायः पुरुषाधिष्ठानं विनेति तु न तद्दर्शने विचार्यते । एवं तर्कव्यपाश्रयाणि दर्शनशास्त्राणि न परमार्थानुभूतेरवगमाय मुख्यप्रमाणभूतानि । मुख्यं प्रमाणं त्वत्र आप्त-वचनान्येव । परमार्थविषये रहस्यवेदिनां वचनानि विशेषेण आलोच्यानि । तेषु सर्वधर्मेषूपलभ्यमानेषु परमार्थानुभवस्य द्वे दिशौ लक्ष्येते–स्वात्मलीनस्य निर्गुणस्य शून्यस्येव, स्वप्रकाशकस्यानन्तगुणविवर्तस्य सतश्च ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ज्ञानयोगाधिरूढनिवृत्तिसाधनयात्रायाश्चरमं प्राप्यमतिक्रामत्येव मानवबुद्धिं मानववाचं च । केचिन्मनीषिणस्तल्लक्ष्यं शून्यतया वर्णयन्ति वाचो व्यवहारपरत्वं निर्वर्ण्य, केचित् सद्रूपेण सर्वविवर्तमूलेन अनपोह्यत्वं विमृशन्तः सतोऽनुभवमात्रव्यापिनः । वर्णनानि तानि स्वयं विकल्परूपाण्येव, तत्र विदितप्रतिषेधेन विदिततुल्यतया च तत्त्वं निरूप्यते । एवञ्च 'अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते' । नानाधर्माणां दर्शनानां च यानि व्यावहारिकाणि लक्षणानि तत्त्वानि च तान्येव तुलनार्थं निषेधार्थं च उपादीयमानानि स्वगतभेदैः परमार्थनिरूपणमपि भेदयन्ति । तद्यथा न्यायदर्शने मुक्तिर्द्रव्यविशेषे गुणाभाव इति निरूप्यते, साङ्ख्ये प्राकृतगुणासङ्गतया, हीनयाने धर्मनिरोधतयेत्यादि ।

नैरात्म्यवादिनः सर्वधर्मप्रतिषेधेन शून्यतामेव परमार्थं प्रतिपादयन्तीति सुविदितम् ।

"यः प्रतीत्यसमुत्पादः शून्यतां तां प्रचक्ष्महे ।
सा प्रज्ञप्तिरुपादाय प्रतिपत्सैव मध्यमा" ॥

तथापि न शून्यता भावप्रतियोग्यभावतया व्याख्येया, नापि निष्प्रतियोगिकोऽभावः कल्पयितुं शक्यः । एवं शून्यता सदसदभिनिवेशिसांवृतदृष्टिप्रतिषेध एव । तथा च–

"शून्यता सर्वदृष्टीनां प्रोक्तं निःसरणं जिनैः ।
येषां तु शून्यता दृष्टिस्तानसाध्यान् बभाषिरे" ॥

अपनीतदृष्टिबन्धनस्त्वार्यो निस्स्वभावं जगत् परमार्थतोऽभिन्नं पश्यति–

"संसारस्य न निर्वाणादस्ति किञ्चिद् विशेषणम् ।
निर्वाणस्य न संसारादस्ति किञ्चिद् विशेषणम्" [118]।

एवञ्च योगाचारनयेऽपि ग्राह्य-ग्राहकभावविगमे विज्ञप्तिमात्रता- सिद्धौ परावृत्तिर्जायते चित्तस्य । तथोक्तम्–

"धर्माणां परमार्थश्च स यतस्तथताऽपि सः ।
सर्वकालं तथाभावात् सैव विज्ञप्तिमात्रता ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यावद् विज्ञप्तिमात्रत्वे विज्ञानं नावतिष्ठति ।
ग्राहद्वयस्यानुशयस्तावन्न विनिवर्तते ॥
यदा त्वालम्बनं ज्ञानं नैवोपलभते तदा ।
स्थितं विज्ञानमात्रत्वे ग्राह्याभावे तदग्रहात् ॥
अचित्तोऽनुपलम्भोऽसौ ज्ञानं लोकोत्तरं च तत् ।
आश्रयस्य परावृत्तिर्द्विधा दौष्ठुल्यहानितः ॥
स एवानास्रवो धातुरचिन्त्यः कुशलो ध्रुवः ।
सुखो विमुक्तिकायोऽसौ धर्माख्योऽयं महामुनेः"[119] ॥

क्लेशावरण-ज्ञेयावरणहानित आलयविज्ञानमेवानास्रवधर्मकायत्वेन परावर्तते । अस्य च महायानसूत्रालङ्कारे विस्तरो द्रष्टव्यः । तत्र स्पष्टमभिहितम्–बुद्धत्वं सर्वधर्मा इति । चैतसिकदोषवशाद् बुद्धबिम्बं सर्वगतमपि न दृश्यते । दोषावरणक्षयाच्चित्ताश्रय एव बुद्धकायत्वेन परावृत्तिं याति । इन्द्रियमनोविषयविकल्पप्रतिष्ठामैथुनाकाशसञ्ज्ञाद्यमेयपरावृत्तावमेयविभुता सम्पद्यते–

"इत्यमेयपरावृत्तावमेयविभुता मता ।
अचिन्त्यकृत्यानुष्ठानाद् बुद्धानाममलाश्रये"[120] ॥

एतेन सूच्यते यद् नैरात्म्यं भावयन्नपि सुगतानुयायी प्रज्ञाप्रकर्षे निवृत्तिं परावृत्तिरूपामनुभवति संसारनिर्वाणयोरभेदं सर्वधर्मबुद्धत्वस्वरूपम् । तथैवाद्वैतिनोऽपि निर्गुणब्रह्माद्वैतानुरोधिनोऽपि ब्रह्मण आत्माभिन्नतया जगद्धेतुतया प्रियत्वहेतुतया च प्रतिपादनादात्माद्वैतानन्दसागर एव निमज्जयन्ति ज्ञानिनम् । सदृशमेवानुभवं प्रतिपादयन्ति आगमिकाद्वैतवादिनोऽपि । अन्ये चागमिका नैगमिकाश्च संसारविरक्तस्य भगवद्भक्तस्य ईश्वरसान्निध्यद्वारा कल्पयन्ति परमानन्दं लोकोत्तरे लोके वैकुण्ठनित्यवृन्दावनादिव्यपदेश्ये ।

ज्ञानात्मिकाया मुक्तिलक्षणाया निवृत्तेरपि किमस्ति कश्चिद् विशिष्टतरः पुरुषार्थ इत्यत्र विप्रतिपद्यन्ते मनीषिणः । मुक्तेः शान्तिरूपता सर्वस्वीकार्या, ये पुनस्तस्या अनुभवराहित्यं सुखरूपतां वा स्वीकुर्वते न ते ततः परं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुरुषार्थं कल्पयन्ति । तथापि माहायानिकैः शैवशाक्ताद्यागमविद्भिर्भगवद्-भक्तैर्योगिभिश्च सूचितो मुक्तिमप्यतिशयानः कश्चित् परो योगः । माहा-यानिकैः करुणाप्रयोजिता बोधिसत्त्वचर्या मुक्तिचर्यातः श्रेयसीति प्रति-पाद्यते[121] । एवं स्वदुःखनिवृत्तेरुत्कृष्टा परदुःखनिवृत्तिचर्या । केचिदाग-मविदो रसेन मन्त्रेण वा योगिनो योगेन वा सिद्धिमिच्छन्ति यथा देहस्य प्राकृतत्वमपहत्य तस्य दिव्यत्वममृतत्वमाकाशमयत्वं वज्रमयत्वमित्यादि प्राप्नुयुः । भक्तैः पुनर्भक्तिरस एव श्रेष्ठः पुरुषार्थ इति विज्ञाप्यते । श्रीमदरविन्दमहर्षिभिरधिमानसज्ञानादुपरि विज्ञानमहिमानं सूचयद्भिर्विज्ञाना-वतारस्ततश्च चिन्मयीभावो जगतः प्रतिपादितः । तथैव कविराजपादैरपि स्वकीये अखण्डमहायोगे ।

प्रवृत्तेश्च निवृत्तेश्च सापेक्षत्वदर्शिनः ।
पूर्णत्वं ख्यापयामासुः परमार्थस्य लक्षणम् ॥ ४२ ॥
जीवन्मुक्तस्य बुद्धस्य संसाराक्लिष्टदर्शनम् ।
सिद्ध्यत्येव परावृत्तौ तुल्यो लीलारसस्तथा ॥ ४३ ॥

एवञ्च आध्यात्मिकानुभूतिसोपानपरम्परा मृत्युसंवेगादारभ्य कर्मज्ञान-भक्तियोगानाक्रम्य नवीनविज्ञानयोगं यावदारोहति । कर्मयोगो यज्ञोपासना-द्यनुष्ठानं संस्कारनिर्वर्तनं च विदधानो लोकमर्यादापालनं निर्दिशन् निष्काम-कर्मणि लभते परिणतिम् । आसक्तिबन्धनं श्लथयन् ज्ञानयोग्यतां च सम्पादयन् कर्मयोगो वैराग्यबोधमध्यात्मजिज्ञासां चोपकरोति । ज्ञानयोगः पुनः मिथ्याबुद्धिं निरस्यन् तत्त्वबुद्धिं जनयन् परमार्थमादर्शयति मुक्तिं पुरस्कुर्वन् । परमगुरुतया परमहितैषितया च सर्वैरभ्यभ्युपगते परमपुरुषे भक्तेरुदयः स्वाभाविक एव । सा च रसस्वरूपा परमः पुरुषार्थः[122] । भक्त्यैवाकृष्यमाणा परमा शक्तिः कदाचिदशेषं जगच्चिन्मयीकुर्यादिति महतामाशामेव स्वीकुर्वन् विरमामि ।

●

पादटिप्पण्यः –

1. प्रसिद्धं चित्तस्य हेतु-प्रत्यय-जन्यत्वमनित्यत्वं च । पुनश्च सविषयमपि चित्तं स्वयमपि चित्तान्तरस्य विषयोऽनुमानेन परचित्तविज्ञानेन वा, पुनश्च साक्षिणः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वसंवेदनस्य च विषयः । एवं नियतकालिकविषयतया चित्तं मनोविज्ञानस्य जिज्ञास्यं भवति क्रियात्मकं वृत्तात्मकं च । एतादृशं चित्तं जडदृश्याद् नात्यन्तमसङ्कीर्णम्, तथा चाधुनिकमनस्तत्त्वविद्भिर्दार्शनिकैरपि कैश्चिद् न कार्यव्यवहाराद् भिन्नमध्यवसीयते । न तादृशं मनोवृत्तमेवानुभवपदेनात्र विवक्षितम् । अपरथा संशय-प्रमा-भ्रमाद्यभिन्नज्ञानरूपेण गृह्यते अनुभवः प्रमाणशास्त्रविचारे । तत्र ग्राहकं ज्ञानं स्वस्माद् भिन्नमेव विषयं प्रकाशयति स्वोत्पत्तिहेतुगुणदोषाधीनप्रामाण्यम् । प्रत्यक्षेण इन्द्रियार्था मनोवृत्तानि वा प्रकाश्यन्ते. अनुमानेन व्यावृत्त्यात्मकानि तत्त्वानि, शब्देन मनोऽभिप्रेतविषयाः । नैतैः प्रमाणैरात्मा चेतनो विषयी वा प्रकाशमायाति । तथा चाधुनिकदर्शने बहुचर्चितोऽयं प्रश्नः कथं पुरुषान्तरस्य ज्ञानं भवतीति । पुनश्च निर्विकल्पं चेदिदं सविषयं ज्ञानमव्यवसितं च स्यात् । सविकल्पं चेदिदं सविषयं ज्ञानमस्फुटं संशयास्पदं च स्यात् । सविकल्पं ज्ञानं दृश्यविषयं, परिच्छिन्नं सदपि संशयभ्रमाद्यास्पदं च । नेदं ज्ञानं स्फुटमसंशयं चेतनविषयं वा । वस्तुत आत्मनि चैतन्ये वा स्वविषये स्वतन्त्रा ज्ञानशक्तिः स्वीकार्यैव अन्यथा विषयातिरिक्तस्य विषयिणो लोपः प्रसज्येत । न चेष्टापत्तिरत्र वक्तव्या विषयविषयिणोस्तमःप्रकाशवद्विरुद्धस्वभावत्वात् ।

कल्पना-स्मृति-रागादयः चित्तसम्प्रयुक्ता धर्माः सविषया अपि न विषययाथार्थ्यादेव समुद्भूताः, तेषां विषयिसापेक्षाभिवृत्तिरूपत्वात् । विकारजा भावा अपि तथैव । सर्वत्राप्येषु धर्मेषु चैतन्यमासिक्तमपि न स्वरूपविश्रान्तं भवति । स्वानुभूतिरेवात्रानुभवशब्देन विवक्षिता, तत्र विकल्पाभावेऽपि निश्चयात्मा स्वपरामर्शः । साक्षात्कारश्चायमैन्द्रियप्रत्यक्षादुच्चतरः । द्र. राधाकृष्णन्, **आइडियलिस्ट व्यू ऑव लाइफ**, जोड, **काउन्टरएटैक फ्रॉम द ईस्ट**, ब्रैडले, **अपीयरेन्स एन्ड रीयलिटी**, पृ. १४३-६२ हेगेल, **एन्सिक्लोपेदी**,, पृ. १९४-९५. विद्यारण्यः, **स्वानुभूतिप्रकाशः**, **विज्ञप्तिमात्रतात्रिंशिका**, कारिकाः २५-३०, योगसूत्राणि, १.४७-४९ ।

2. ज्ञानसम्प्रयुक्ता धर्माः सञ्ज्ञा-वेदना-संस्कारादयो बौद्धैः परिगणिताः । कल्पनास्मृति-रागाद्योऽत्र सङ्ग्राह्याः । मुख्यतया स्वसंवेदनगोचरा एव ते अनुव्यवसायेन अतीताः प्रत्यवेक्षया वा योगाभ्याससिद्धसाक्षिभावेन परामृश्यन्ते । स्मृतिरागादिविषयास्तत्समवेततया परामृश्यन्ते । विज्ञान-वेदनादीनामपरोक्षा च सत्यत्व-रम्यत्वादिबुद्धिः । अन्तःपरामर्शगोचरा विषया एवातीन्द्रिया आध्यात्मिकाश्च । ननु कायिकोऽपि भवति अन्तःस्पर्शो यथा जठराग्नेर्हृत्कम्पस्य धमनीषु रुधिरप्रवाहवेगस्य जिह्वाचलनस्य, तथैव सर्वोऽप्यन्तःपरामर्शो भवेत् कायिक एवेति चेत्, न , क्रोधभयाद्यनुभवे वाग्व्यवहारानुभवे वा नान्तः कायिकस्पर्शेनैव निर्वाहः प्रत्युत तादृशस्पर्शा व्यञ्जका उदबोधका वा । न भावानामनुभावस्वरूपता नापि ज्ञानविषयीभूतवाक्यार्थानां वर्णोच्चारणस्वरूपता ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

3. ब्रह्मसूत्रभाष्योपोद्घातश्च भगवत्पादानां सुप्रसिद्ध एव "युष्मदस्मत्प्रत्यय-गोचरयोर्विषयविषयिणोः तमःप्रकाशवद् विरुद्धस्वभावयोरितरेतरभावा-नुपपत्तौ सिद्धायां सुतरां तद्धर्माणामपीतरेतरभावानुपपत्तिः -" इत्यादिः ।
4. प्रत्यक्षग्राह्या विशेषा अप्रत्यक्षैः सामान्यादिभिः विकल्पिता एवाध्यवसीयन्त इति सौगतमतम् । अर्थानां वस्तुत्वादेव क्षणिकत्वं साधयद्भिः बौद्धैः तेषां स्वरूपतः अध्यवसेयत्वमपि बाधितम् । अपरथा नैयायिकाः सामान्यानि वस्तुगतानि प्रसाध्य प्रत्यक्षज्ञाने सविकल्पत्वमभ्रान्तं साधयन्ति । तथा च प्रत्यक्षलक्षणं गौतमीयम् । अन्येऽपि बहवो दार्शनिकाः प्लातोनाद्याः सामान्यच्छायामेव स्वीकृत्य प्रत्यक्षविषयेषु तेषां ज्ञानयोग्यतां प्रतिपादयन्ति । बौद्धास्तु सामान्यानि सम्बन्धांश्च विकल्पमात्रमभिदधते तथा चाचार्यदिङ्नाग– न सम्बन्ध इन्द्रियेण गृह्यत इति । वैयाकरणास्तु शब्दविकल्पौ परस्परव्यापकौ मत्वाऽपि शब्दं प्रमाणीकुर्वन्तो विकल्पमपि प्रमाणीकुर्वन्ति । एवं सामान्यादिस्वरूपे विवादास्पदेऽपि प्रत्यक्षमात्रग्राह्यस्य तदपेक्षत्वं स्फुटमेव । द्र. **वाक्यपदीयम्**, ब्रह्मकाण्डम्, ३० **न्यायबिन्दुः**, १.४-५ **न्यायसूत्राणि** १.१.४ ।
5. न हि गा अनालोच्य गोत्वविज्ञानं सम्भवति । अन्वेषणोपकारिण्यः अभिकल्पना अपि तत्र प्रत्यक्षेणैव नियम्यन्ते । एवं परस्परोपकारित्वं प्रत्यक्षविकल्पयोः व्यावहारिकज्ञाने प्रकृतिविज्ञाने च । तेन सामान्यादीनां स्वतन्त्रसत्त्वम-कल्पयित्वाऽपि प्रत्यक्षार्थज्ञानस्य बौद्धार्थापेक्षित्वं सिद्ध्यति । ते च बुध्यपरोक्षा अर्थाः क्वचिद् नाममात्रं क्वचिद्विकल्पमात्रं क्वचिच्चात्मापरोक्षा अर्थाः ।
6. तु. तर्कभाषा, समवायनिरूपणम् ।
7. अर्वाचीनभौतिक्यां यैः "व्यवकलनीय-समीकरणैः" (डिफ्रेन्शल - इक्वेशन्स) जगत्स्थितिः निरूप्यते तानि स्पर्शरेखोपमानीति प्रसिद्धम् ।
8. शब्दस्य स्वतः प्रामाण्यवादो मीमांसकैः समर्थित इति प्रसिद्धम् - तत्र पक्षविपक्षयोः द्र. **श्लोकवार्तिक - तत्त्वसङ्ग्रहौ** ।
9. गणितविज्ञानम् आदर्शीकुर्वद्भिः पाश्चात्त्यदार्शनिकैः धर्मविज्ञानपरायणैश्च भारतीयैरनुभवप्रामाण्ये संशयः प्रकाशितः । पौरुषेयशब्दस्य प्रामाण्यं वक्तुराप्तत्वमपेक्षते, धर्मज्ञापकवचने पुनः पुरुषानपेक्षमेव प्रामाण्यं सर्वस्याभीष्टं व्यभिचारशङ्कानिवारणार्थम् । तथा च धर्मवचनानि पर्यन्ततो न स्वसाधने हेतुमुपन्यस्यन्ति । "सत्यं श्रेयः", "पापाय परपीडनम्" इत्यादि-वचनानि न स्वप्रामाण्यार्थं वक्तृमुखापेक्षीणि । एतादृशानि वचनानि स्वतः सिद्धानि अपौरुषेय–तुल्यान्येव । तथापि स्वोत्पत्तौ तानि आप्तपरम्परालब्धान्येव । वेदमन्त्रा अपि ऋषिदृष्टा एव । पौरुषेयत्वापौरुषेयत्वपक्षयोः द्र. **तत्त्व-सङ्ग्रह-श्लोकवार्तिके** ।
10. सम्प्रयुक्तधर्माश्चेत्परोक्षा अविदिता एव तिष्ठेयुः । नानेन विप्रयुक्तानां नियतपारोक्ष्यं विवक्षितम् । नाम- संख्या -जात्यादयो धर्मा विज्ञेया अपि चित्तेन न प्रज्ञप्त्या विना ज्ञायेरन् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

11. स्वप्रकाशमेव ज्ञानं स्वतः प्रमाणं भवितुमर्हति तथा च स्वानुभूतिरेव स्वतः प्रामाण्याभिषेकार्हा ।
12. न स्वप्रकाशता ज्ञानस्य तद्विषयीकरणेन, स्वसत्तयैव ज्ञानस्य स्वस्मिन्न-ज्ञानाभावः, तेनास्य स्वालक्षण्यम् ।
13. द्र. मम **बौद्धधर्म के विकास का इतिहास,** (तृतीयं संस्करणम्) पृ. ४४८-४९ ।
14. सौगतेन मतेन नैयायिकविरुद्धेन न नीलत्वं प्रत्यक्षीक्रियते । प्रत्ययविषययोः सारूप्यं कीदृगिति विचारमर्हति । बौद्धैः विषयः आलम्बनप्रत्ययो व्यपदिश्यमानो ज्ञानहेतुषु परिगणितः । अतश्च सारूप्यं नियतसम्बन्धान्नातिरिच्यते सौत्रान्तिकमते । प्रत्ययस्य यथास्थितविषयोपदर्शकत्वं स्वीकुर्वाणैः सारूप्यं दुर्व्याख्येयमेव ।
15. तथा च प्रसिद्धा त्रिलक्षणी धर्मस्य अनित्यत्वदुःखत्वानात्मत्वरूपा ।
16. द्र. अभिधर्मकोशादिषु ***धर्मलक्षणानि ।***
17. द्र. श्रीहर्षकृतं **खण्डनखण्डखाद्यम्,** नागार्जुनकृता **माध्यमिककारिकाः,** ब्रैडले, **एपीयरेन्स एन्ड रीयलिटी ।**
18. न शून्यत्वादीनि परमार्थविषयाणि लक्षणानि प्रत्युत लक्षणनिषेध एव ।
19. अविद्यामुत्तितीर्षोरेवायं भेदः, उत्तीर्णस्य त्वभेद एव । तथा चोक्तम्–
"संसारस्य न निर्वाणात् किञ्चदस्ति विशेषणम् ।
निर्वाणस्य न संसारात् किञ्चिदस्ति विशेषणम्" ॥
20. गीताभाष्योपोद्घातो भगवत्पादानाम् ।
21. तु. गीतोक्तम् "वर्त एव च कर्मणि" (३.२२) ।
22. निर्माणकायविषये द्र. कविराजपादानां लेखस्तद्विषयः - **प्रिंसेस ऑव वेल्स सरस्वतीभवन-स्टडीज,** ख. १ ।
23. तत्रैव
24. तु. राधाकृष्णन् (सं.) पूर्व. ख. २, पृ. ४२३ प्र. ।
25. तथा चाधुनिकनृतत्त्वविदः पूर्वोल्लिखिताः टायलरादयः ।
26. तु. मम **मीनिंग एन्ड प्रोसेज ऑव कल्चर ।**
27. द्र. सार्त्र, बीइंग एन्ड नथिंग (अनु.) ।
28. प्रपित्सुः परीक्ष्यत ईश्वरेणेति बहुशः प्रचलितं मतम् ।
29. द्र. इलियद, सर्गः २१,पं. १०६, सर्गः २२, पं. ३६५ (होमरीय पङ्क्तयः)
30. द्र. ब्राउनिंग, ग्रैमेरियन्स फ्यूनरल (सङ्कलनं एवरीमैन्स-द्वारा प्रकाशितम्) ।
31. ऑस्बोर्न, **कलैक्टेड वर्क्स ऑव रमण महर्षि, प्रेफेस ।**

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

32. गिडर्स डाइजेस्ट इत्यत्र पुस्तकोल्लेखः प्रकाशितः ।
33. शवाधानशेषा हि प्रागैतिहासिका लक्ष्यन्ते ।
34. द्र. **सर्वदर्शनसङ्ग्रहः** चार्वाकदर्शनम् ।
35. अभौतिकम्य ऐन्द्रियप्रत्यक्षायोग्यत्वात् ।
36. द्र. कथावत्थु इत्यत्र प्रथमा पुग्गलकथा । तु. राइल इति नाम्न आधुनिकाचार्यस्य **द कौन्सेप्ट ऑव द माइन्ड**; ह्यूमाचार्येण सौगततुल्यैव युक्तिः प्रयुक्ता ।
37. न्यायकुसुमाञ्जलिः तृतीयः स्तबकः ।
38. तेषामयमाशयः प्रत्यक्षायोग्ये वस्तुनि प्रमाणानवकाशात् तदभ्युपगमो निरर्थकः । तु. धर्मकीर्तेः **न्यायबिन्दुः**, २.४७ ।
39. एतादृशं प्रतिवचनं बहुभिः कृतम् ।
40. द्र. **शारीरकभाष्यम्** बहुशः ।
41. द्र. **न्यायसूत्राणि** ४.१.१०-१३ । देहाधीनत्वादात्मलिङ्गानां देहाभावे आत्मास्तित्वकल्पनं दुष्करम् ।
42. चित्तसाक्षित्वादात्मनः कौटस्थ्यं साङ्ख्यैर्वेदान्तिभिश्च साध्यते । ग्रीन-बर्गसॉ आदिभिरपीयं युक्तिः प्रयुक्ता ।
43. इदं मतं विषयिणं विषयाद् ज्ञानव्यापारे भूमिकाभेदादेव पृथक्करोति न द्रव्यतः पदार्थतो वा, यथा स एव पुरुषः सम्बन्धभेदात्पुत्रोऽपि भवति पितापि, यथा वा सैव गुलिका स्थानभेदेन दश शतं वा सूचयति ।
44. तथापि इदं स्मर्तव्यं यद् द्रव्यतया अभौतिकतया वा असिद्धं चैतन्यं न तेन भौतिकदेहस्य गुणः कर्म विकारो वा सिद्ध्यति न वा चैतन्यं नाममात्रमिति स्थूलहस्तावलेपेन अपहस्तयितुं शक्यम् ।
45. छा. ८.६-११ ।
46. मा. ४ ।
47. सूक्ष्मदेहविषये द्र. सांख्यकारिका ४०-४२ । स्वप्नेन सूक्ष्मदेहे असाध्येऽपि आगमाद् अनुभूतिविशेषाच्च तस्य सिद्धिः ।
48. कविनैव स्वानुभूतिर्वर्णिता ।
49. उदा. द्र. वृ. भाष्यम् ।
50. सामीयधर्मेषु साधारणोऽयं जीववादः प्राचीनयवन-दर्शननिबन्धनः ।
51. द्र. ब्रह्मजालसूत्रं **दीघनिकाये** प्रथममेव । स्वातन्त्र्येणापि सूत्रमिदं भेदेन च उपलभ्यते । द्र. नन्जियो, **कैटेलौग ऑव द चाइनीज त्रिपिटक** ।
52. वेदान्तसूत्रभाष्यम् २.१.११ ।
53. इदं च काण्टाचार्येण महताटोपेन साधितं स्वकीयैर्ज्ञानालोचनपरैर्ग्रन्थैः ।
54. कौनडॉयल-कॉसलर-आदिभिः देहोत्तीर्ण-चैतन्य-विषये अनुसन्धानं प्रवर्तितमिति विदितमेव ।
55. द्र. रोड, साइके, गिलूवर्ट म्योर, **फाइव स्टेजेस ऑव ग्रीक रिलिजन** ।
56. द्र. ब्रैस्टेड, **डवलैपमेन्ट ऑव रिलिजन एन्ड थौट इन एन्शैन्ट इजिप्ट** ।
57. उदा. ऋ. १०,१५-१६, १८-१९ ।
58. द्र. ट्राइटन, **मुस्लिम थियॉलजी** ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

59. द्र. अभिधम्मत्थसङ्गहो ।
60. द्र. तत्त्वार्थसूत्रम् ।
61. द्र. साङ्ख्याकारिका ४२-४६ ।
62. नानाव्यपदेशैर्निर्दिष्टम् ऋतं देवव्रतं वा मानवकर्मणि प्रमाणमिति प्राचीना सार्वत्रिकी धारणा । कथं स दिव्यो नियमो मानवेन ज्ञेयः के ते प्रतिविशिष्टा नियमा इत्यादिविषया बहुधा व्याख्याता धर्मेषु ।
63. मिस्रदेशीयानि भोटदेशीयानि वा प्रेतचरितवर्णनानि गरुडपुराणादिवर्णनानि वा द्रष्टव्यानि ।
64. तु. जॉन स्टुअर्ड मिल, थ्री एसेज, ऑव रिलिजन (१८७४) ।
65. जन्मसिद्धपापान्मुक्तिः कथं लक्ष्येत्यत्र क्रिस्तीयसम्प्रदायेषु मतानि भिद्यन्ते । यीशुना ईशपुत्रेण मानव-देह-परिग्रहेण मानवजात्या नैसर्गिकं पापं कृपया स्वीकृत्य तद्दण्डरूपेण स्वप्राणत्यागेन सर्वमानवेभ्यो निष्कृतिर्दत्ता स्वरूपेण, अतो यीशुशरणगमनेन मूलपापान्मुक्तिर्लभ्यते तदनन्तरकृतात्पापात्तु अनुताप-पुरस्सरं तपश्चर्यादानादिकर्मणा केवलया भक्त्या वा । कैथलिकसम्प्रदाये सङ्घप्रवेशेन तदादेशेन संस्कारनिर्वर्तनेन सत्कर्मणा च मुक्तिर्लभ्या, प्रोटेस्टेन्ट सम्प्रदायेषु तु प्रायेण भक्तिमात्रेण प्रपत्तिमात्रेण वा मुक्तिः । द्र. हौज, **सिस्टमैटिक थियॉलजी** (१८८८) ।
66. यथा काल्विनमतानुयायिनः द्र. इंग, **प्रोटैस्टेन्टिज्म** (१९३५) ।
67. द्र. तत्रैव ।
68. द्र. तत्रैव ।
69. संसारवादविषये द्र. मम **स्टडीज इन द ओरिजिन्स ऑव बुद्धिज्म** ।
70. तु. **न्यायसूत्राणि** १.१.२, प्रतीत्यसमुत्पादो दुःखसमुदयमेव विशदयति ।
71. तु. **मिलिन्दपञ्हो** (मुम्बई, १९४८), पृ. ४२-५२ ।
72. विज्ञानसन्ताने वासनायां च द्र. तत्रैव ।
73. स्वयंकृतादिकर्मविकल्पे द्र. मम **पूर्व.** ।
74. तथा च कृतप्रहाणमकृताभ्यागमं च परिवर्जयितुं जन्मान्तरकल्पनमावश्यकम् ।
75. अधुना मानवदुःखानां सामान्यतः समाजव्यवस्थाहेतुत्वं तत्प्रतिकारं च सम्यग्राज्यव्यवस्थाहेतुकं प्रतिपादयन्ति राजनीतिशास्त्रविशारदाः, उदा. तु. लैस्की, **ग्रामर ऑव पौलिटिक्स** ।
76. द्र. प्रसिद्धं वचनम् - वजिरायाः **संयुत्तनिकाये** ।
77. द्र. **तन्त्रालोकादिषु** प्रत्यभिज्ञाशास्त्रेषु ।
78. द्र. **मम फाउन्डेशन्स ऑव इन्डियन कल्चर**, ख. १ ।
79. उदा. **सर्वदर्शनसङ्ग्रहः**, ।
80. तत्रैव ।
81. द्र. यीशुनिरूपितो **नूतनधर्मनियमः** ।
82. द्र. दिनेशचन्द्र सरकार, **सेलेक्ट इन्सक्रिप्शन्स**, खण्ड १ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

83. तु. "क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते" (शिवमहिम्नः स्तोत्रम्) ।
84. द्र. **तत्त्वचिन्तामणौ विधिवादः** (मूर्तिमतीव्याख्यायुतः), पृ. १-१९ ।
85. तथा चाधुना "प्रातिस्विकविधयः" (पर्सनल लॉ) इत्याख्याः विधिशास्त्रे निर्दिश्यन्ते ।
86. अपराधमार्जकतया प्रायश्चित्तं दण्डमुपकरोति ।
87. माध्यमिककारिकाः, तु. **अमरकोशः** ।
88.. माध्यमिककारिकाः, तु. **अमरकोशः** ।
89. द्र. मम मूल्यमीमांसा, पृ. ३०-६९, भक्तिदर्शनविमर्शः, तृतीयं व्याख्यानम् ।
90. शतपथब्रह्मणम् ।
91. द्र. प्राचीनौर्ध्वदेहिकानुष्ठानविषये - स्व. प्र. गुप्त, **बेरियल प्रैक्टिसीज** ।
92. संस्कारानुष्ठानानि सङ्क्रमणावस्थाजन्योद्वेगप्रशमनार्थं कल्पितानीत्याधुनिकैः समाजशास्त्रिभिरुद्भाव्यते द्र. दुर्कहाइम, **एलिमेन्टरी फौर्म्स ऑव रिलिजस लाइफ,** तृतीयो भागः, प्रभु, **हिन्दू सोशल और्गनाइजेशन** ।
93. अयमेव वैदिकः संस्कृतिपदार्थः ।
94. गीता ।
95. वैशेषिकसूत्राणि ।
96. गृहिविनये द्र. सिगालोवादो योऽशोकप्रवर्तितस्य धर्मस्यापि मूलभूतेषु बुद्धवचनेषु सम्भावितः ।
97. आधुनिका उपयोगितावादिनः प्राचीनधर्मपरम्परावादिनश्चात्र अभिप्रेताः ।
98. तु. **मनुस्मृतिः,**
"जातिजानपदान्धर्मान् श्रेणीधर्मांश्च धर्मवित् ।
समीक्ष्य कुलधर्मांश्च स्वधर्मं प्रतिपादयेत्" ॥
99. द्र. हेगेल, **एन्तिसक्लोपेदी,** पृ. ४०२ प्र. ।
वेबर, **द रिलिजन ऑव इन्डिया : द सोशियोलजी ऑव हिन्दूइज्म एन्ड बुद्धिज्म** (लन्दन, १९५८) ।
100. **महाभारतम्,** नारायणीयोपाख्यानम् ।
101. **गीता,** एकादशोऽध्यायः ।
102. श्रीअरविन्द, **कालिदास** ।
103. द्र. मम **स्टडीज** ।
104. तु. **गीतगोविन्दम्**–निन्दसि यज्ञविधेरहह श्रुतिजातम् ।
105. द्र. **महाभारते** शान्तिपर्व ।
106. द्र. ब्रेस्टेड, **कॉन्क्वेस्ट ऑव सिविलिजेशन,** पृ. १९१ प्र. ।
107. अगस्तिन्, पूर्व. ।
108. तत्रैव ।
109. द्र. बर्जेस, **केव टेम्पल्स** ।
110. गीता ४.७–८ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

111. तत्रैव ।
112. **आत्मतत्त्वविवेकः** – "नास्त्येव तद्दर्शनं यत्र सांवृतमेतदित्युक्त्वापीत्यादि" ।
113. **प्रशस्तपादभाष्यम्** ।
114. तथा च **भागवते** एकादशस्कन्धे ।
115. **योगसूत्राणि** ईश्वरप्रणिधानविषयाणि ।
116. नरेन्द्रेण विवेकानन्द इति पश्चात्प्रथितेन बौद्धानामात्मप्रतिषेधविषये पृष्टानां रामकृष्णपरमहंसानामिदं वचनं वङ्गभाषातोऽनूदितम्–द्र. **रामकृष्णकथामृतम्** ।
117. तु. **केन. उ.** ।
118. अस्मिन्ननुच्छेदे त्रीण्यप्युद्धरणानि **माध्यमिककारिकातः** ।
119. **विज्ञप्तिमात्रतासिद्धिः** (त्रिंशिका) २४–३० ।
120. **महायानसूत्रालङ्कारः**, बोध्यधिकारः ।
121. स्वमुक्तिमिच्छन्तः श्रावका हीनाधिमुक्ता विज्ञापिता बहुशो महायानशास्त्रेषु तद्यथा अष्टसहस्रिकायां सद्धर्मपुण्डरीके च अधिमुक्तिपरिवर्ते ।
122. द्र. मम **भक्तिदर्शनविमर्शः** ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मुद्रकः रत्ना ऑफसेट्स लिमिटेड, कमच्छा, वाराणसी-10

Dr. Urmila Sharma Collection, Varanasi